Lakshmikavyam – A Critical Edition and Study

லக்ஷ்மீ காவ்யத்தின் நுண் ஆய்வுத்தொகுப்பு மற்றும் ஆய்வு

Thesis submitted to the
University of Madras
for the Degree of
Doctor of Philosophy (Ph.D.)

BY

A.Durgadevi
[No: Ph.D./Regn./97/FT/01/2014/2271 dated 3rd April 2014]

Under the guidance of
Dr.O.R.Devanathan, M.A., M.Phil., Ph.D., B.Ed.,
Head, PG and Research Department of Sanskrit
Presidency College
Chennai – 600005

January 2020

Dr. O.R. Devanathan. M.A., M.Phil., Ph.D., B.Ed
Associate Professor and Head,
PG and Research Department of Sanskrit,
Presidency College (Autonomous), Chennai 600005

CERTIFICATE

I certify that the thesis entitled '**Lakshmikavyam – A Critical Edition and Study**' (**லக்ஷ்மீகாவ்யத்தின் நுண்ஆய்வுத்தொகுப்பு மற்றும் ஆய்வு**) submitted for the degree of Doctor of Philosophy (Ph.D) by Ms. A. Durgadevi is the record of research work carried out by her during the period from January 2014 to January 2020 under my guidance and supervision, and that this work has not formed the basis for the award of any Degree, Diploma, Associateship, Fellowship or other Titles in this University or any other University or institution of Higher Learning.

Signature of the Supervisor
with designation

பொருளடக்கம்

		பக்கம்.எண்
	முகவுரை	i - vi
	பகுதி – அ	
	நுண்ஆய்வுத்தொகுப்பு	1 - 155
	பகுதி – ஆ	
முதல் அத்யாயம்	முன்னுரை	156 - 172
இரண்டாம் அத்யாயம்	நூல் சுருக்கம்	173 - 191
மூன்றாம் அத்யாயம்	லக்ஷ்மீ காவ்யம் - ஓர் ஆய்வு	192 - 273
நான்காம் அத்யாயம்	முடிவுரை	274 - 278
	நூற்பட்டியல்	

பகுதி – அ

நுண்ஆய்வுத் தொகுப்பு

முதல் அத்யாயம் முன்னுரை

முதல் அத்யாயம்
முன்னுரை

ப. எண்

- மஹாகாவ்யத்தின் லக்ஷணங்கள் 157
- பஞ்சமஹாகாவ்யங்கள் 158
- குமாரஸம்பவம் 159
- ரகுவம்ஶம் 160
- கிராதார்ஜுனீயம் 161
- ஶிஶுபாலவதம் 162
- நைஷதம் 163
- சேதுபந்தம் (அ) இராவணவதம் 164
- ஜானகிஹரணம் 165
- கோவிந்த பட்டாபிஷேகம் 166
- தஶாவதாரசரிதம் 167
- இராகவ பாண்டவீயம் 167
- இராகவ நைஷதீயம் 168
- யாதவாப்யுதயம் 169
- க்ருஷ்ணவிலாஸம் 169
- ருக்மணிகல்யாணம் 170
- ஜானகிபரிணயம் 170
- இராமசரிதம் 170
- லக்ஷ்மீ காவ்யம் 171

இரண்டாம் அத்யாயம்
நூல் சுருக்கம்

இரண்டாம் - அத்யாயம்
நூல் சுருக்கம்

ப. எண்

- முதல் ஸர்கம் 173
- இரண்டாவது ஸர்கம் 174
- மூன்றாவது ஸர்கம் 175
- நான்காவது ஸர்கம் 175
- ஐந்தாவது ஸர்கம் 177
- ஆறாவது ஸர்கம் 178
- ஏழாவது ஸர்கம் 180
- எட்டாவது ஸர்கம் 182
- ஒன்பதாவது ஸர்கம் 183
- பத்தாவது ஸர்கம் 184
- பதினோறாவது ஸர்கம் 184
- பன்னிரெண்டாவது ஸர்கம் 185
- பதிமூன்றாவது ஸர்கம் 186
- பதினான்காவது ஸர்கம் 188
- பதினைந்தாவது ஸர்கம் 188
- பதினாறாவது ஸர்கம் 189
- பதினேழாவது ஸர்கம் 190
- பதினெட்டாவது ஸர்கம் 191

மூன்றாம் அத்யாயம்

லக்ஷ்மீ காவ்யம் - ஓர் ஆய்வு

மூன்றாம் அத்யாயம்
லக்ஷ்மீ காவ்யம் - ஓர் ஆய்வு

ப.எண்

- ரஸம் 192
- த்வனி 198
- அலங்காரம் 201
- ஸம்வாதம் 222
- விசிஷ்டாத்வைதக் கொள்கைகள் 226
- வர்ணனைகள் 241
- வ்ருத்தங்கள் 270

நான்காம் அத்யாயம் முடிவுரை

நூற்பட்டியல்

பகுதி – அ

பகுதி – ஆ

நுண்ஆய்வுத்தொகுப்பு

லக்ஷ்மீ காவ்யத்தின் கையெழுத்து பிரதிகள் இரண்டு கிடைக்கபெற்றுள்ளன. அவற்றுள் GOML பிரதியை மூலமாக கொண்டும், அடையாறு நூலக பிரதியை சான்றாகவும் கொண்டு இந்த ஆய்வு மேற்கொள்ளப்பட்டுள்ளது.

GOML - ல் கிடைக்கப்பெற்ற கையெழுத்து பிரதியின் மொத்த பக்கங்கள் 2 - 296. பக்கம் ஒன்றிற்கு 19 வரிகள் உள்ளன.

அடையாறு நூலகத்தில் கிடைக்கப்பெற்ற கையெழுத்து பிரதியின் மொத்த பக்கங்கள் 4-441. பக்கம் ஒன்றிற்கு 21 வரிகள் உள்ளன.

GOML பிரதியை அடையாறு நூலக பிரதியோடு ஒப்பிட்டு பார்த்ததில் ஒவ்வொரு ஸர்கத்திலும் ஒரு சில சொற்கள் மாறுபட்டுள்ளன. அந்த மாறுபட்ட சொற்கள் அடிக்குறிப்பில் கொடுக்கப்பட்டுள்ளன.

अथ प्रथमस्सर्गः

Slokas 1-9 Not available

10.भूषाभुजङ्गेश्वरभुक्तशेषपक्षानिलाधूतकुलाद्रिमाला।

रङ्गेशयाग्रेसरवैजयन्ती पुष्णातु भूतीर्मम वैनतेयः।।

11.समस्तदर्वीकरराजपत्नी संप्रार्थ्यमानप्रियजन्मभिक्षाम्।

रङ्गेशयादर्शसुपर्णदारान् रुद्रां सुकीर्तिं च[1] विभावयामः।।

12.वेगेन रङ्गेशमनस्समानो वृत्तेन तन्नाभिसनाभिरेव।

सुदर्शनः प्रीतिकरस्सुराणां स्वान्ते मदीये स्वदतेनुवेलम्[2]।।

13.प्रभाभिरत्यर्कसहस्रकोटि पुरस्सरं हेतिपरंपराणाम्।

सुदर्शनं कर्शनमासुरीणां वरूथिनीनां कलये वरेण्यम्।।

14.यदीय घोषः प्रलयाब्धिघोषसब्रह्मचारी समराङ्गणेषु।

रङ्गेशहस्ताम्बुजराजहंसः स पाञ्चजन्यः प्रमदाय भूयात्।।

15.हैमी गदा रङ्गिदृता विधत्ते कौमोदकी कौतुकयोगिनं माम्।

शङ्खोत्तमार्चिः कवचावृताङ्गी चन्द्रातपालीद्धसुमेरुकान्तिः।।

16.कोटीविलग्नाञ्चितपाञ्चजन्यप्रकाशपुञ्जार्धितचावर__।

शश्वन्मुदं शार्ङ्गधनुर्लता मे समग्रयेद्रङ्गिकरान्तरङ्गा।।

17.सुदर्शनस्यांशुपरम्पराभिरापाटलो रङ्गिरणाग्रयायी।

पट्टांशुकोद्यत्परिवारलीलां प्रकाशयन्दीव्यति नन्दकासिः।।

18.जय _____ भनिर्गतेन प्रकाशबालातपपल्लवेन।

कृतावतंसः किल रङ्गधाम्नो नाभीसरोजप्रणयी विरिञ्चयः।।

19.विरिञ्चवक्राम्बुजराजहंसी सरस्वती सान्द्रसुधावदाता।

[1]सुकीर्तिञ्च

[2]स्वदतेऽनुवेलम्

रङ्गान्तरस्थितिजातहर्षा प्रीता भवत्वद्भुतवाग्विभूत्यै।।

20.यदीयहेषारव एव विद्या रत्नावलीरोहणकन्दलाद्रिः[1]।

स रङ्गधामोत्तममन्दुरायां सान्निध्यवान्नस्तुरगाननो व्यात्[2]।।

21.समग्रसारस्वतकल्पवल्ल्या यन्मूलकन्दं प्रवदन्ति सन्तः।

स पातु मां पा _____ मुखो वदान्यः प्रबोधमुद्राप्रकटीकृतार्थः।।

22.मनोज्ञगीतामकरन्दपूर्णं सपादलक्षोज्ज्वलपद्मपत्रम्।

चक्रे महाभारतपुण्डरीकं यस्तं मुनिं चन्द्रसरस्स्थमीडे।।

23.मोक्षैकसङ्गा[3]ङ्गुलिमुद्रयैव मोहान्धकारं नमतां जनानाम्[4]।

मुष्णाति यश्चन्द्रिकयैव चन्द्रः पराङ्कुशो रङ्गनिधिस्स जीयात्।।

24. मोषैः कृतैर्येन तथा प्रहृष्टो[5] देवस्तथा सालमहानसाद्यैः।

स्तोत्रैश्च न प्रीतिमुपैति रङ्गी तमाश्रयाभ्यादिचतुष्कवीन्द्रम्।।

25.यस्योपदेशो यतिधूर्वहस्य प्रपत्तिभाजां प्रशमैकहेतुः।

रङ्गेशपादाम्बुजराजभृङ्गो रामानुजार्यो रमतां स चित्ते।।

26.रङ्गेशकैङ्कर्यकलाकलापपर्यायसेनाधिपतिप्रकाशः।

जयत्वनन्तप्रतिमानधामा रामानुजार्यो विनतार्तिहारी।।

27.प्रभापतङ्गाविव रोचमानौ ज्योत्स्नाशशाङ्काविव शीतलाङ्गौ।

आद्यौ युवानावधिरङ्गभोगं नित्यानुषक्तौ[6] हृदये लिखामः।।

28.कल्याणनीलोत्पलकान्तवर्णौ कारुण्यवर्षोद्यमभृत्कटाक्षौ।

[1]कन्दलरोहणाद्रिः

[2]गाननोऽव्यात्

[3] ङ्गा emended as ङ्गा

[4]नमताञ्जनानाम्

[5]यथाप्रहृष्टो

[6]नित्यानुषक्तौ

विद्युत्पयोदाविव नौमि लक्ष्मीनारयणौ रङ्गपुरीधुरीणौ।।

29.लक्ष्मीपतिः प्राप्तसमस्तकामो भद्रं विदद्यान्मम रङ्गचन्द्रः।

शुक्लत्वमभ्येति यतः प्रवृत्तिरुद्वोढुमुत्पक्ष्मलमुक्तिकन्याम्।।

30.रङ्गेशयोरस्स्थलसन्निधानं रमाह्वयं रञ्जितसर्वलोकम्।

रोचिः किमप्यूर्जितहेमवर्णकर्णे जपं काङ्क्षितमातनोतु।।

31.समश्नुवानौ गुरुशिश्यभावं प्रभोधमुद्राञ्जलिचारुहस्तौ।

कृष्णार्जुनौ स्यन्दनसन्निविष्टौ श्यामौ युवानौ जयतः प्रसन्नौ।।

32.अस्ति त्रिलोकीप्रथिता मनोज्ञा विस्तीर्णवीथी विपुलापणश्रीः।

रङ्गाभिधाना नगरी[1] विभूत्या जितामराधीश्वरराजधानी।।

33.तुङ्गध्वजस्तम्भशिरोनिषण्णां यस्यां सुपर्णप्रतिमां विलोक्य।

वज्री सुधारक्षणजागरूकः प्रायेण तिष्टत्यनिमेषचक्षुः।।

34.यत्र ध्वजाग्रप्रतिमासुपर्णसौवर्णदेहद्युतिपिञ्जलेषु।

गृहेषु सर्वेषु मखांशभाजो जानन्ति जीवं वलभित्प्रणामात्[2]।।

35.यत्रोन्नतेन्द्रोपलगोपुराग्रस्फुरन्नृसिंहप्रतिमावलोकात्।

हतावशेषानसुरानमर्त्या वसन्ति चित्तेन तृणाय मत्वा।।

36.यद्गोपुरस्याग्रनृसिंहमूर्तेः स्वकन्धरादग्नसहस्त्रभानोः।

नूनं समुत्पन्नभयो मृगाङ्कः ततः परस्तादनिशं प्रयाति।।

37.यद्गोपुराधीश्वरवामभागस्थितैकदन्तप्रतियातनायाः।

सचामरौ भास्वरकर्णतालौ भङ्गैः करोतीव सुरस्त्रवन्ती।।

38.यद्गोपुरद्वारि सुरापगा च सूर्यात्मजाचात्तशरीरयष्टिः।

राकेन्दुकालाम्बुधरप्रकाशे सह्यात्मजां द्रष्टुमिवागते द्वे।।

[1]नररी

[2]वलभित्प्रणामात्

39.समुन्नतं यत्र सुवर्णशृङ्गं चतुर्मुखं[1]गोपुरमैन्द्रनीलम्।

दिवाकरस्यन्दनवाजिसृक्तफेनैस्सुधालेपविधिं दधाति।।

40.क्रीडागिरौ यत्र दिवाकराश्वश्रेणीखुरन्यासततीर्विभाति।

पयोधरे पद्मदृशां नवीना[2] नखावली नाथ समर्पितेव।।

41.अतीतसूर्येन्दुपथेन यस्यामुच्छायभाजा मणिगोपुरेण।

उदारदामोदरयन्त्रणाभिः न भिद्यते[3] तज्जगदण्डभाण्डम्।।

42.रामायणालेख्यमनोहरस्य यन्मण्डपस्यैव विलोकनेन।

कार्तार्थ्यभाजां श्रवणानि पुंसां श्रोतुं न रामायणमाद्रियन्ते।।

43.यस्यां महामण्डपचन्द्रशालामुक्तागवाक्षप्रसृतान्मयूखान्।

चन्द्रांशुबुद्ध्या बहुलेपि पक्षे मुग्धाश्चकोरा महुरालिहन्ति[4]।।

44.यस्यां मणिस्तम्भसहस्ररम्या[5] माभाति वैडूर्यविटङ्कराजि।

भूमण्डनम्मण्डप[6]मिन्द्रनीलसोपानमानन्दकरं मुरारेः।।

45.पद्मोपविष्टोन्मदराजहंसा विभाति नीलोत्पलमेचकश्रीः।

यच्चन्द्रवापीधृतपाञ्चजन्या मुरद्विषो मूर्तिरिव द्वितीया।।

46.सतीरपुन्नागमहीरुहाग्रप्रसूनकोशप्रतिमा प्रसन्ना ।

यच्चन्द्रवापी भजते विलासमन्तस्स्फुरन्मौक्तिकताम्रपर्ण्याः।।

47.मूलालवालेषु सुधयाभिषिच्य संवर्धितश्शीतकरेण यस्याम्।

प्रसूनकोशव्यपदेशतस्तां अन्तर्गतामुद्गिरतीव तुङ्गः।।

[1]सुवर्णशृङ्गञ्चतुर्मुखं

[2]पद्मदृशांनवीन

[3]यन्त्रणाभिर्नभिद्यते

[4]मुहुरालिहन्ति

[5]मणिस्तम्भसहस्ररम्य

[6]भूमण्डनम्मण्डल

48.यस्यां सुधादीधितिदीर्घिकायाः समीपतः पुष्पभरावनम्रः।

आलिङ्गितस्तुङ्गमहीरुहो यैश्श्रियं[1] प्रयच्छत्यचिरेण तेभ्यः।।

49.यच्चन्द्रमः पुष्करिणीसकाशे व्यासो महाभारतकृन्मुनीन्द्रः।

प्रसन्नमूर्तिर्भगवान्दयालुरद्यापि तीव्रं नियमं करोति।।

50.हविर्भुवामन्तरतश्चतुर्णां स्थित्वा निदाघांशुनिविष्टनेत्राः।

यस्यां सुधारश्मिसरस्समीपे तपः प्रकुर्वन्ति तपोधनेन्द्राः।।

51.यत्रानिशं शीतमयूखवापी तीर्थस्य गोप्ता कुमुदो गणेशः।

व्यासो मुनिर्मुक्तसमस्तरागो _____ देवस्सुवासाः ।।

52.अश्वत्थतीर्थप्रमुखानि तीर्थान्यष्टौ समस्ताघनिषूदनानि।

चन्द्रब्जिनी[2]पुष्करकर्णिकाया भद्राणि पत्राणि भवन्ति यस्याम्।।

53.बहिर्नमद्देव[3]किरीटरोचिर्मालादुकूलावरणाभिरामा।

मञ्जूषिकान्तर्गतकृष्णरत्ना यस्यां त्रिवर्णप्रकृतिर्विभाति।।

54.शीतांशुवापीतटसीम्नि यस्यां श्रीभूमिश्शङ्कारितपार्श्वभागः।

छत्रीकृतानन्तफणो दयालुः वैकुण्ठनाथः किल सन्निधत्ते।।

55.पार्थस्य सारथ्यविधिं वितन्वन् गीतासुधादानविधिञ्च कृष्णः।

यस्यां रथे वानरकेतुचिह्ने चकास्ति नित्यं प्रतिमानिभेन।।

56.सुदर्शनष्षोडशबाहुचिह्नो हुताशनार्कप्रतिमानतेजाः।

यस्यां चकास्त्यायुधसार्वभौमो[4] दैत्याङ्गनाकुङ्कुमपत्रहारी।।

57.हतान् कपीन्द्रान् समरे सुरस्त्रीस्संप्राप्य रन्तुं सहसा प्रवृत्तान्।

[1] यैश्श्रियं emended as यैश्श्रियं

[2]चन्द्राब्जिनी

[3]बर्हिर्नमद्देव

[4]सार्वाभौमो

निवर्तयामास महौषधाद्रेः संपादनाद्यस्स विभाति यस्याम्।।

58.अनन्तशाखार्थरहस्यगर्भैरप्राकृतैद्राविडसूक्ति[1]बन्धैः।

प्रहृष्टवैकुण्ठपदो जनानां पराङ्कुशो यत्र विभाति योगी।।

59.अपि प्रसिद्धावरणादिकृत्तेरपि प्रशस्तस्तुतिसंप्रयोगात्।

मोषैः परं मोदितरङ्गिचेताः जागर्ति यत्रादिचतुष्कवीन्द्रः।।

60.रामानुजाख्यो[2] यतिसार्वभौमः शेषावतारो जगदेकवन्द्यः।

प्रकाशयन्नात्मविवेकमुद्रां आस्ते सदा यत्र पवित्रकीर्तिः

61.श्रीरङ्गनारायणनामधेयो यतीश्वरो यत्रजयत्युदारः।

अशेषवन्द्यो विशदान्तरात्मा मुकुन्दमूर्तेरपरावतारः।।

62.पुत्रीकृतोरङ्गधुरन्धरेण पराशरः कूरकुलाधिनाथः।

गोविन्दशिष्यस्स तु यामुनार्यमनोरथं पूरितवान् द्वितीयम्।।

63.पुत्रत्वमाप्तः पुरुषोत्तमस्य सुदर्शनस्थापनदीक्षितात्मा।

श्रीव्यासभट्टप्रथितानुभावो यस्यां विजेता वचसा चकास्ति।।

64.विशुद्धविज्ञानगुणेन पूर्णः पूर्णाभिधानः पुरुषोत्तमश्रीः।

रामानुजाचार्यगुरुर्गरीयान् यस्यां निवासं कलयत्यजस्रम्।।

65.आचार्यकं वेदशिरोरहस्ये तन्वन् पुनर्द्रामिडवेदतत्वे।

श्रीसौम्यजामातृमुनिर्हि यस्यामद्यापि जागर्ति यशश्शरीरः।।

66.वाग्वैखरीखण्डितवादिलोकः वाधूलवंशार्णवपूर्णचन्द्रः।

जागर्ति यस्यां वरदार्यसूनुः श्रीवेङ्कटेशो गुरुरागमानाम्।

67.गोविन्दराजान्वयजो मनीषी पराङ्कुशो यामुनवैमनस्यम्।

अपाचकार प्रसभं तृतीयं विराजते वृत्तमणिप्रदीपः।।

[1]द्रविडसूक्ति

[2]रामानुजार्यो

68.श्रीवेङ्कटेशार्पिततातनामा धीराग्रगण्यः तिरुनम्बिवंश्यः।

गोत्रे पवित्रे शठमर्षणीये जातस्समिन्धे तिरुवेङ्कटार्यः।।

69.श्रीरङ्गधाम्ना जगदेकधाम्ना वेदान्तविद्याकृतपट्टबन्धः।

विश्वप्रतीतप्रतिवादिविद्वद्भयङ्करो यत्र विभाति विद्वान्।।

70.यत्र प्रपत्त्याभरणाभिरामो रामानुजाचार्य इति प्रतीतः।

आभाति रामानुजदर्शनाब्धिप्रालेयभानुः प्रथितानुभावः[1]।।

71.आसेतुकेदार[2]मशेषविष्णुस्थानानि येनाखिलवन्दितानि।

उन्मीलितानि द्रविणैरुदग्रैः रामानुजार्यस्स विभाति यस्याम्।।

72.द्विजन्मनां यत्र सहागतानां रङ्गेश्वरेणोत्त[3]मराय एषः।

दीप्तोदयानां दिवि तारकाणां एका चकोरप्रणयीव भाति।।

73.द्विजोत्तमो यत्र चकास्ति साक्षात्ताक्ष्योपमः काश्यपवंशदीपः।

सत्पक्षपात्युत्तमरायनामा रङ्गेश्वराज्ञाधुरिवर्तमानः।।

74.उदारधीरुत्तमराय एषः संप्राप्तलोकोत्तमराजचिह्नः।

रङ्गेशवंशक्रममूलभृत्यो यां शास्ति वैकुण्ठपुरादनूनाम्[4]।।

75.जीर्णां त्वचं सर्प इवालकेशसंपत्समां संपदमाशु मुक्ता।

यस्यानुजो यत्र च[5] तिम्मणार्यः प्राप्तो यतित्वं भजते मुकुन्दम्।।

76.तस्याग्रजास्थापितभूसुरेन्द्रबृन्दोनिशं यत्र विभाति धीमान्।

मृष्टान्नदाता भुविचक्रायो हृष्टो मुकुन्दाङ्घ्रियुगप्रपत्या।।

[1]भानुप्रथितानुभावः

[2]आसेतुकेदारsss

[3]रङ्गेश्वरेणोत्तs

[4]शास्तिवैकुण्ठपुरातनूनाम्

[5]यस्यानुजोयस्यचs

77.तस्यात्मजाश्चोत्तमचक्रायश्रीकृष्णरायाः प्रथिताः पृथिव्याम्।

यां पालयन्तो[1] विलसन्ति राजन् सौवर्णमञ्चादिनरेन्द्रचिह्नाः।।

78.निरूढचेता नियतं मुरारेः विहारवीथीपरिषेककृत्ये।

वंशो हि यस्यां वसुधासुराणां वासं विधत्ते वरुणोपमेयः।।

79.मधुद्विषो मानसतः प्रसूताः प्राप्ता द्विजा भागवतप्रसिद्धिम्।

आसज्य[2] ताम्बूलकरङ्कमङ्केष्वेकान्तसेवां रचयन्ति यस्याम्।।

80.द्विजाः प्रसिद्धा विमला वहन्तः शितं कृपाणं मणिपादुके च।

मुरद्विषो भारिककर्मनिष्ठा वसन्ति यस्यां हरितान्ववायाः।।

81.नानाविधैर्नाथमुनीन्द्रवंशं प्रकाशयन्तश्चरितैः स्वकीयैः।

अग्रे हरेर्गातुमतिप्रवीणा विपश्चितो यत्र वसन्ति विप्राः।।

82.कल्हारमालाकलनासु शौरेः कालेभिषेकोदकसंभृतौ च।

निर्निद्रचित्तानिपुणा द्विजेन्द्रा विभान्ति यस्यां विहिताधिवासाः।।

83.बृहद्भुणैकाश्रयतामुपेता[3] बृहस्पतेरन्वयजन्मभाजः।

पुण्याहनिष्ठाः पुरुषोत्तमस्य पुरोहिता यत्र वसन्ति पूताः[4]।।

84.काश्मीरदेशप्रभवप्रशस्ता यत्रप्रवीराः प्रथितान्ववायाः।

हेतीशताक्ष्यार्ङ्कमधोक्षजस्य द्वारं सदावन्ति सुवर्णदण्डाः।।

85.भक्त्या प्रपद्यन्त उदारवेषाः क्षपासु लक्ष्मीपतये कषायम्।

तन्वन्ति धन्वन्तरिशक्तिभाजो यस्यां निवासं भिषजो द्विजेन्द्राः।।

86. श्रीपुण्डरीकान्वयसंभवानां विख्यातिभाजां भुवि मालिकानाम्।

[1]यांपालयन्ति

[2]आसज्य

[3]बृहद्भुणैकाशयतामुपेताः

[4]पूताः

पङ्क्तिर्हि यस्यां परमं पुमांसं प्रालम्बमालाकरणैरुपास्ते।।

87.स्वांश्चित्रगुप्तान्वयसूतिभाजः प्रकाशयन्तः प्रतिभाविशेषान्।

श्रियः पतेश्श्रीमुखलेखपालिं लिखन्ति यस्यां लिपिकारमुख्याः।।

88.कर्णामृतैः काञ्चनकाहलीनां नादैर्मुहुर्नन्दितशार्ङ्गिचित्ताः।

कुले शुभे चित्ररथस्य जाताः कुर्वन्ति यस्यां वसतिं कुविन्दाः।।

89.चोलस्य राज्ञो निचुलेश्वरस्य कन्यात्वभाजः कलशाब्धिजायाः।

धात्रेयिकाभावमवाप्य धन्याः सर्वेशकान्ता निवसन्ति यस्याम्।।

90.निरस्तनिर्निद्रसरोजभासां विलोचनेनैव यदङ्गनानाम्।

जयत्यशेषं जगदात्मयोनिः प्रसूनबाणैरिति लोकवादः।।

91.नीलोत्पलोत्तंसनिलीना _____ 91 – 100 not available

100. _____

____श्या वनिताः क्षपासु। मुहुः प्रयच्छन्ति तृणाङ्कुराणि।।

101.आरामपूगोज्ज्वलपालिकानां यस्याञ्च सौधे ध्वजचामराणाम्।

भेदं विजानाति मधुव्रतालिः गन्धैः प्रभातप्रभवैर्नवीनैः।।

102.स्थलीजुषां यत्र तलोदरीणां प्रासादभाजाञ्च सनायकानाम्।

स्वेदाम्बुजालं हरतो नितान्तं मरुद्धृधाव्योमनदीसमीरौ।।

103.सौधेषु सौधेषु सुवर्णमञ्चा मञ्चेषु मञ्चेषु दुकूलशय्याः।

शय्यासु शय्यासु च यत्र बाला बालासु बालासु च कामलीलाः।।

104.वीथीषु वीथीषु यदङ्गनानां पदाब्जमञ्जीरभवो निनादः।

वापीषु वापीषु मरालकान्ता कोलाहलैः कोरकितेव भाति[1]।।

105.पाकक्रियाकेलिसमुत्सुकानां यद्बालिकानामधिराजवीथी।

[1]कौरकितेवभाति

रत्नानि निर्धूततनूनपादो भवन्ति मुक्तास्सिततण्डुलाश्च।।

106.यत्रान्तरीपेषु मनोहरेषु प्रसूनलिङ्गोदयमन्तरेण।

फलं निगूढं पनसास्स्वमूले वाचं विना सत्पुरुषा इवार्थम्।।

107.श्रीमच्छिरोद्वीपमहीविरूढा वंशाटवीपर्वविलग्नतारा।

क्षपासु यस्यां वहतीव कामं विपाकनिर्भिन्नविशुद्धमुक्ताः।।

108.कश्चित्प्रसादेन चमूविनेतुः गणेशभावं[1] गमितः किरातः।

यस्यामवन् कूपमधोक्षजस्य प्रक्षालनोदञ्चिततोयमास्ते।।

109.नीलोत्पलेन्दुद्युतिपेशलाभ्यां निषेवितो रामहलायुधाभ्याम्।

निद्राति यस्यामरविन्दनाभो निर्वर्णयन् पुण्यजनाधिवासम्।।

110.धीरोदात्तो देववेश्याभुजङ्गश्रीरङ्गेशः पन्नगाधीशशायी।

सर्वान् लोकान् रञ्जयद्रत्नपीठी रत्नश्रेणीरश्मिभिश्चानुरागैः।।

111.शय्यापन्नगमण्डलेश्वरफणासन्दोहरत्नोल्लस -

द्भासा सागरसार्वभौमतनयावक्षोजकुंभस्थलीम्।

कुर्वन् कुङ्कुमपङ्किलामनुकलं ब्रह्माण्डकोटीश्वरो

जागर्त्यण्डजचक्रवर्तिरथवान् श्रीरङ्गराजो हरिः।।

112.देवो यस्य भुजङ्गभोगशयनश्श्रीरङ्गराजो हरिः

तातः काश्यपचक्रायविबुधो लक्ष्मीर्जनन्युत्तमा।

तस्यैवोत्तमरायसत्तिरुमलाधीशप्रबन्धुः कृतौ

लक्ष्मीकाव्य उदारवैभवनिधौ सर्गोयमादिर्गतः।।

[1]गणेशभागं

अथ द्वितीयस्सर्गः

1.अथ रङ्गपुरीचन्द्रः करुणामृतवृष्टिभिः। आनन्द इति[1] वैकुण्ठो जगत्सदसदात्मकम्।।

2.निक्षिप्य जठरे स्वस्मिन्भुवनानि चतुर्दश। न्यग्रोधपत्रजठरे स्वपितिस्म मुखेन[2] यः।।

3.कल्पार्णवजले मग्नां पृथ्वीं पृथ्वीधरस्तनीम्। उज्जहारोत्पलीमालामिव यः कोलविग्रहः।।

4.वराहवपुषो यस्य दंष्ट्रालग्ना वसुन्धरा। रेजे कलङ्कसहिता रेखेव हिमदीधितेः।।

5.कुक्षौ प्रह्लादवद्भक्ताः कियन्तस्स्युरिति स्फुटम्। सन्द्रष्टुमिव दैत्योरःकवाटं प्रबिभेद यः।।

6.वामाङ्घ्रिनखनिर्भिन्नब्रह्माण्डावरणोभवत्। इतरेणाङ्घ्रिपद्मेन यो मिमीत महीतलम्।।

7.यस्य त्रिविक्रमस्योर्ध्वपादाङ्गुष्ठनखप्रभा। भिन्नदण्डाद्धहीरेजे हंसीवावरणाम्भसाम्।।

8.विनिहत्य महीपालान्सर्वान्परशुनात्मना। प्रेम्णा ब्रात्प्रणसाच्चक्रे यःपृथिवीं[3] पृथुविक्रमः।।

9.उर्वशीजन्मगेहोरुस्पर्धयेवाङ्घ्रिपङ्कजम्। यदीयं गौतममुनेर्धर्मदारानजीजनत्।।

10.जनकस्य सभामध्ये यो बभञ्ज महाभुजः। इष्वासं दृढमैशानं पुण्ड्रेक्षुमिव कुञ्जरः।।

11.चक्रवाकस्तनीं श्यामां यमुनां सागरप्रियाम्। कुपितो बलभद्रस्सन् आजहार हलेन यः।

12.उग्रसेनकुलोत्तंसं कंसं वीरञ्जघान यः। विनतानन्दजनको गरुत्मानिव पन्नगम्।।

13.कल्याणं कौस्तुभं रत्नं लक्ष्मीमपि सुलक्षणाम्। अम्भोधिमथनायासवेतनत्वेन योऽग्रहीत्।।

14.आसत्रङ्गपतेस्तस्य चतस्रो वल्लभास्स्त्रियः[4]। साक्षाल्लक्ष्मी मही नीला गोदा च गुणशालिनी।।

15.चोर[5]केरलपाण्ड्यानां अन्येषाञ्च महीक्षिताम्। कल्याणलक्षणोपेताः कन्याश्चोदवहद्विभुः।।

16.सत्स्वप्यन्तःपुरेष्वेवं रूपयौवनशालिषु। आसीद्रङ्गपुरेश्वर्यां रङ्गराजोऽनुरागवान्।।

[1]यति

[2]सुखेन

[3]पृथ्वी

[4]वल्लभास्त्रियः

[5]चोळ

17.वेलेव कलशाम्भोधौ ज्वालेव च हविर्भजि। अविनाभाववत्यासीत्सा च श्रीरङ्गनायके।।

18.लक्षणैरनवद्यान्तां[1] लक्ष्मीं श्रीरङ्गनायिकाम्। चक्रे रङ्गपतिर्देवस्सर्वान्तःपुरनायिकाम्।।

19.कौस्तुभालोकदीपाढ्यं कान्तं वक्षस्स्थलं निजम्। अदादनन्यसामान्यन्तस्यै[2] विभ्रममण्डपम्।।

20.जीवात्मा कौस्तुभमणिः मुकुरस्सततं स यः[3]। वक्षसो रङ्गराजस्य भूषाभूद्भूरिदीधितिः।।

21.पञ्चभूतात्मिका हृद्या पञ्चवर्णसमुज्ज्वला। वैजयन्ती रमाभर्तुर्माला भूदनपायिनी।।

22.सुदर्शनं जगत्भर्तुः पाञ्चजन्यश्च नन्दकः। कौमोदकी गदा शार्ङ्गमभवन्पञ्चहेतयः।।

23.रोषस्तस्य भुजङ्गेशश्शब्दब्रह्मधुरन्धरः। पीठत्वं शयनीयत्वमातपत्रत्वमप्यगात्।।

24.छन्दोमयवपुस्साक्षाद्गरुत्मान्पक्षिणां वरः। स्थितोभूद्रङ्गराजस्य वाहनध्वजकर्मणि।।

25.हेमदण्डधराश्शूराश्चण्डरूपास्सहस्रशः। आसंस्तस्य गणाध्यक्षाश्चण्डाद्याद्वारपालकाः।।

26.कुमुदप्रमुखाश्शौरेर्नानायुधसमुज्वलाः। दिव्याम्बरधराश्चासन्परिवाराःपरश्शतम्।।

27.आपूर्वपर्वतादाच त्रिकूटादा च मन्दरात्। आकैलासनृपास्सर्वे प्रणमन्ति स्म रङ्गिणम्।

28.न केवलं नृपास्तस्य मौलिरत्नमरीचिभिः। अद्यापि रञ्जयन्त्यङ्घ्रिब्रह्माद्यास्त्रिदशा अपि।।

29.गजाननप्रभृतिभिः पारिषद्यैर्निशेवितः। विष्वक्सेनो जगन्नेता तस्यासीद्दण्डनायकः।।

30.नित्यं यो रङ्गधामेव तमालदलमेचकः। सालप्रांशुश्चतुर्बाहुश्शङ्खचक्रगदाधरः।।

31.रङ्गराजमिवोद्दीप्तमुपजीवन्ति यं प्रजाः। अपाङ्ग[4]पालिनिष्यन्दिकरुणारसभाविताः।।

32.रङ्गेशेनेव येनासन्प्रशस्तविभवश्रिया । विध्वस्ता विमतास्सर्वे पालितास्सकलाः प्रजाः।।

33.रङ्गेशायेव धीराय यस्मै विस्मयकारिणे । नमत्यमरसङ्घातो मौलिसंघटिताञ्जलिः।।

34.रङ्गराजादिवाजस्रं यस्मात्सत्वगुणोत्तरात्। लभन्ते विबुधास्सर्वे रूपसौभाग्यसंपदः।।

[1]लक्षणैरनवद्यांतां

[2]सामान्यं तस्यै

[3] Emended, original version - श्रीमयः

[4]अपाङ्गि

35.रङ्गेशस्येव यस्याज्ञालेखं हैमदिवौकसः[1]। वहन्ति मौलिभिर्बहं नवीनमिव कैतकम्।।

36.रङ्गेश श्चनिर्व्याजं वीरो[2] यस्मिन्विनिर्गते । चतुरङ्गबलाक्रान्ताः प्रकम्पन्ते महीभृतः।।

37.विभूतिद्वययतिर्वाहं तस्मिन्निक्षिप्य सत्वभूः। क्रमेण सकलां लीलामन्वभूद्रङ्गचन्द्रमाः।।

38.गञ्जागृहं मधुलिहामस्त्रशालां मनोभुवः। जगामो पवनं रङ्गी कदाचित्कमलासखः।।

39.उल्लासकोकिलालापामुद्यद्भ्रमरकुन्तलाम्। वसन्तश्रियमद्राक्षीत्तस्मिन्त्रङ्गधुरन्धरः।।

40.कामप्रयाणसन्नाहकाहलीमञ्जुलस्वनः। कलकण्ठरवोरम्यश्शुशुवे चूतशाखिषु।।

41.निर्निद्रैश्चम्पकैश्शौरिर्निर्जाम्बरसमप्रभैः। चक्रे श्रीरङ्गनायक्या हेमपट्टविकल्पनाम्।।

42.तमालपल्लवं स्वीयकायसच्छायमर्चतः। अधिकण्ठं भुवो देव्या न्यस्तवान् ध्वस्तदानवः।।

43.लक्षीमीनारायणौ कान्तौ चक्रतुर्देहकान्तिभिः। परम्चम्पकतापिञ्छप्रायानुद्यानपादपान्।।

44.अवलोकेन लसता कन्दर्पशतजन्मना। रङ्गीकृतार्थयामास सर्वान्तःपुरसुन्दरीः।।

45.सत्यजासैकतोद्देशे चन्द्रमण्डलपाण्डरे। देव्या कमलया साकं चिक्रीड गरुडध्वजः।।

46.दण्डनाथो जगन्नेतुः कावेरीसिकतातले। रम्यां कृत्रिमहंसाढ्यां क्रीडावापीमकल्पयत्।।

47.रममाणः कमलया देव्या भूम्या च नीलया। तामपश्यद्विशालाक्षो ज्योत्स्नाललितकैरवाम्।।

48.कृत्रिमस्वर्णकदलीपूगपुन्नागभास्वरे। क्रीडासरःपरिसरे चचार कमलासखः।।

49.आपादकर्णमधिकं कल्हारकलिकाभृतः। इन्द्रगोपककूर्पासं[3] वहन्निव रराज सः।।

50.लक्ष्मीमुखे च ललिते निर्मले चेन्दुमण्डले। पर्यायेणाक्षिकमलं प्रेषयन्मुमुदे हरिः।।

51.अङ्गनालास्यभेदैश्च वाद्यघोषैश्च मेदुरैः। रेमे गीतैश्च मधुरैरानिशीथमधोक्षजः।।

52.लक्ष्मीविहारयोग्येषु पुण्डरीकवनेषु सः। राजहंस इव क्रीडां चकार दिवसे हरिः।।

53.केषुचिद्दिवसेष्वेवं पुष्पसौरभ्यशालिषु। गतेषुग्रीष्मसमयः प्रादुरासीन्महोदयः।।

54.श्रमाम्बुकणदानश्रीर्निदाघमदवारणः। मुहुश्चलत्तालवृन्तकर्णतालोप्यरोचत।।

[1] [1]हैमदिवैकसः

[2]वीरे

[3]इन्द्रकोपककूर्पासं

55.कल्हारकलिकोत्तंसः कौसुम्भवसनोज्ज्वलः। हाराभरणवान्रङ्गी ययौ निष्कुटमद्भुतम्।।

57.तत्र क्रीडासरोमध्ये हेमस्तम्भचतुष्टयम्। सीमण्टपं मणिमयं निवेश जगतीश्वरः।।

58.वारिमध्यप्रविष्टाभिस्स रेजे स्त्रीभिरावृतः। उत्तुङ्गकुचकुम्भाभिः करेणुभिरिवद्विपः।।

59.हेमशृङ्गधरोरङ्गी वनमालाविभूषितः। पीताम्बरो गुणनिधिर्नीलाचल[1]इवाबभौ।।

60.देवः पार्श्वगतास्सर्वा मुक्तादामविभूषिताः। जलैः काञ्चनशृङ्गस्थैरसिञ्चदसितेक्षणाः।।

61.अम्भःकणपरिक्षिप्तसर्वावयवशोभिताः। मूर्तिमत्य इवाभूवन्वनिता जलदेवताः।।

62.साम्बुशृङ्गकरं शौरेर्लक्ष्मीर्दक्षिणमग्रहीत्। असिञ्चदन्यपाणिस्थशङ्खानीताम्बुना सताम्।।

63.कमला काञ्चनस्निग्धा पयःकणसमुज्ज्वला। रेजे तारागणाक्रान्ता सुमेरोरिव मेखला।।

64.लक्ष्मीकरपुटोन्मुक्तैः कुङ्कुमोदकशीकरैः। पाटलाङ्गो बभौ रङ्गी सन्ध्यारुण इवाम्बुदः।

65.वक्षौजवदनैः स्त्रीणां कर्पूरस्थासकैरपि। शीर्णैस्सा सरसी रेजे गङ्गेव यमुनान्विता।।

66.अथ प्रादुरभून्मन्दं नीपमारुतमेदुरः। प्रावृद्कालो घनध्वानश्रवणोन्मत्तबर्हिणः।।

67.नूनं तत्पादजननी स्पर्धयेव हरिं तदा। नवागरुरसव्याजादालिलिङ्ग कलिन्दजा)।।

68.निद्रावेला तवैषेति शौरेः कर्णे घनागमः। प्राहेव कूजल्लोलम्बकैतकोत्तंसकैतवात्।।

69.विलोचनाब्जभ्रमरी निद्रानिर्निद्रपौरुषम्। भुजङ्गभोगशयनमसेवत जगत्गुरुम्।।

70.अपि वक्षस्स्थलक्ष्मीको विरहीव दिवानिशम्। अनन्तशयने जाग्रद्रङ्गशायी व्यभाव्यत।।

71.अथाययौ शरत्कान्ता प्रफुल्लकमलानना। हंसध्वनितुला कोटिकोलाहलसमुज्ज्वला।।

72.उत्थाय भोगिशयनादुन्निद्रशरदागमे। मुमुदे मुखमालोक्य रङ्गी कौस्तुभदर्पणे।।

73.रत्नदर्पणमृत्सृज्य कपोले विमले श्रियः। चक्रे चक्रधरो रङ्गी मुखालोकनकौतुकम्।।

74.कार्तिक्यामथ पूर्णायां कार्तस्वरगृहे हरिः। पञ्चरात्रविधानेन दीपोत्सवमलोकयत्।।

75.व्रीहिमध्यस्थितं स्वर्णपात्रस्थाः स्नेहवर्धिताः। निशास्त्रीचम्पकोत्तंसा दीपास्तत्पुरतो बभुः।।

76.प्रवालबुध्याराकेन्दुबिम्बगो हरिणार्भकः। इयेष चर्वितुन्नीपांस्तुङ्गगोपुरसंश्रितान्।।

[1]गुणनिधिर्नीक्ताचल

77.रराजोत्तुङ्गसालाग्रदीपश्रमसमागमात्[1]। पुनरुक्तालियुक्तेव पुष्पश्रेणी सुरद्दमे।।

78.अथाग्रविलसद्दीपं कौमुदीमहलाञ्छनम्। ज्वलन्तं दण्डमद्राक्षीत्तालपत्रावृतं हरिः।।

79.तस्य स्फुलिङ्गनिकरैरुद्गतैरूर्ध्वमुज्ज्वलैः। उत्सारिताः प्रतिकलं कल्पद्दममधुव्रताः।।

80.ज्वलतो दीपदण्डस्य ज्वालामालाभियोगतः। नखम्पचजलाजाता नाकालयमहानदी।।

81.ज्वालामालासु तीव्रासु शान्तास्वपि कथञ्चना। दीपोनर्धत दण्डाग्रे जगन्मङ्गलसूचकः।।

82.एवं कमलया साकं[2] श्रममाणाय रङ्गिणे। उपदा विविधा दिव्या राजानस्सन्न्यवेदयन्।।

83.चोलकेरलपाण्डयाश्च गौलकर्णाटघुर्जराः। एते चान्ये महीपालाः प्राभृतैस्तं सिषेविरे।।

84.सन्ति ये सूर्यवंश्याश्च सोमवंश्याश्च ये नृपाः। स्त्रीवाजिवारणग्रामरत्नैरप्रीणयन्हरिम्।।

85.मनुश्यशतसाहस्त्रसंवाह्यांस्तण्डुलान्सितान्। जनतामुद्गतस्साध्यान्दर्शयामास रङ्गिणे।।

86.तच्छासनेन जनता पूरयामास तण्डुलैः। महानसं घृतगुलक्षीरमुद्गफलैस्सह।।

87.तण्डुलानां समुद्गानां सस्यानाञ्च महीयसाम्। पाकातिरेकसञ्जाता धूममाला समुद्ययौ।।

88.ततस्तुषारनिकरैरन्धयन्सकलादिशः। हतपद्मवनच्छायो हेमन्तो मन्दमागतः।।

89.प्रभाते मार्गशीर्षस्य प्रथमे दिवसे हरिम्। निद्राणं बोधयामासुर्मागधा दिव्यसूक्तिभिः।।

90.आकर्ण्य तां सुललितां दिव्यां सूक्तिपरम्पराम्। प्रबुध्यविधिवद्रङ्गी प्राप मङ्गलमज्जनम्।।

91.तप्तकाञ्चनसंकाशे वसानो वसने हरिः। कुङ्कुमैस्साङ्गरागश्रीः कल्हारैर्माल्यवानभूत्।।

92.ऊर्ध्वपुण्ड्रो मुखे तस्य कस्तूरिकल्पितो नवः। उवाह फुल्लराजीवस्फुरत्भृङ्गततिश्रियम्।।

93.आह्निकं सकलं कर्म विधाय विधिवद्विभुः। नित्यदानं द्विजातिभ्यः प्रादात्प्रथितवैभवः।।

94.सार्धमृग्यजुषं साम्ना लक्ष्मीपतिरथर्वभिः। मुखेभ्यो द्विजमुख्यानां शुश्राव श्रुतिजन्मभूः।।

95.लास्यैर्मङ्गलवाद्यैश्च गीतैस्सह मनोहरैः। नीराजनविधिञ्च[3]क्रुस्तस्याग्रे वारयोषितः।।

96.हेमपात्रगतं दिव्यमन्नराशिं सुसंस्कृतम्। ससूपं षड्रसोपेतमङ्गीचक्रे चतुर्भुजः।।

[1]समागताम्

[2]सार्धं

[3]नीराजनविधिंच

97.उपस्पृश्य रमानाथः सर्वाभरणभूषितः। गृहीतनवताम्बूलो निर्जगाम निजालयात्।।

98.श्रावं श्रावं नवं गीतं पार्श्वभाजाम्मृगीदृशाम्। दर्शन्दर्शं पुरो नृतं चचार शनकैर्हरिः।।

99.मुक्तावैडूर्यमाणिक्यहेमसोपानपङ्क्तिभिः। आरुरोह स रङ्गेशश्चित्रमण्डपमद्भुतम्।।

100.तत्रोन्नतोपधानेन शुभ्रेणास्तरणेन च। युक्तमध्यास्त सौवर्णं भद्रासनमधोक्षजः।।

101.पराङ्कुशाद्यैर्मुनिभिः विनयानम्रनिग्रहैः। कृताञ्जलिपुटैर्भक्तैरसेव्यत जगद्गुरुः।।

102.निजापदानविषयां तैः प्रणीतां जनार्दनः। सूक्तिमाकर्णयामास गीयमानां स गायकैः।।

103.सूक्तौ यानि चरित्राणि दैत्यारेस्तानि गायकाः। नाटकीकृत्य निपुणास्तस्यैवाभ्यनयन्पुरः।।

104.तेषामभिनयैस्तैस्तैर्वाद्यतालानुकारिभिः। मुहुःप्रीतमना रङ्गी बभूव भुवनाधिपः।।

105.पतिते पश्चिमाम्भोधौ पतङ्गे पाटलत्विषि। उदास्थादासनान्मन्दमुदारचरितो हरिः।।

106.गन्धतैलावसिक्ताभिर्दीपिकाभिर्वृतो हरिः। रेजे गन्धफलीभिर्वातमालो भुवि जङ्गमः।।

107.वेणी रराज दैत्यारेः पश्चाद्भागविलम्बिनी। वक्षो नीलिमरेखेव कौस्तुभांशुतिरस्कृता।।

108स्थित्वा स्थित्वा मुहुर्गीतं शृण्वन्निशि मृगीदृशाम्। गच्छन्गच्छन्शनैर्वाद्यधौ[1]षैर्व्यहरदच्युतः।।

109.अन्तर्विन्यस्त कल्हारधम्मिल्लस्स कदाचन। मायानारायणी लीलामवाप पुरुषोत्तमः।।

110.बद्धमुक्तास्रजं जातु रङ्गी सुन्दरचूलकाम्। वहन्कान्तिविशेषेण जहार जनमानसम्।।

111.यं यं वैहारिकं वेषं यादवस्सन्यदर्शयत्[2]। तन्तमास्थाय रङ्गेशो निशा सुविहृतिं व्यधात्।।

112.अन्येद्युर्निरगात्सायं[3] दिव्यालङ्कारवान्हरिः। सशृण्वन्द्रामिडीमेव पद्यमालां कवीरिताम्।।

113.छत्रचामरखड्गादिस्वर्णोपकरणोज्ज्वलाः। मूलभृत्या मुररिपुं परिवव्रुः पररात्परम्[4]।।

114.रक्ताङ्कणगतं[5] देवं रक्ताभरणभूषितम्। रङ्गिणं तोषयामासुः ब्राह्मणान्वेदनिस्वनैः।।

[1]गछङ्गछञ्छनैर्वाद्यघो

[2]यादवस्सन्नदर्शयत्

[3]अनेद्युर्निरगात्सायं

[4]परात्परम्

[5]रक्ताङ्गणगतं

115.गङ्गाजन्मपदाम्भोजप्रक्षालनशुभैर्जलैः। देवस्संभावयामास ब्राह्मणान्वेदपारगान्।।

116.रङ्गेशः कञ्चुकधरैर्द्वारपालैर्नमस्कृतः। उत्तरद्वारमार्गेण निर्जगाम निरङ्कुशः।।

117.सहस्रनामसन्दर्भगर्भनिस्वनमेदुरा। काञ्चनी काहलश्रेणी जजृम्भे निर्गते हरौ।।

118.ढक्कापटहनिस्साणभेरीमद्दलबृन्दकः। कोलाहलोत्थसंजज्ञे नर्तयन्केलिबर्हिणः।।

119.हरेस्सुवर्णनिस्साणनिनदे दिक्षुजृम्भिते। पार्थस्य दशनामानि जप्यन्ते स्म जनैस्तदा।।

120.चन्द्रपुष्करिणीपाथस्तरङ्गनिकरस्पृशः। वाताः कंपितपुन्नागकलिकास्तं सिषेविरे।।

121.प्रचरद्रत्नवलयक्वणञ्च पुरमङ्गनाः। शनैस्सञ्चरतश्शौरेश्चामराण्यभ्यवीजयन्।।

122.पराङ्कुशं कवीन्द्रञ्च रामानुजयतीश्वरम्। पादुकाद्वयविन्यासाच्छिरस्यन्वग्रहीद्विभुः।।

123.चकोरचक्षुषां गीतैर्नानारागविजृम्भणैः। शङ्खदुन्दुभिनादैश्च ननन्द नलिनेक्षणः।।

124.तदग्रे ललितं लास्यं कुर्वन्तीनां मृगीदृशाम्। आकाशमम्बुजा कीर्णमासीत्पाणिविनर्तनैः।।

125.चिरंवारवधूलास्यनिर्विष्टनयनो हरिः। शनैरपाङ्गयामास सहस्रस्थूणमण्टपम्।।

126.मुक्तावितानललितं शनैरुपरिमण्टपम्। आरुरोह स रङ्गेशः केसरीवमहागिरिम्।।

127.प्रक्षाल्य चरणौ रङ्गी प्रफल्लकमलोपमौ। सायन्तनं विधिं चक्रे सर्वकर्मफलप्रदः।।

128.अब्जाच्छपीतवसनः साङ्गरागो बभौ हरिः। कल्हारदलसन्दर्भमालाशालिभुजान्तरः।।

129.रत्नकुण्डलकेयूरहारमात्रविभूषणः। अच्छोत्तरीयवानासीदधिकाह्लादको हरिः।।

130.कृतनीराजनविधिः कृताहारक्रियो हरिः। आचम्य हिततामबूलः सुखमास्त सुरोत्तमः।।

131.स हंसतूलिकाभोगं स कौसुम्भोत्तरच्छदम्। दन्तसिंहासनं दिव्यं दीप्तमध्यास्त देवराट्।।

132.तिरस्करणिकामग्रे बद्धां पट्टाम्बरैः कृताम्। अपसारितवान्कश्चित्तद्वापार[1]धुरन्धरः।।

133.दोधूयमानविमलप्रकीर्णकयुगानिलैः। ईषत्कम्पितकल्हारशेखरो निर्वृतो हरिः।।

134.प्रज्वलद्दीपिकाचक्रपुरःपार्श्वयुगोज्ज्वलम्। सिंहासनगतं देवं प्रणेमुस्सकलाः प्रजाः।।

135.पराङ्कुशमुनीन्द्रेण प्रणीतैर्द्रामिडैश्शुभैः। वेदैरप्रीणयन्देवं गायका गानरीतिभिः।।

[1]कश्चित्तव्द्यापार

136.सुस्निग्धमार्जनासङ्गमन्दश्रुतिसुखस्सम्म्। उदभून्मद्दलध्वानो ढक्काझल्लरिकास्वनैः।।

137.तालानुकूलमधुरं सर्वलोकमनोहरम्। नेपथ्ये यौवतं रम्यं गायति स्म ततश्शनैः।।

138.नृत्तारम्भे कृतोत्साहा निर्व्याजस्मितमन्धरा। नेपथ्यान्निरगात्काचित्कान्ताशैलूषशासनात्।।

139.सा हेमनिकषस्निग्धा श्यामा समपदस्थिता। आतिथ्यमद्भुतञ्चक्रे[1] समस्तजनचक्षुषाम्।।

140.पादाग्रद्वयसंलग्नक्षोणीविनतकन्धरा। आबद्धकुचकक्ष्या सा चिक्षेप कुसुमाञ्जलिम्।।

141.पुष्पाञ्जलिभिरत्यर्थं रङ्गमेव न केवलम्। अर्चयामास तन्वङ्गी तत्पतिञ्च रमासखम्।।

142.रङ्गेशस्याग्रतो रक्ता वल्गत्कुचमनोहरा। हस्तानुसारिनयना नृत्यति स्म निरङ्कुशम्।।

143.यतो हस्तस्ततस्तस्या दृष्टिरेव न केवलम्। पपात कमलायाश्च देव्या रङ्गेशेरपि।।

144.तालावसानसमये तस्थुषी सा तलोदरी। स्विद्यन्मुखी सभास्तारान्विवशानकरोत्तदा।।

145.तन्वङ्गी नीलनेपथ्या दन्या नीरङ्गमत्तदा। सौदामिनीव जलदात्तप्तजाम्बूनदप्रभा।।

146.नृत्यन्तीजनसन्तोषंचकाराभिनयैर्नवैः। अलास्तचक्रतुल्याभिःभ्रमराभिश्चभामिनी।।

147.स्वेदाम्बुमृष्टपाटीरतिलका श्लथकुन्तला। अन्तस्संभृतताम्बूला बाला तालावधौ बभौ।।

148.रूपमाद्यावतारस्य शैलूषाङ्गीकृतं हरिः। संवीक्ष्य कमलाचक्षुरपूर्ववदवैक्षत।।

149.वेषमादिवराहस्य विकटं सूत्रिणा दृतम्। दृष्ट्वा हरिप्रियां भूमिं सापहासमलोकयत्।।

150.नृसिंहभूमिकां दिव्यामास्थायातिविभीषणाम्। हिरण्यस्तम्भनेपथ्यान्निरगादुद्भटो नटः[2]।।

151.हिरण्यरूपकभृतन्नट[3]मूरौरणाङ्कणे। विन्यस्य ह्यवधीन्नाट्यविधिना नखरायुधैः।।

152.भरतौ नाट्यचतुरौ रामरावणरूपिणौ। धनुर्बाणधरौ वीरौ निर्जग्मतुरमर्षणौ।।

153.सामर्षमीक्षितो लक्षम्या रामवेषधरो नटः। जघानाभिनयेनाशु[4] नटं रावणरूपिणम्।।

154.प्रकृतो गोपवनितावसनस्तेयनाटके। प्रावेशिकीन्भ्रुवां[1] गीतं प्रभुर्भ्रूसंज्ञयारुणत्।।

[1]आतिथ्यमद्भुतंचक्रे

[2]नेपथ्यान्निरया (गा)दुद्भटोनटः

[3]भृतंनट

[4]जघामाभिनयेनाशु

155.अन्तरेण पटाक्षेपं नागाद्रौ निरगच्छताम्। लक्ष्मीनारायणौ भूत्वा विद्युद्धननिभौ नटौ।।

156.रङ्गस्थलगतौ रम्यौ तौ रमारङ्गनायकौ। आत्मनो रूपकाकारौ मुदा चिरमपश्यताम्।।

157.कुहनाकेसरीग्रीवानिर्घातनिनदोपमः। विपुलश्शङ्खनिर्घोषो[2] जजृम्भे यामसूचकः।।

158.अथ नृत्तावधौ शौरिराहूय निपुणान्नटान्। विभुर्व्यसर्जयद्दत्वा विविधं पारितोषिकम्।।

159.पराङ्कुशकृतान्दिव्यां सूक्तिमेव न केवलाम्। अङ्गीचकार पदयोस्तत्प्रणाममपीश्वरः।।

160.दिव्यैर्भोगावलीपाठैर्दीप्तैर्जयपदाङ्कितैः। मागधानां सहोदस्थादासनादिन्दिरासखः।।

161.दीपिकाचक्रवालेन गायता यौवतेन च। महतावाद्यघोषेण शौरिरन्तःपुरं ययौ।।

162.प्रथमे पौषमासस्य दिवसे कृतमज्जनः। हंसडोलोत्सवं द्रष्टुं निर्जगाम जगत्पतिः।।

163.साङ्गनारत्नसंदर्भां हंसडोलाङ्गनार्दनः। भ्राम्यमाणां रतिपतेरक्षमालामिवैक्षत।।

164.स्तम्भानामिव संकेतस्थानमास्थानमण्डपम्। सहस्रस्तम्भसंयुक्तं पुनः प्राप परःपुमान्।।

165.तत्र चामरमाणिक्यमुक्तासन्दर्भदर्पणैः। पूगीलिकुचनारङ्गफलैस्स्वर्णमयैरपि।।

166.रचिता वारयोषाभिश्चित्रा पवरकावलिः। मुहुरालोकयामास वासुदेवो रमासखः।।

167.जनेभ्यश्चनृपेभ्यश्च तददर्शनमात्मनः। आमध्याह्नं कमलया भूम्या साकमुवास सः।।

168.तस्मादुज्ज्वलवेषस्त्रीस्समस्तजनवन्दितः। सहदेव्या श्रिया भूम्या निश्चक्रामातिविक्रमः।।

169.हरिमौक्तिकरम्येण छत्रेणेव न केवलम्। पातङ्गं वारयामास तेजस्स्वेनापि तेजसा।।

170.आरुह्य शिबिकां रङ्गी गृहराजं विवेश सः। पश्चात्क्षीराब्धितनया देवी तदनुमेदिनी।।

171.प्राप्तेथ शैशिरे काले कुन्दसौरभमेदुरः। पवमानस्तत इतः प्रादुरासीत्सुशीतलः।।

172.कालागरुसमृद्धार्चिः कार्तस्वरहसन्तिका। अलञ्चक्रे पुरोभागं प्रभया रङ्गशायिनः।।

174.पारावतरवस्फायद्विटङ्केऽगरुधूपिते[3]। रङ्गी ददर्श सङ्गीतं सौम्यजामातृमण्डपे।।

175.रागार्द्रया श्रिया रङ्गी यद्यत्कर्माकरोत्तदा। लीलयैव कृतं तत्तन्नतु व्यसनसंविदा।।

---

[1]प्रावेशिकींध्रुवां

[2]निर्घोर्घो

[3]फायद्विटङ्केगरुधूपिते

176.मोहिताशेलोकस्य[1] बहुधैतद्विचेष्टितम्। रङ्गिणो भूषणं जातमन्येषान्तु विडम्बना।।

177.शयनितजगत्प्राणाहारप्रधानशिरोमणि-

प्रभवकिरणश्रेणीशोणीकृताङ्गसमुज्ज्वलः।

विहितविहृतिः पुण्ये धामोत्तमे प्रणवात्मके

जयति नियतं रङ्गी श्रीरङ्गनायिकया श्रिया।।

178.स्वाङ्गच्छायानिकायैश्शयनफणिफणारत्नसन्दोहजात-

ज्योतिर्जालैश्च वक्षस्सलिलनिधिसुता देहकान्तिप्ररोहैः।

कावेरीं भानुकन्यां कलयति मुरजित्तद्विहङ्गान्नथाङ्गां-

स्तद्वेलावृक्षषण्डं कनकमयमिवोद्दामकीर्तिः क्रमेण।।

179.आजानुप्रसृताङ्गुलीयकमणिश्रेणिप्रकाशाधिक-

स्फायत्पाणिफणान्वितः परिलसत्कालाभ्रकोटिच्छविः।

निद्राणस्यभुजाभुजङ्गमवरस्सन्दृश्यते रङ्गिणः

पादाम्भोजनखेन्दुबिम्बनिवहं रोषादगृह्णादिव।।

180.देवोयस्य भुजङ्गभोगशयनश्रीरङ्गराजो हरिः

तातःकाश्यपचक्रायविबुधो लक्ष्मीर्जनन्युत्तमा।

तस्यैवोत्तमनम्बिसत्तिरुमलाधीशः प्रबन्धुः कृतौ

लक्ष्मीकाव्य उदारवैभवनिधौ सर्गो द्वितीयो गतः।।

[1]मोहिताशेषलोकस्य

अथ तृतीयः सर्गः

1.अथ पन्नगसार्वभौमतल्पे रचयन्तं सहजागरेण निद्राम्।
मधुरैः किलमागधावचोभिः प्रणवस्यार्थमबोधयन्प्रभाते।।

2.तव रङ्गविभो मुखारविन्दप्रभया निर्जितकान्तिरेष चन्द्रः।
पतति व्यसनादिवाम्बुराशौ चरमे संकुचितप्रकाशराशिः।।

3.भवतोऽवसरः कदेति रङ्गिन्परिपृच्छन्निव दृश्यतेरुणोयम्।
अनुजं गरुडं ध्वजे निविष्टं वरदामोदरगोपुरस्य शृङ्गे।।

4.अमृतांशुसरोनिवासभाजः कलहंसप्रकरस्य नाद एषः।
विहरज्जलदेवताङ्घ्रिलोलां मणिमञ्जीरखश्रियन्दधाति[1]।।

5.विकसन्ति सरोरुहाणि निर्यद्भ्रमरारावमनोहराण्यमूनि।
शिखराणि च शाखिनां प्रबुद्धैः शकुनैर्मञ्जुनदद्भिराकुलानि।।

6.अमृतांशुसरोविनिद्रपद्मस्फुटसौरभ्यपरम्परासमेतः।
त्वदधिष्ठितमारुताशभीत्या किल मन्दञ्चरति प्रभातवायुः।।

7.विपुलाङ्कणदुह्यमानधेनुप्रकरक्षीररवैः प्रभातवेला।
प्रमदाजनमथ्यमानदध्ना ध्वनिभिश्चाद्य विशेषतो विभाति।।

8.अवधीरिततामचूडमुख्यद्विजसंघातरवेण निस्वनेन।
अहरागमसूचकोयमुच्चैश्श्रवसामुत्सवमातनोति शङ्खः।।

9.क्षणदापरिणामपाव्यदिव्यस्तुतिवाचालमुखाश्शुकाः प्रबुद्धाः।
मणिपञ्जरकोटरोपविष्टा विलसन्त्यद्य गृहेषु नागराणाम्।।

[1]खश्रियंदधाति

10.उदयाचलताम्रचूडचूडाकुमुदस्तोमविकासकालरात्रिः।

शतपत्रनिकायभागधेयं शनकैराक्रमते सहस्रभानुः।।

11.उदिते भुवनत्रयैकदीपे दिननाथे गृहदीपमण्डलानि।

नवधूपविजृम्भणापदेशान्मुखवैवर्ण्यमिवाद्य दर्शयन्ति।।

12.विवृतेषु विवस्वतः कराग्रैः शनकैः पत्रकवाटसंपुटेषु।

मुहुरुज्जिहते मधुव्रतानां मिथुनान्यम्बुजमन्दिरोदरेभ्यः।।

13.तव रङ्ग निधाननाभिपद्मं भुजगेन्द्रश्वसनानुषङ्गलोलम्।

उदयश्रवणादिवात्मबन्धोः सवितुः कम्पयते शिरः प्रमोदात्।।

14.सुदृशां कबरीषु हल्लकन्ति श्रवणाग्रेषु वतंसपल्लवन्ति।

अरुणाः पतिता रवेर्मयूखाः कुचकुम्भेषु तथैव कुङ्कुमन्ति।।

15.हरिचन्दनपङ्ककल्पिताभिः करवीरप्रसवैः कृतार्चनाभिः।

प्रतिमाभिरुपेतमुष्णभानोः पुलिनं संप्रति भाति सह्यजायाः।।

16.परिपाटलयत्यलं विवस्वान्प्रभया पल्लवताम्रया स्फुरन्त्या।

अपनीततमस्कमन्तरिक्षं त्वदुरःकौस्तुभवत्तमालनीलम्।।

17.मुकुलीकुरुते मुहुः कराग्रैः कुमुदस्तोममसौ सरोजबन्धुः।

अपि योजयति क्षपा विदूनान्प्रमदाभिः प्रणयान्विताञ्रथाङ्गान्।।

18.तव नाभिसरोजमन्यभानुद्युतिदुर्बोधमजस्यजन्मगेहम्।

परिबोधयतुं स्वयं विवस्वान्नियतं दक्षिणलोचनायमानः।।

19.अरुणेन रवेर्गवाक्षमार्गप्रसृतेनांशुसहस्रकेन लिप्तम्।

ललितैरिव कल्पितं प्रवालैः सदसि स्तम्भसहस्रमद्यभाति।।

20.विकचे नवसौरभाभिरामे कमले षट्पदमालिका विभाति।

वदने लिखितोर्ध्वपुण्ड्ररेखा तव कस्तूरिकयेव रङ्गधामन्।।

21.तव चन्दनमण्डपं गवाक्षप्रसृतापाटालभानुभानुयुक्तम्।

अधुना परिदृश्यते मुहूर्तं नवकौसुम्भनिचोलसंवृतं वा।।

22.इति कल्पितमञ्जुवाग्विलासैः सरलैर्वन्दिभिरार्यवेषयुक्तैः।

भुजगेश्वर[1]भोगतल्पशायी बुभुधे[2] पूर्णमनोरथो मुकुन्दः।।

23.दरविश्लथकुन्तलैरनङ्गी सुदृढा श्लेषविमृष्टचन्दनेन।

सहजारमनःपयोधिजाया वपुषा कामसहस्रकल्पकेन।।

24.प्रथमं प्रतिबुद्धवत्युदारैः सुखनिद्रावधिनिर्मलैरपाङ्गैः।

कलशाब्धिसुता पिकान्तवक्त्रा कमितारं स्ववशीचकार शौरिम्।।

25.हरिराशु विसृज्य वन्दिबृन्दं महिताम्भःकृतमङ्गलाभिषेकः।

अकरोदरविन्दलोचनश्रीः विहितं कर्म विभातकालयोग्यम्।।

26.कमलासचिवस्य रङ्गभर्तुः चरणौ सेवितुमम्बुजान्तरङ्गौ।

पुरशासनपाकशासनाभ्यां निजलोकान्निरगात्सरोजजन्मा।।

27.नवपल्लवरागशोभमानं सततं यस्य चतुष्टयं कराणाम्।

जनतारचनातिरेकजातं दृढलग्नं वहतीव शोणिमानम्।।

28.रसनान्तररङ्गलासिकाया निजपत्न्याश्चरणाब्जयोः प्रकीर्णा।

नखरश्मिपरम्परेव मन्दस्मितरश्मिर्वदनेषु यस्य भाति।।

29.वहति दृतशातकुम्भभासा वपुषा निर्मलमौक्तिकस्रजं यः।

श्रमवारिकणावलीमिवोच्चैः जनितां सृष्टिनिरन्तरप्रयासात्।।

30.हरितालतटित्समूहशोभा सदृशी यत्तनुरेधते समन्ताम्।

भवनीकृतकाञ्चनारविन्दस्थितिसंक्रान्तपरागरूषितेव।।

31.अतिभास्वरमिन्द्रनीलमुक्तामणिवैकक्ष्यकदाम यो बिभर्ति।

[1]भुगजेश्वर

[2]बुबुधे

नियतस्नपनादिवाङ्गलग्नं यमुनीजह्नुसुताम्बुबिन्दुजालम्। ।

32.परिपाटलचञ्चुकोटिचञ्चद्विसकाण्डं स तदा रुरोह हंसम्।

अरविन्दभवोतिदीर्घशुण्डास्फुरदैरावतविभ्रमं वहन्तम्। ।

33.वृषभं मणिमेखलाभिरामं कलधौताद्रिमिवान्यमुच्चशृङ्गम्।

शनकैरधिरूढवानुमायाः परिणेता तरुणामृतांशुचूडः। ।

34.त्रिदशाधिपतिर्विशालपार्श्वद्वितयोद्भासितचामराभिरामम्।

अचलेन्द्रमिवोरुपक्षयुग्मं कमलासोदरमारुरोह नागम्। ।

35.मुखतः करिणां सनाभिरङ्गैः मनुजानामितरैश्चविघ्नराजः।

पृथुगण्डगलन्मदाम्बुपुरैः अभिषिक्तं मुहुराखुमध्यरुक्षत्। ।

36.कमलावलिकान्तवक्त्रषट्कः सहितस्तट्टिवगुणैर्भुजैरुदग्रैः।

गिरिजातनयस्सुपर्वसैन्यप्रभुरारूढ शिखावलो बभूव। ।

37.कमलासनशासनेन सर्वे विबुधा विक्रमवैभवप्रशस्ताः।

सहजेन गुणेन वाहनानि स्फुरितान्यारुरुहुस्ततो यथा स्वम्। ।

38.अगमद्विधिचोदितोगणेशः पुरतोदन्तमयूखचन्द्रिकाभिः।

पृथुरङ्गपुरीप्रयाणविघ्नप्रबलध्वान्तनिवारणं वितन्वन्। ।

39.प्रथमं शतपत्रयोनिरुर्वीं पुरुहूतप्रमुखाः सुराः क्रमेण।

सहचारणसिद्धकिन्नरौघैः मुनिभिश्चावततार दिव्यलोकात्। ।

40.पुरशासनकार्मुकन्धरित्री विकचाम्भोरुहकर्णिकाविलासः।

कमलासनदृष्टिगोचरोभूत्कनकाद्रिः कमनीयरत्नसानुः। ।

41.गिरिजारमणस्य कीर्तिराशिः कलधौताद्रिरुदग्रवैभवेन।

समदृश्यत वेधसा भवानी पदविन्यासपवित्र सानुदेशः। ।

42.महतावतरन् पथा विरिञ्चः पुरुहूतोपवनं ददर्श रम्यम्।

नवसौरभशालिपुष्पजालैः तरुभिः पञ्चभिरञ्चितं वदान्यैः। ।

43.कलवाहनराजहंसनादश्रवणान्मुक्ततपःक्रियाविशेषाः।

त्रिदशक्रमवेदिकोपविष्टा मुनयस्तं विनयान्विताः प्रणेमुः।।

44.अमलच्छदराजमौपवाह्यं प्रसभञ्चोदयतोङ्घ्रिपार्ष्णिघातैः।

अभवद्द्रुहिणस्य रङ्गधात्रा त्वरितस्याक्षिपथे सुरस्रवन्ती।।

45.गरुडध्वजपादजन्मभूमिं गिरिजाजानिकिरीटजातिमालाम्।

सुमनस्तटिनीमपश्यदग्रे सुरनारीकृतमज्जनां विरीञ्चः।।

46.कनकाम्बुजसौरभैरलीनां विरुतैर्व्योमनदीतरङ्गवातैः।

शुचितामधुरत्वयोश्च सिध्द्या मुहुराह्लादयदिन्द्रियाणि धातुः।।

47.सुरलोकनदीजले च याता निजसुभ्रूतनुवल्लरीद्युतौ च।

प्रविभज्य निवेशिताष्टदृष्टिः प्रययौ तीरभुवं कवेरजायाः।।

48.वकुलामलकाम्रनालिकेरक्रमुकादिद्रुमषण्डमण्डितान्ताम्।

अवलोकयति स्म सह्यकन्यामरविन्दप्रभवः पयोधिपत्नीम्[1]।।

49.बहिरावरणं विशालतुङ्गं वरदामोदरगोपुरेन्द्रचिह्नम्।

प्रथमं स ददर्श पद्मजन्मा[2] पवनाधूतदुकूलकेतुमालम्।।

50.म्रुदुलास्तरणोपशोभमानादवरुह्याशु सरोजहंसवाहात्।

मणिगोपुरनायकोपकण्ठं विशदान्तः करणो जगामवेधाः।।

51.स्वपदाद्भुवमागतं विलोक्य द्रुहिणं द्वारगतं ततस्सुरौघैः।

गृहराजगताय रङ्गधाम्ने मृदुविज्ञापयति स्म दण्डनाथः।।

52.मुरशासनशासनाद्विरिञ्चं सकलं देवगणञ्च सैन्यनाथः।

क्रमशस्सकलान्तरायकूलप्रकराग्निस्तदुपान्तिकं निनाय।।

[1]पयोधिकन्याम्

[2]चित्तजन्मा

53.कमलासचिवस्सरोजनाभः करुणापूरितलोचनो विनीतम्।

अभियान्तमभङ्गुरप्रतापः शनकैरादिपितामहन्ददर्श[1]।

54.भक्त्यान्वितोथ भगवानरविन्दजन्मा चक्रेणभासिशतपत्रविलोचनाय।

रङ्गास्पदाय रमणीयगुणोत्तराय राकाशशाङ्कवदनाय रमासखाय।।

55.रङ्गेशपादयुगलीनखचक्रवालनिर्गच्छदच्छतररश्मिपरम्परासु।

सञ्जातदुग्धलहरीमतिरभ्रचारशान्त्या पपात विधिवाहनराजहंसः।।

56.पाद्येषु निर्जरपुरीतटिनीजलेषु क्लृप्तेषु तस्य सरसीरुहसंभवस्य।

रिक्तं कमण्डलुमपूरयदङ्घ्रियुग्मं भू__योर्नखमयूखजलप्रवाहैः।।

57.भक्तिप्रणामनियुतस्य शशाङ्कमौलेः हस्तारविन्दहरिणप्रतिमापदेशात्।

रङ्गेशनिर्मलपदाब्जनखेन्दुबिम्बश्रेणी क्षणं समुचिताङ्कवतीव रेजे।।

58.पादारविन्दयुगली पुरुषोत्तमस्य स्वच्छैर्नखेन्दुकिरणैरभितः प्रकीर्णैः।

दन्त्याननस्य नितरामिव वर्धयन्ती दन्तं विखण्डितमभात्प्रणतस्य भक्त्या।।

59.रङ्गेश्वरस्य जगतामधिपस्य शौरेः पादारविन्दनखचक्रमयूखमालाः।

आपूर्णपीनबिसविभ्रममानतस्य जम्भद्रुहो विपुलनेत्रसरोरुहाणाम्।।

60.रम्यन्तपो[2]धनमनस्तिमिरार्कबिम्बं वन्दारुभक्तजनचित्तसरस्सरोजम्।

शश्वत्प्रणेमुरमराश्शतपत्रनाभेः प्राचीनवाग्विटपिपल्लवमङ्घ्रियुग्मम्।।

61.रेजे चतुर्वदनता सफला विधातुरप्रीणयद्यदधिकं कमलासहायम्।

पद्मप्रभैर्युगपदेव मुखैस्स्वकीयैः उच्चारयन्ननुपमांश्चतुरश्चवेदान्।।

62.नवं रङ्गेशस्य स्मरशतसहस्रैकजनकं विलासानां पात्रं जलनिधिसुतामानसहरम्।

विलोक्याग्र्यं रूपं मधुरतरमापादमकुटं प्रवृद्धोभूद्धाता पुनरपि मुदा स्तोतुमधिकम्।।

63.स्तोतुं वाग्भिः प्रवृत्ते हरिमनघगुणं रङ्गराजं विरिञ्चे

[1]महंददर्श

[2]रम्यंतपो

मुक्तासोपानकोटिप्रचलदनमिषामिन्दुवापीं प्रसन्नाम्।

वैरिञ्चो राजहंसस्त्रिपुरविजयिनश्शाङ्करस्कन्दबर्हि-

र्माहेन्द्रो वारणेन्द्रः पितृपतिमहिषश्चागमन् दिव्यनार्यः।।

64.देवो यस्य भुजङ्गभोगशयनश्श्रीरङ्गराजो हरिः

तातः काश्यपचक्रवर्तिविबुधो लक्ष्मीर्जनन्युत्तमा।

तस्यैवोत्तमनम्बिसत्तिरुमलाधीशप्रबन्धुः कृतौ

लक्ष्मीकाव्य उदारवैभवनिधौ सर्गस्तृतीयो गतः[1]।।

अथ चतुर्थस्सर्गः

1.गुणावलिं स्तोतुमुदारवैभवामहं न दक्षोस्मि तथापि सांप्रतम्।

मुखप्रसादस्तव रङ्गराज मामतीव वाचालयति प्रतिक्षणम्।।

2.श्रियःपतेरङ्गनिवासकामदन्दि[2]वालयानोकहपल्लवोपमम्।

द्युसिन्धुपद्मद्युतिपश्यतोहरं करोतु मह्यं कुशलं पदद्वयम्।।

3.त्वदीयमुद्दामगुणेन्दिरासखस्वभावतः पाटलमङ्घ्रिपल्लवम्।

शिलानिधानादहिमौलिमर्दनादपि स्फुटारुण्यमिवेक्ष्यते जनैः।।

4.परार्ध्यमाणिक्यकिरीटजन्मभिः मयूखजालैर्नमतां दिवौकसाम्।

स यावकश्रीरिव दृश्यते हरे नखावलीयं तव पादपद्मयोः।।

5.तदेतदद्यावयवान्तरादरं पदद्वयं यन्नखरद्युतिच्छलात्।

यशास्ततिं दर्शयतीव ते मुहुः नतेप्सितार्थप्रतिपादनोद्भवाम्।।

6.जगत्पते ते चरणारविन्दयोः प्रसर्पिभिस्स्निग्धनखप्रभाभरैः।

दिवापि वज्रायुधपालिता हरित्स चन्द्रिकापङ्क्तिरिव प्रकाशते।।

[1]योगमत् (मत् change to तः)

[2]कामदंदिवा

7.मुकुन्दरक्ताङ्घ्रितलावभासितं दधाति जङ्घायुगमम्बुदप्रभम्।

अनर्धरत्नाकलितास्य विस्फुरन्महेन्द्रनीलाश्मकलाचिकाश्रियम्।।

8.सुवृत्तमूर्वोर्युगलं विभाति ते हिरण्यदैत्याधिपसूदनस्थलम्।

तथोर्वशीजन्मगृहं पयोधिजाविहारभद्रासनमम्बुजेक्षणम्।।

9.अजस्त्रगुल्फप्रविलम्बिकाञ्चनप्रभाम्बरन्ते युगमूरुकाण्डयोः।

गरुत्मदंसस्थितिलब्धतद्वपुः प्रभाचयालेपमिवेश भासते।।

10.लगन्त एते नियतं रमापते परिस्फुटेनाभिसरोरुहे तव।

विभाति हंसा निभृता इवांशवः समौक्तिकात्सारसनादुदञ्चिताः।।

11.इयं भवन्मूर्तिमयूखमण्डली समश्नुवानासकलं गृहाङ्गणम्।

विजृम्भिता नाभिसरोरुहेर्ष्यया नवेवनीलोत्पलकाननावलिः।।

12.शिलाविशाले भवतोभुजान्तरे परिस्फुरत्कौस्तुभरोचिरङ्कुरम्।

बिभर्ति नित्यं प्रणयधा___हतिप्रलीनलक्ष्मीपदयावकश्रियम्।।

13.तटिल्लता चम्पकसन्निभप्रभां वहस्यहो मङ्गलमूलदेवताम्।

सुवर्णमालामिववैजयन्तिका सखीं स्फुरत्कौस्तुभवर्चसोरसा।।

14.सपल्लवारत्नमयोर्मिकांशुभिः प्रसूनवन्तो विमलैर्नखांशुभिः।

करास्तवेच्छाफलदायिनो हरे विभान्ति भूयो विबुधद्रुमा इव।।

15.पयःपयोधेर्मथनेन पाणयस्त्रिलोकमानेन तथाङ्घ्रिपल्लवौ।

भवन्ति[1] शोणास्तव[2] देव कारणं किमत्र रागस्य तु दन्तवाससि।।

16.हरे तवाकर्णविशाललोचनद्वयोपमापात्रतयादिवानिशम्।

अवेक्षमाणास्फुटमम्बुजद्वयं रमाकराभ्यामुपलालयत्यहो।।

17.सुगन्धिनीलालकराजिराजितं तवेदमङ्गीकुरुते मुखं हरे।

[1]भवन्तु

[2] Emended, original version शोणोस्तव

मरन्दपानस्तिमितालिमण्डली समुल्लसत्तामरसाभिरामताम्।।

18.सुगन्धिकस्तूरिकया प्रकल्पितस्तवोर्ध्वपुण्ड्रो वदने विराजते।

प्रभातकालस्फुरिते सरोरुहे लगन्नलीनामिव[1] मौनवान्गणः।।

19.सकौस्तुभश्रेणि[2]तवोर्ध्वपुण्ड्रवद्दरस्मिताङ्कूरमुदारवीक्षणम्।

शरत्प्रसन्नेन्दुसमानमाननं हरे कृतार्थी कुरुते दृशौ मम।।

20.इतस्ततश्शार्ङ्गधरप्रसारिभिः किरीटरत्नप्रभवैर्मरीचिभिः।

अकाण्डसन्ध्याकिरणैरिवावृतं नभोन्तरालं परिदृश्यतेऽधुना।।

21.उरस्स्थलीहल्लकमालतीस्रजां मनोहराणां घनसौरभोदयैः।

मुहुर्मुहुर्घ्राणमतीव तर्पयत्युदारमेतद्वपुरिन्दिरायते।।

22.ललाटकस्तूरिकया मनोज्ञया दृगञ्चलोद्यदयायाङ्गशोभया।

उरस्स्थलक्ष्म्याप्युरगेन्द्रशायिनः तवाद्य रूपं स्वदते नवं नवम्।।

23.सरोजवक्राङ्कुशकेतुलाञ्छनामिमामनासाद्य पदद्वयीं हरे।

किमेति सर्वं परमं पदं जनो दृशं विना किं खलुदृश्यमीक्ष्यते।।

24.अघानि दूरीकुरुते चिरन्तनान्यनुत्तमां वर्धयती श्रियं स्थिराम्।

प्रतापमारोपयति प्रतिक्षणं सकृत्त्वदीयाङ्घ्रिसरोजवन्दनम्।।

25.प्रकाममन्याम्बुधिराजशङ्कया सरोवरे शीतकराह्वये पृथौ[3]।

जलं समादातुमिवागतो घनस्त्वमिन्द्रनीलोत्पलकान्तिरेधसे।।

26.गृहीतनाभीनलिनाग्र्यसौरभस्तवोद्गतश्चामरमारुताङ्कुरः।

पदाम्बुजक्षालनवारिशीतलः कलेबरम्मे कुरुते सुखोत्तरम्।।

27.जगत्सृजेचम्पकहल्लकस्रजे जयैषिणे दानवजीवमोषिणे।

[1]लगन्नळीनामिव

[2]कुन्दळश्रेणि

[3] पृथौ ??

किरीटिने भक्तरुजावपाटिने नमोस्तु तुभ्यं भुजगेन्द्रशायिने।।

28.विजृम्भमाणे गजराजबृंहिते जवात्तवारूढगरुत्मतो हरे।

बभूव यश्शङ्खरवो विनिर्गमे जये प्रवेशे च स एव शुश्रुवे।।

29.इति प्रभोस्तस्य रमापतेर्विधिः शरीरमापादकीरीटमुज्ज्वलम्।

दिवौकसां दृष्टिरसायनं शनैरवर्णयद्दिव्यविभूषणाञ्चितम्।।

30.मुदाप्रणीतेन सरोजजन्मना मनोहरार्थोन्नतिशालिनामुना।

स्तुतिप्रबन्धेन ननन्द नन्दकीभुजङ्गमुक्तामणिमञ्चमाश्रितः।।

31.अथौषसाम्भोरुहकान्तिमोषिणा मुखेन मुग्धस्मितशालिना हरिः।

प्रहर्षयन्स्वागतसंप्रयोगतः परं तदापृच्छदनामयं विधिम्।।

32.अथ प्रसादातिशयस्य सूचकं वचो हरेस्तत्स[1] निशम्यपद्मभूः।

भवत्कृपापात्रतया कुशल्यहं सुरैरमीभिस्समभित्युवाच तम्।।

33.पुनश्च पृष्टस्स निमित्तमागतेः परेणपुंसा प्रथमो मनीषिणाम्।

मुखैश्चतुर्भिः पुनरुक्तिमेदुरं विधिर्वचो विश्वजनीनमाददे।

34.जगद्धिताय प्रणवोदरे हरे वितन्वतस्सुप्तिमवाप्तजागराम्।

तवाङ्घ्रिपङ्केरुहसेवनात्परं किमस्ति मे कारणमागतेः प्रभो।।

35.त्वदाज्ञया सृष्टमिदं जगन्मया त्वदीय यात्रोत्सवपुण्यलाभतः।

अपास्ततापत्रयमस्त्वितिति प्रभो निवेदनञ्चापरमानुषङ्गिकम्।।

36.ततो जगन्मङ्गलहेतवे हरे शुभे दिने मासि च फाल्गुनेऽधुना[2]।

त्वया ध्वजारोहणपूर्वमुत्सवः प्रवर्त्यतां वर्धितवाद्यनिस्वनः।।

37. कदाचिदारामविहारकौतुकात्कदा[3]चिदास्थानसुखासिकारसात्।

[1]हरेस्तस्य

[2]फाल्गुनेधुना

[3]कौतुकाकदा

कदाचिदाखेट___मात्करोतु लोकस्य दृगुत्सवं भवान्।।

38.हरे त्वमारुह्य तुरङ्गपक्षिराट् गणाधि[1]पांस्तत्पतिचङ्क्रमोत्थितैः।

रजोभिरुद्दामतुषारनिर्मलैः विशोधय व्योमतलञ्च भूतलम्।।

39.रहस्यमन्यञ्च रमापतेद्भुतं निबोध विज्ञापनया ममाधुना।

अवाप्य ते यस्य विकासतस्त्वया पुनस्तृतीया पुरुषार्थवासना।।

40.यथाभृगुः प्राक्कलशार्णवो यथा सकर्दमश्चापि यथा तथा श्रियम्।

सुतामवाप्याच्युतमेव संयुजं प्रपत्स्य इत्याप तपांसि चोलराट्।।

41.तपस्यया तस्य परं प्रपेदुषी दयापतिं मङ्गलदेवता तदा।

अमुष्य कन्या त्वमुपेयुषी चिरादलङ्करोत्यन्वयमंशुमालिनः।।

42.त्वदीयवक्षःकमलांशुसंभवा मुकुन्दसैषा मुखनिर्जिताम्बुजा।

नृपस्य वासे निचुलापुरेशितुः[2] दिने दिने चन्द्रकलेव वर्धते।।

43.करस्थितोद्भासिसरोजलक्ष्मणासुवर्णदेहप्रभया मनोज्ञया।

नृपस्स तस्या निचुलापुरेश्वरश्चकार लक्ष्मीरिति नाम सत्वभूः।।

44.उदारपत्रावलिचारुमुन्नमत्पयोधरोद्भासितकान्तिसंपदम्।

विनम्रमध्यान्नृपतिर्निर्जां सुतां जुहाव हर्षान्निचुलालतेति ताम्।।

45.सुवर्णचूर्णैः विहि[3]तानुचम्पकप्रसूनधूलीनिवहैर्नु कल्पितम्।

तटिद्गुणैस्संघटितानुरोचना लवैर्नु कृप्ता निचुलेन्द्रनन्दिनी।।

46.नृपात्मजा त्वद्वपुरुज्वलालका त्वदीय वामेक्षणसन्निभानना।

त्वदंशुका पिङ्गलदेहवल्लरी विभाति सा त्वत्पदतुल्यमध्यमा।।

47.तदूरुना[4]भीपुटकण्ठलोचनभ्रुवस्त्वदाह्लदचमत्क्रियोर्जिताः।

[1]खगाधि
[2]पुरीशितुः
[3]सुवर्णचूर्णैर्विहि

[4]त्वदूरुना

तव त्रिलोकीतिलकाङ्कुरप्रभो समुद्वहन्त्यायुधपञ्चकश्रियम्।।

48.अनुग्रहादायतिशालिनेत्रयोर्वतंसवाञ्छा श्रवसोर्न सुभ्रुवः।

उपाश्रयादोष्ठरुचेश्च रोचकान्नकुङ्कुमेच्छा कुचकुम्भयोर्विभो।।

49.अगण्यलावण्यमहापगापयः प्रवाहशैवालपरम्परायिता।

नवावलग्नाम्बरमेघमालिका विराजते रोमलता मृगीदृशः।।

50.तदाननं शारदपूर्णचन्द्रमस्सहस्रनिष्यन्दितदीक्षणाञ्चलम्।

अनेकपङ्केरुहवर्षि तद्वपुस्तटिद्गुणोद्गारि विभाव्यतेऽधुना।।

51.समुज्ज्वलाया नवयौवनश्रिया तनूद्भवाया निचुलापुरेशितुः।

सुलक्षणं पाणिसरोरुहत्वया प्रगृह्यतां रङ्गधुरीण सत्वरम्।।

52.सुदुर्गनीलीवनमध्यमाशितो मुनीन्द्रहिंसाविधिशिक्षितोऽनिशम्।

तरक्षुदैत्यस्सहितस्ससैनिकैः त्वयैव वध्यो मृगयापदेशतः।।

53.अथाब्जयोनेः प्रतिगृह्य[1] तद्वयो जगद्धितं रङ्गपतिः प्रसेदिवान्।

दृढं प्रतिज्ञाय तथेति सस्मितं व्यसर्जयत्तं विबुधैस्समं विभुः।।

54.मरुद्वृधा वेणियुगान्तरोल्लसन्महान्तरीपान्तरमङ्गलालयम्।

प्रदक्षिणीकृत्य सरोजसंभवः प्रयाणसेवाञ्जलिमाबबन्ध सः।।

55.इहान्तरे तीक्ष्णरुचिर्गभस्तिमान् अलङ्करोत्यम्बरमध्यमित्यरम्।

ननाद मध्याह्नदरो महत्तरः स नाडिकाच्छेदनटद्दरिध्वनिः।।

56.ततो मुकुन्दस्य कृपातरङ्गिताद्विलोकनाद्धस्तसमस्तकल्मषः।

अवाप्य पाथेयमनुग्रहं हरेः विमानराजान्निरगाद्विधिस्सुरैः।।

57.अशोकपुन्नागरसालवल्लरीतमालमन्दारसमुल्लसत्तटम्।

ददर्श चन्द्राख्यमसौ जलाशयं प्रयाणकालीनपरिक्रमे विधिः।।

[1]परिगृह्य

58.अयं न पीतः खलु कुम्भजन्मना न लङ्घितो गन्धवहस्य सूनुना।

न निर्जरौघैर्मथितश्च यत्पुरा तदम्बुराशेरधिकस्समेधते।।

59.नभश्रियो विभ्रमदर्पणं नवं क्षितेश्च मुक्तामणिभूषणं शुभम्।

प्रचेतसोन्तःपुरमण्डपं वरं महापगानां विहृतिस्थलं महत्।।

60. शिरीषसप्तच्छदचूतपाटलीप्रियालकङ्केलिकदम्बकादिभिः।

अनोकहैरर्धविनिद्रकोरकप्रभूतगन्धान्धितषट्पदैर्वृतम्।।

61.निजौपना ह्योत्तमचञ्चुखण्डितप्रफुल्लराजीवबिसाङ्कुरं क्वचित्।

मदान्धमाहेश्वरशाक्करोल्लसद्विषाणकोणाहतरोधसं क्वचित्।।

62.निमज्जदैरावतकुम्भमण्डलीविशीर्णसिन्दूरविपाटला क्वचित्।

कुमारकेकिप्रवरार्धचर्वितस्फुरन्महाव्यालविभीषणं क्वचित्।।

63.करालवैवस्वतकासरोल्लसद्विषाणसन्ताडितपाथसं क्वचित्।

जवि प्रचेतोमकरानुधावनप्रकामसंत्रस्तझषाकुलं क्वचित्।।

64.पुरन्दरान्तःपुरसुन्दरीकचप्रकीर्णमन्दारपरिष्कृतं क्वचित्।

कृतान्तशुद्धान्तकृशोदरीचलत्करद्वयास्फालनशब्दितं क्वचित्।।

65.जलेशकान्ताजननाभिमण्डलीनिकामगण्डूषितपाथसं क्वचित्।

कुबेरशुद्धान्तकुरङ्गलोचनाकुचस्थलीकुङ्कुमरञ्जितं क्वचित्।।

66.दिवापिसन्दर्शितरात्रिविभ्रमैस्समग्रपर्णैः पीहितार्कभानुभिः।

निरन्तरैर्बालतमालपादपैः सदान्धकारीकृततीरभूतलम्।।

67.शरारुसत्वप्रतिपन्नशा---ना विधूततापत्रयवेगसंपदा।

मुनेर्महाभारतकर्तुरुल्लसच्छ्रिया श्रमेणाञ्चित तीरकाननम्।।

68.तपोवनेनाखिल वेदनिस्वनप्रकाशिना व्यासनिवासचारुणा।

समस्तवेदार्थविचारधूर्वहद्विजोत्तमेनाप्युपगूढरोधसम्[1]।।

69.सरोजसौगन्धिककैरवोत्पलप्रभाचयैस्सृष्टमहेन्द्रकार्मुकम्।

हरेर्विहारोचितमम्भसानिधिं विलोक्य तं विस्मयमापपद्मभूः।।

70.समीपभाजस्सकलोदकेशितुः प्रचेतसः पाणिमुदारचेतसः।

विधिर्गृहीत्वावततार तं शनैः सुवर्णसोपानपथेन सादरम्।।

71.सरोवरस्यास्य शुभेनपाथसा विधाय माध्याह्निककर्म पद्मभूः।

तटं स गारुत्मतकुट्टिमद्युतिप्रसिद्धदूर्वं पुनरारुरोह च।।

72.पदानि गत्वा कतिचिद्विरिञ्चनः सुरैस्सुधादीधितिशेखरादिभिः।

अपश्यदाह्लादनमालयोत्तमं श्रियस्सुवर्णाद्रिसमानगोपुरम्।।

73.सुखोपविष्टां प्रतिपन्नयौवनामपि त्रिलोकीजननीं हरिप्रियाम्।

चतुर्भुजां चन्द्रसुधासहोदरीं प्रणम्य तुष्टाव स तत्र भक्तितः।।

74.मनोहरे मङ्गलमूलदेवते रमे हरेर्भामिनि रङ्गनायिके।

तवार्भकं पालय मां प्रसेदुषी कटाक्ष्यभङ्ग्या[2] करुणान्तरङ्गया।।

75.जगत्त्रयीपालनजागरूकया हरिस्स्ववृत्या स्वयमक्षतोरणे।

निहन्ति दैत्यानितियत्सकेवलं तवाग्रभूषा महिमैव शोभने।।

76.यथा यथा स्थावरजङ्गमात्मकं हरिर्वपुः स्वीकुरुते स्वलीलया।

तथा तथा तस्य सदानुवर्तने तवैव मातः परमस्तिपाटवम्।।

77.इति स्तुतिं तस्य निशम्य वेधसः प्रपत्तिभाजः प्रकृताञ्जलेः पुनः।

मुदःपरां कोटिमवाप देवता मुकुन्दवक्षस्स्थलमङ्गलालया।।

[1]सौहृदम्

[2]कटाक्षभङ्ग्या

78.विशालया सान्द्रसुधारसार्द्रया सरोजनीलोत्पलसोदरश्रिया।

कृतार्थया मासदृशा मुहुर्मुहुः सरस्वतीवल्लभमुल्लसन्मुदम्।।

79.अनुग्रहं तत्कृतमुत्तमाङ्गतो वहन्नयं प्रीतमनाः[1] पितामहः।

मनोहरान्मङ्गलदेवतागृहान्महेश्वराद्यैर्निरगात्समं सुरैः।।

80.उदङ्मुखीमुज्ज्वलगोपुरस्थितां ननाम सोयं प्रतियातनां हरेः।

खरैर्हिरण्यस्य वपुर्नखाङ्कुरैः विपाटयन्तीन्नवके[2]तकीमिव।।

81.इयं हि कीर्तिर्मधुकैटभद्विषः सुरारिसुभ्रूजनकेलिमोषिणी।

इतीरयन्वीक्ष्य वलद्विषो मुखं ततस्सरोदक्षिणरोधसा ययौ।।

82.महामणिस्तम्भसहस्रसंयुतं महार्हवैडूर्यविटङ्कशोभितम्।

मनोहरं मण्डपमूर्जितं पुरो विलोक्य विस्मेरमना बभूव सः।।

83.कवेरजायाः कलहंसनादिनीमपामवाचीमतिलङ्घवेणिकाम्।

उदङ्मुखस्सन्पुनरोङ्कियात्मनो विमानराजस्य बबन्ध सोञ्जलिम्।।

84.अथायमारुह्य मरालपुङ्गवं हिरण्यगर्भोगमदात्मनः पदम्।

यथास्वमारूढमहार्हवाहनैः त्रिलोचनाद्यैस्त्रिदशैस्सहोन्मनाः।।

85.गते तस्मिन्वेघस्यतिनिभृतगीर्वाणसहिते कृतस्नानो रङ्गी कृतविविधमाध्याह्निकविधिः।

पटीरालिप्ताङ्गः परिकलितसौगन्धिकशिराश्चकाराहारे सौतिमुदधिराजन्यसुतया।।

86.उपस्पृश्य श्रीमानुरगपतिभोगासनगतः[3] प्रकुर्वंस्ताम्बूले परिचयमुदारस्मितमुखः।

हरिर्विश्वक्सेनं सविधगतमाह स्फुटतरं कुरु त्वं यन्नन्नः[1] कुतुककृतयात्रोत्सव इति।।

[1]प्रतिमहाः

[2]विपाटयन्तींनवके

[3]श्रीमानुरगपतिभोगोसनगतः

87.विश्वक्सेनस्सर्वलोकैकशासी कृत्वामौलौ शासनं रङ्गभर्तुः।

ये निर्दिष्टा मङ्गलेस्मिन्पदार्था भौमान्दिव्यास्तान्क्षणात्संबभार।।

88.प्रासादापणवीथिकामणिगृहालङ्कारकर्माकुल-

स्त्रीबालस्थविरेषु केषुचिदपक्रान्तेष्वहस्स्वादरात्।

मासे फाल्गुननाम्नि चूतकलिकोत्तंसे भरण्यां कृतो

नानाधान्यवराङ्कुरार्पणविधिर्देवोत्सवार्थं तदा।।

89.यामिन्यां कृत्तिकायां यमनियमपरैः ब्राह्मणैः कारयित्वा

होमानुच्चावचानप्युपरचितबलिं वैनतेयप्रतिष्ठाम्।

प्रत्यूहानां प्रभेत्ता करिवदनजगत्सेनसिंहास्यमुख्यै-

स्सेनानीः पारिषद्यैः निजपतिनगरी शोधनाय प्रतस्थे।।

90.वीथीं वीथीं गतस्सन्विरचितललितामोदपुष्पोपहारा-

ण्ढक्काभेरीमृगाङ्गध्वनिमुखरितदिक्कक्रवालस्स वेत्रः।

पश्यन्पश्यन्स दीपान्मणिगृहनिकराहेमकुम्भाग्रकोटी

प्रासादाग्र्यान्स्वकीयं पुरमयमविशद्धाम सो मानतश्रीः।।

91.देवो यस्य भुजङ्गभोगशयनः श्रीरङ्गराजो हरिः

तातःकाश्यपचक्रायविबुधो लक्ष्मीर्जनन्युत्तमा।

तस्यैवोत्तमनम्बिसत्तिरुमलाधीशप्रबन्धुःकृतौ

लक्ष्मीकाव्य उदारवैभवनिधौ सर्गश्चतुर्थो गतः।।

---

[1]कुरुत्वंयत्नंनः

अथ पञ्चमस्सर्गः

1.रोहिण्यामथ रत्नरोहणाद्रिः[1] प्रत्यूषे शुभतरलग्नभाजि रङ्गी।
आरब्धुं विधिमतमुत्सवम्महान्तं निर्यातः प्रणवविवर्ततो विमानात्।।

2.उद्दिश्य त्रिजगदधीश्वरं मुकुन्दं निर्यातं जयविजयाह्वयौ पुरस्तात्।
द्वारेशौ द्रुततपनीयदण्डगर्भं व्यानम्रौ विदधतुरञ्जलिं विनीतौ।।

3. तौ देवः प्रथमगुणौ निवर्त्यतैस्तैः भूपालैरिशरसिकृताञ्जलिप्रबन्धैः।
आयातैस्त्वरितमसेव्यताधिपार्श्वं नागेन्द्रैरिव समदैरुदस्तशुण्डैः।।

4.अन्नानामधिपतिरिन्दुमण्डलस्थो यत्रास्ते दधिकबलं करे दधानः।
आस्थानं तदगमदुच्चरत्प्रतिश्रुद्विन्यासद्विगुणितमन्द्रवाद्यघोषम्।।

5.तत्रस्थं द्रुतनवकाञ्चनोपकॢप्तं पञ्चास्यप्रतिकृतिपादमानसः।
अध्यास्तोत्पलदलमेचकाङ्गकान्तिः जीमूतो नव इव रत्नसानुशृङ्गम्।।

6.माहेन्द्रोपलकटकं महार्हमुक्ताकोटीरम्मणिमयकुण्डलाभिरामम्।
माणिक्यत्रिसरमुदारतारहारं तत्रस्थं मनुजरिपुं नृपाः प्रणेमुः।।

7.अच्छाछैर्नवतपनीयकुम्भनीतैः कावेर्याः कमलसुगन्धिभिः पयोभिः।
प्रक्षाल्य प्रकृतिशुचिः पदारविन्दे विश्वेशो विधिमकरोद्विभातयोग्यम्।।

8.आहारं पनसरसालराजरम्भानिष्पन्नैस्तदनुफलैर्निकामरुच्यम्।
स्वीचक्रे घृतगुलसूपशर्कराढ्यं ताम्बूलन्नवघनसारवच्च रङ्गी।।

9.अव्याजस्मितमधुराननारविन्दः कस्तूरिकलितनवोर्ध्वपुण्ड्रकान्तः।
रङ्गेशो लसदभिनीतिलासिकीनां सङ्गीतं सरसमनुक्षणं ददर्श।।

[1]गुणरत्नरोहणाद्रिः

10.लास्यन्तल्लुलितमपाङ्गयत्यनन्ते क्षेमाय ध्वजमणिदण्डमङ्गभाजाम्।

विस्तीर्णो विलिखितवैनतेयमूर्तिः प्रत्यग्रः कनकपटस्समारुरोह।।

11.आरूढे गरुडपटे समग्रशक्तौ मार्तण्डे व्रजति च वासरस्य मध्यम्।

सूतानाञ्जय[1]विजयीभवेतिवादैः आस्तानात्सगुणनिधिश्शनैरुदस्थात्।।

12.रङ्गेशे चलति जगद्धुरन्धराणां भूपानां गमननमस्क्रियाकुलानाम्।

अन्योन्याभरणविघट्टनप्रसूतैराकाशं कनकरजोभिरापुपूरे।।

13.लोलम्बाः परिचलतां ससौरभेभ्यः केशेभ्यो मुहुरुदगुर्वधूजनानाम्।

पादेभ्यस्स्फुटतरपद्मपाटलेभ्यो मञ्जीरध्वनिरपि तत्क्षणं जजृम्भे।।

14.आरूढद्विरदवरांश्च यन्तृमुख्यान् उत्सृज्य क्षितिपतिमण्डलञ्च देवम्।

गीतानि प्रसृतिदृशां नवानि शृण्वन्प्राविक्षन्मणिपरिकर्ममन्दिरं सः।।

15.आनीलद्युतिवियदातपत्रमध्ये मार्तण्डो[2] मणिमकुटश्रियन्दधानः।

अत्युष्णैरनुदिशमाततैः कराग्रैः अङ्गारान्व्याकिरं दिवति[3] दुर्निरीक्ष्यः।।

16.लोलम्बावलिरिभराजगण्डमुद्यद्दानाम्बुस्तबकितमर्कतापखिन्ना।

प्रच्छायं कलखपङ्क्तिरप्यवाप प्रासादस्फटिकविटङ्कनीडचक्रम्।।

17.अत्युच्चैर्मणिमयगोपुरांशुशोणं दृष्टाप्तं दिनकरमम्बरस्य मध्यम्।

संघातश्शशिसरसि[4]रथाङ्गनाम्नां संमोहाद्युगपदवाप शोकहर्षौ।।

18.कान्तानां कुचशिखरेषु मन्दिराणां गर्भेष्वप्यतिजडिमाश्रयेष्वभीक्ष्णम्।

पाटीरद्रवपरिपाण्डरेषु तापं पातङ्गन्तरुणजनः परं निरासे।।

19.उत्तानीकृतपरिकुञ्चिताग्रशुण्डानिष्ठयूतैर्वमथुभिरेवनिर्विरामैः।

[1]सूतानांजय

[2]मार्ताण्डो

[3]अङ्गारान्व्यकिरदिवाति

[4]शशिसरसी

आत्मानं सततमसिञ्चताञ्जनाभो वेतण्डः कम्रितरातपार्तिलोलम्। ।

20.कावेरीतटभुविराजनालिकेरीवाटीषु स्फुटकदलीवनान्तरेषु।

माकन्दद्रुमविपिनेषु च प्रजाभिः वासेभूदुपरचितस्तदातपार्त्या। ।

21.कङ्केलीक्रमुकरसालसालमध्य[1]प्रस्फूर्जत्पटमयमन्दिरोदरेषु।

आसीनाः परमरमन्त भूमिपालाः तन्वीभिस्सरसपटीरचर्चिताभिः। ।

22.अग्रेग्रे प्रहतसुवर्णडिण्डिमानामाक्षित्पायतकुथशङ्खकेतनानाम्।

नागानामपि ततिरापसह्यकन्यां निर्वाणं परमधिगन्तुमुन्मदानाम्। ।

23.कावेरी स्वपयसिमज्जतां गजानां सिन्दूरन्तरलतरैस्तरङ्गहस्तैः।

आच्छिद्यस्वयमधिमस्तकं विलग्नैस्तत्कान्तिं कमलरजोभरैर्वितेने। ।

24.रङ्गेशोत्सवकृततोरणङ्कवीथीसेकार्थोदकशमितातपाभिषङ्गे।

सायाह्ने चरममहीध्रशृङ्गलम्बी बिम्बश्रीर्द्यु[2]मणि दृश्यत प्रजाभिः। ।

25.सन्तापं विरहजुषां रथाङ्गनाम्नां न्यस्येवप्रबलरुजेषुमानसेषु।

स्वीकृत्य स्वयमिवरागमङ्गिनीनां संजज्ञे जडमरुणञ्चभानुबिम्बम्। ।

26.आकीर्णैरभिनवयावकोपमानैरालोकैर्घृसुणरसैरिवार्कबिम्बम्।

अस्ताद्रिस्थितमतिपाण्डरप्रकाशान्प्रासादानपि परिपाटलांश्चकार। ।

27.सर्वत्राप्रतिहतदुस्सहप्रतापो रामान्तः करणसुखोपपादनाय।

आकाशं विपुलमलङ्घयत्पतङ्गः पाथोधिं प्रसभमिवानिलस्य सूनुः। ।

28.प्रासादस्फटिकगवाक्षमण्डलेभ्यो निर्गच्छन्नगरुसमृद्धधूपराशिः[3]।

आलीनो दिवसभयान्नितम्बनीनां केशेषु स्फुटमिव सायमन्धकारः। ।

29.कर्णान्तेष्वसितदृशां नवोत्पलाभां शोणीषु प्रतिनवनीलपट्टकान्तिम्।

[1]सालतालमध्य

[2]बिम्बश्रीद्यु

[3]समृद्धधूमराशिः

आतेने मरकतनूपुरप्रकाशं पादाब्जेष्वपि विरलस्तमः प्ररोहः।।

30.भृङ्गाल्याः किमसितपद्मकाननात्किं नागौघात्किमपि तमालकाननात्किम्।

तन्वीनामलकवनात्किमभ्रसङ्घात्किं सान्द्रद्युतिरुदगाद्घनोन्धकारः[1]।।

31.चन्द्रोथ प्रथमधरा हि मौलिरत्नं जीवातुस्तृषितचकोरदम्पतीनाम्।

आहर्ता विरहविदूनचक्रवाकप्राणानां कबलयितुं तमो जजृम्भे।।

32.आतानीदविकलमण्डलोथराजा ध्वान्तैघद्विपमृगयान्नभोवनान्ते।

कीर्णाभिः किरणसमूहवागुराभिः निष्क्रान्तः प्रथमगिरीन्द्रराजधान्याः।।

33.नीहारद्युतिरतिपाण्डरप्रकाशः पञ्चास्यः किरणचयस्सटाभरोस्य[2]।

अङ्कस्तु प्रबलतमोगजप्रहारव्यासक्तो मदजलबिन्दुरेव साक्षात्।।

34.ज्योत्स्नाभिः परिचुलकीकृतान्धकारश्रेणीभिर्विहितचकोरपारणाभिः।

निर्निद्रीकृतकुमुदाभिरेयुषीभिः विस्तारं वियदतिपाण्डरं बभूव।।

35.कैलासद्युतिमसिताश्मचन्द्रशालास्सुत्रामद्विरदरुचिं मदावलेन्द्रः।

कासाराः कलशसमुद्रकान्तिमापुः ज्योत्स्नाभिर्द्रुहिणवधूश्रियञ्च नार्यः।।

36.शीतांशुद्युतिचयभस्मपाण्डराङ्गी नक्षत्रावलिन__ङ्कमालिकाङ्गा।

उन्माद्यच्चटुलचकोरलोचनश्रीर्योगन्याः प्रकृतिमचूचुरत्रियामा।।

37.रङ्गेशस्तदनु विभुः शुभे मुहूर्ते साकल्पो मणिशिबिकां मनुष्यवाह्याम्।

आरुह्याम्बुधिसुतया च साकमुर्व्या निर्याणो ज्वलितदीपिकासहस्रः।।

38.निष्क्रान्ते निरुपमनृत्तगीतवाद्यैः साटोपं त्रिदशशिखामणौ त्रिधाग्नि।

व्यानम्रैरपि सचिनैर्विनीतवेषैः भूपावैरपि निबिडा बभूव वीथिः।।

39.रङ्गेशो मणिशिबिकान्तरस्थ एव प्रालम्बस्त्रगमलमौक्तिकातपत्रः।

आधूतामृतकरचारुचामरोग्रे शुश्राव त्रिदशसमागमागमोक्तिम्।।

[1]सान्द्रद्युतिरुदगाद्घनाऽन्धकारः

[2]भरोऽस्य

40.आनीतैश्शुचिपुरुषाहताग्र्यभेरीवादित्रध्वनिविनिवैदितैरमर्त्यैः।

प्रच्छन्नैः परिरचिताञ्जलिप्रबन्धैराकीर्णं गगनतलं महीतलञ्च।।

41.सेनाभिश्शिततरशङ्खचक्रचापप्रासासिप्रमुखवरायुधोज्ज्वलाभिः।

सिम्हास्यद्विपमुखकालपालिताभिः साकं तत्पदयुगमाप दण्डनाथः।।

42.सर्वाङ्गाभरणफणीन्द्रवक्रनिर्यन्निश्श्वासानिलजवनर्तितप्रदीपः।

वेदात्मा परिकलिताञ्जलिर्गरुत्मान्नम्राङ्गे दनुजनिषूदनं सिषेव।।

43.सान्द्राभिर्द्रुतकनकप्रभानिभाभिः छायाभिस्सरलशरीरनिर्गताभिः।

तन्वानो वियदखिलन्तटि[1]त्प्रकीर्णं प्राणंसीत्पवनसुतः परं पुमांसम्।।

44.श्रीरङ्गेश्वरचरणाम्बुजप्रयत्या धन्यानामचरमसंप्रदायधुर्यौ।

भक्तैस्तैस्सहशठकोपभाष्यकारौ संप्राप्तौ सगरुडसैन्यनाथपार्श्वम्।।

45.चोलेन्द्राद्रविडमहीश्वराश्च पाण्ड्याः कर्णाटक्षितिपतयश्च चेरभूपाः।

आन्ध्राणामधिपतयो नृपास्तथान्ये भक्त्यापुस्त्रिभुवननाथपादमूलम्।।

46.स्वर्लोकद्रुमनवपल्लवप्रकाशप्रत्यर्थित्रिजगदधीशपादयुग्मम्।

मौलिभ्यःपरिगलितैर्नवप्रसूनैः पृथ्वीशाः प्रतिकलमर्चयाम्बभूवुः।।

47.आपीताम्बरविततांशुरुच्चशृङ्गः पादाग्रस्फुरितनखेन्दुबिम्बकान्तिः।

रङ्गेशः परिलसति स्म राजभिस्तैरुत्तुङ्गैरिव कुलपर्वतैस्सुमेरुः।।

48.आकल्पीकृततपनीयमौक्तिकांशुप्रच्छन्नप्रतिनवदीपचन्द्ररश्मिः।

निर्यातस्स्फुरदकलङ्कनामहैमप्राकारावृतमणिमन्दिरान्मुकुन्दः[2]।।

49.पाटीरद्रवसरसैः सरूप्यकुम्भापाथोभिस्ततिरसकृत्पुराङ्गनानाम्।

ज्योत्स्नौघैरिव रजनी सपूर्णचन्द्रावीथीस्ताश्शिशिर[3]यति स्म तोरणाङ्काः।।

[1]वियदखिलंतटि

[2]मणिमन्दरान्मुकुन्दः

[3]वीथीस्ताःशिशिर

50.रथ्योद्यन्मरकततोरणांशुजालैः द्वाराष्टापदमयकेतुरश्मिभिश्च।

प्रासादस्फुरितमणिप्रदीपभाभिः किम्मीरं गगनतलं किलोपजज्ञे।।

51.सेवार्थन्दनुज[1]रिपोस्समस्तपुष्पव्याजेनागतसकलर्तुमण्डलेन।

आक्रान्तामिव विततिम्महापणानां सोपश्यत्सुरभितदिग्वधूमुखानाम्।।

52.उत्तुङ्गध्वजतपनीयकुम्भमुक्त्ताच्छत्रेणस्थिरनृसहस्रसंभृतेन।

मध्ये सन्मणिशिबिकान्तरस्थ एव श्रीरङ्गप्रभुरचलत्स पुष्पधाम्ना।।

53.द्वारिद्वार्युपहितहेमपूर्णकुम्भां गेहानान्तति[2]मतितुङ्गतोरणाङ्काम्।

संपश्यन्नधिगतपुष्पकूटयानो वीथीषु व्यहरदभङ्गुरप्रतापः।।

54.रक्त्तार्धोरुकपरिशोभितोरुकाण्डश्रेणीनामुरसिजनद्धकञ्चुलीनाम्।

नृत्तानिप्रसृतिदृशां सवीथिकोटिष्वद्राक्षीदपि मणिचत्वरेषु रङ्गी।।

55.रङ्गेशे चरति शनैर्विहारवीथ्यामाकाशन्निज[3]धवलातपत्रपूर्णम्।

दिग्भागा अपि चलचामरालिकीर्णा भूचक्रं कुसुमचयास्तृतं तदासीत्।।

56.सान्द्रेन्द्रोपलरचितात्सपुष्पकूटात्प्रस्फूर्जत्प्रविमलहाररश्मिगौरः।

रङ्गेशस्स शिबिक एव निर्जगाम प्रालेयद्युतिरेवकालमेघबृन्दात्।।

57.विस्तीर्णापणततिमध्यवर्त्मनैव स्वन्धाम[4]प्रणवमयं शनैर्विशन्तम्।

शेफालीपरिमलमेदुरस्समीरः कावेरीजलकणशीतलस्सिषेवे।।

58.हेतीशद्विजकुलराजरक्ष्यमाणे द्वारे तानवनिपतीन्विसृज्य रङ्गी।

रङ्गाख्यं मणिमयमङ्कणं प्रपेदे प्रीतात्मा युवतिनिकायगीतकीर्तिः।।

59.तन्नीराजनविधिभिश्चनीरजाक्ष्यो नृत्तैश्चोज्ज्वलतरतूर्यघोषमिश्रैः।

[1]सेवार्थंदनुज

[2]गेहानांतति

[3]माकाशंनिज

[4]स्वंधाम

तिष्ठन्तं कतिपयदीपिकासमेतं रङ्गाख्याङ्कणभुविमोदयाम्बभूवुः।।

60.उष्णीषश्रियममले सुधांशुबिम्बे कूर्पासश्रियमपि चन्द्रिकाप्रवाहे।

तुङ्गेन्द्रोपलमयगोपुरेश्वरस्य प्राप्ते स क्रतुवपुराप यागशालाम्।।

61.तस्यां स प्रथितदयाधनो निषण्णः पूतात्मा हरिरपनीय भूषणानि।

सुस्नातो भवदमलैस्सुरस्रवन्त्याः कालिन्द्या अपि सलिलैः कवेरजायाः।।

62.अन्यच्चारुणवसनाङ्गरागमाल्यो हुत्वाग्नौ निशि चरुभिर्नवाज्यमिश्रैः।

आहारन्नवममृतोपमेयमीशः कृत्वोच्चैः प्रणवमयं विमानमागात्।।

63.नक्षत्रे मृगशिरसि प्रभातकाले कालात्मा सहकलशाम्बुराशिपुत्र्या।

विस्तीर्णाद्गगनविलङ्घिसालचक्रप्रासादादथ नागरात्स निर्जगाम।।

64.मार्गेणोन्नतमणितातेन[1]गच्छन्शीताम्भःप्रशमितपांसुमण्डलेन।

वारस्त्रीनिवहवृतस्सभद्रकाल्या भीमाया निलयभुवं व्यलोकताग्रे।।

65.तन्मध्ये स विभुरलोकयन्निवेशं भैरव्या भयजननं शरीरभाजाम्।

हेतीनां बलिपशुहिंसनोन्मुखानां कालांशुप्रसरणकल्पितान्धकाराम्।।

66.तीव्रासिक्षतमहिषेन्द्रजात[2]सन्ध्यं संफुल्लप्रसवसमूहतारकाङ्कम्।

मध्याह्नेप्यनघकर__सञ्चयेन प्रत्यक्षीकृतनिबिडान्धकारलीलम्।।

67.रक्ताभिः किसलयपङ्क्तिभिः समन्तात्प्राकारीकृततरुमण्डलीशिखासु।

प्रोताभिस्ततिभिरिवासिविक्षतानां जिह्वानां व्रतमिव सायकैस्स्वसिद्यैः।।

68.लूतास्योत्सवनवतन्तुजालवक्रैः निष्पत्रक्षितिरुहशाखिकाविलग्नैः।

पर्यन्तस्थितवनदेवतासमूढैः संभिन्नं मलिनतरैरिवातपत्रैः ।।

69.भोगोद्वेल्लितनवकेतकाग्रसूचिप्रस्फूर्जत्परिमलपूरमर्पितानाम्।

नागानां फणमणिभिः प्रकाशवद्भिः संयुक्तं निबिडतरैरिव प्रदीपैः।।

[1]मणिरणितेन

[2]महिषान्द्रजात

70.उत्तुङ्गक्षितिरुहसालचक्रलग्नैः दुर्गायामदजनितैरिवाट्टहासैः।

नीहारद्युतिकिरणौघनिर्विशेषैः निर्मोकैः पवनभुजां प्रभासमानाम्।।

71.डोलाभिर्द्रुमविटपाग्रलम्बि[1]नीभिः वेतालप्रतिकृतिभिः विशेषभीमम्।

अत्यन्ताहतबलिडिण्डिमोग्रनादव्याहूतोद्भटतरडाकिनीसमूहम्।।

72.हीहीहीत्यनुकलमुच्चरद्भिरुच्चैः निर्मांसैरतिविरलास्थिभीषणाङ्गैः।

वेतालैर्विकटकरालवक्त्रनेत्रैः व्याकीर्णं यदुपवसुन्धराप्रदेशम्।।

73.धाम्नोस्मादथ[2] सहडाकिनीसमूहैः निर्गत्य द्रुततरमादिभैरवी सा।

व्याप्ताङ्गी विकटकपालमालिकाभिः प्राणंसीत्प्रलयघनप्रभा मुरारिम्।।

74.वेताला: प्रकटितहस्ततालभीमा डाकिन्यः कुटिलदृशश्च साग्निकेशी।

दण्डेशाङ्गुलिकृतसंवधेजातास्सर्वास्ता विधृतमनोज्ञरूपवेषाः।।

75.उद्यानान्तरभुविमण्डपं विटङ्कव्यालम्बि स्फुटकुरुविन्ददामदीप्तम्।

उत्तुङ्गपृथुतरमुक्षिणकोपयोगव्यापारक्षममगमत्स रङ्गधामा।।

76.तत्रस्थे शशिमणिनिर्मिते सपीठे प्राप्तश्रीपरिचितकौस्तुभस्सुनीलः।

कैलासे नव इव वारिदोनिलिनो विद्युत्वान्विबुधशरासनोपगूढः।।

77.तापिञ्छद्युतिसदृशस्स रत्नमालालङ्करोभुवननिवासभूः पुराणः।

आरेजे भृशमरुणाम्बुजैः प्रफुल्लैः आविद्धान्तर इव यामुनोदवाहः।।

78.प्रत्यग्राम्बुजमुखलग्नभृङ्गमाला कस्तूरीतिलकमनोहरां मुरारिः।

पुन्नागोज्ज्वलसविधां रथाङ्गनाम द्वन्द्वोरोरुहललितां ददर्श वापीम्।।

79.आहारैरतिमधुरोष्णिकानुषङ्गैस्सौहित्यं समधिकमेयिवान्स रङ्गी।

तत्रस्थो बहुविधनृत्तगीतवाद्यव्यासक्तः क्षणमिव वासरन्निनाय।।

[1]पावलम्बि

[2]धाम्नोऽस्मादथ

80.निस्साणध्वनिरुदभून्निवृत्तिशंसी मन्दश्श्रीमधुमथनस्य रङ्गधाम्नः।

क्षेपीयः कपटनृसिंह[1]कर्णनादप्रत्यर्थीमुखरितदिङ्मुखस्तदानीम्।।

81.उत्थायोन्नतशशिकान्तभद्रपीठाद्वादित्रपकरवैश्च दीपिकाभिः।

कावेरीपरिसरवर्त्मना शुभाङ्गो रङ्गेशो निजनगरं प्रति प्रतस्थे।।

82.हरेर्मातुश्शम्भोः पितुरपि वहन्नंशसुषमां महानीलैरिद्धामरुणमणिविद्धां स्रजमिव।

महाशास्तामत्तद्विरदहयबृन्दैःपरिवृतः प्रयान्तं प्राणंसीत्प्रकटतरमार्गेण वरदम्।।

83.मुक्तास्यन्दनमालिकाविलसितां प्रासादश्रृङ्गावली

स्फायद्दीपपरम्परापरिवृतां तां राजधानीं निजाम्।

संप्राप्यान्तरमेयुषे भगवते नीराजनप्रक्रियां

नृत्तैर्मङ्गलतूर्यनादमिलितैश्चक्रुश्चकोरीदृशः।।

84.पुण्यात्मा भुवि चन्द्रशेखर इति प्रख्यातकीर्तिः कृती

वंशानुक्रमसिद्धपट्टविधिना राजाधिराजप्रभुः।

सीमाज्ञानपदाग्रणीर्जनपदग्रमाधिपस्सत्ववान्

रङ्गेशं प्रणिपत्य बन्धुनिवहैर्विज्ञापयामास तम्।।

85.श्वश्रीमच्छुकसौम्यनाममहितग्रामं सकृत्पावनं

कृत्वा त्वच्चरणारविन्दयुगलीलग्नैः परागैश्शुभैः।

स्थित्वा तत्र च मण्डपे सुरभिते भक्तानुकम्पी भवान्

सायाह्ने पुनरेतुमर्हति पुरीं रङ्गाभिधानामिति।।

86.आकर्ण्यानतराजराजरचितामभ्यर्थनां स त्रय-

स्त्रिंशत्कोटिसुपर्ववन्दितपदाम्भोजस्तथेत्युक्तवान्।

गम्भीरो गृहराजमुज्वलतरं संप्राप्य तस्मिन्हरि –

[1]क्षेपीयःकटकनृसिंह

र्निन्ये सागरसार्वभौमसुतया रागार्द्रया यामिनीम्।।

87.देवो यस्य भुजङ्गभोगशयनश्श्रीरङ्गराजोहरिः

तातःकाश्यपचक्रायविबुधो लक्ष्मीर्जनन्युत्तमा।

तस्यैवोत्तमनम्बिसत्तिरुमलाधीशप्रबन्धुःकृतौ

लक्ष्मीकाव्य उदारवैभवनिधौ सर्गो गतः पञ्चमः।।

अथ षष्ठस्सर्गः

1.पूर्वप्रबन्धकमलानयनानुभूतनिद्रावसाननिरवग्रहवक्राकान्तिः।

आर्द्राह्वये तदनुभे हरिरम्बुजाक्षो भक्तेप्सितार्थकरणाय बभूव सज्जः।।

2.उद्दामकीर्तिरुदयात्पुर एव भानोः सर्वां क्रियामथ विधाय विभातयोग्याम्।

बाह्यालिकाविहरणोचितमाशु वेषमङ्गीचकार भगवानरविन्दनाभः।।

3.श्रीचक्रायमलकेश्वरकारितोरुसालावृतात्स निरगात्प्रणवस्वरूपात्।

रङ्गी विमानभवनाद्दृढयोगपट्टसंवीतयोगनरसिंहवपुर्विलासः।।

4.सञ्जातमञ्जुतरमङ्गलशङ्खनादपुण्याहघोषजयशब्दपुरस्कृतान्तात्।

धामोत्तमा त्वरितदण्डपदत्तहस्तो निर्याय भूषितपदो मणिपादुकाभ्याम्।।

5. _____ नवविग्रहेण नागारिणा च रचिताञ्जलिबन्धनेन।

तेजोमयैस्स पुरुषाकृतिभिर्मनोज्ञैरास्थानमाप सहपञ्चभिरायुधैश्च।।

6.तत्रस्थ एव पवमानमिवाङ्गवन्तं कैलासमिव जङ्गममम्बुजाक्षः।

अन्यादृशं पतगराजमिवातहेषमायान्तमैक्षत हयोत्तममौपवाह्यम्।।

7.चञ्चत्खुराग्रपरिघट्टितरत्नभूमिसञ्जातहव्यवहसान्द्रकणावलीभिः।

उद्दामवेगगमनच्युतदेहभूषारत्नावलीभिरिव राजितपार्श्वभागम्।।

8.पार्श्वावनद्धदृढचापकमिन्द्रनीलभूमासमृद्धकिरणावलिमेचकाङ्गम्।

हेषोज्ज्वलं वलनिषूदनकार्मुकाङ्कं नव्यं पयोधरमिवोर्जितगर्जिताढ्यम्।।

9.स्फायत्खलीनकषणोद्गतसृन्कफेनैरापाण्डरैरपहसन्तमिवेन्द्रवाहम्।

भूयश्च्युतैर्भुवि परिक्रमणाय शौरेः पुष्पोपहार रचनामिव साधयन्तम्।।

10.अद्यापि हन्त बडबान्तरमर्षवह्निज्वालाकुलेन वदनेन पयोऽश्नती[1] सा।

वेगेन यस्य सदृशं सुतमाशुलब्धुं स्थित्वातपः पृथुतरञ्च रतीव सिन्धौ।।

11.उत्क्षिप्त कुञ्चितनिजाङ्घ्रियुगेन तूर्णमाभाति लग्नकटकस्फुटशिञ्जितेन।

आकारयन्निव हयोत्तममौपवाह्यं शक्रस्य यो झटिति वीथिषु धावनाय।।

12.खेलत्खलीनपरिलग्नमहेन्द्रनीलरत्नोल्लसत्किरणकन्दलकैतवेन।

प्राक्कर्विताः परिमितोदरगामिनीर्योदूर्वां वमन्निव पुनः पुनरुल्ललास।।

13.आकाशचारचतुरा अपिवाजिमुख्यास्सप्ताब्धिनीसखमुदग्रतरप्रतापम्।

नूनं भजन्ति रथवर्यधुरं वहन्तो लब्धुं यदीयपदचक्रमसंप्रदायम्।।

14.तं वाजिनञ्चतुरव[2]ल्लभपालनीतं चञ्चत्खुराग्रलिखितावनिमुञ्चहेषम्।

हेलान्नतोन्नतमुखं स्वमिवाधिरोढुमाकारयन्तमभिवीक्ष्य हरिर्ननन्द।।

15.पर्याण___मवलम्ब्यनतस्स रङ्गी[3] हेषामिषादिव जयोक्तिमुदाहरन्तम्।

रंहस्समूहमिव विग्रहवन्तमुच्चैस्तं वाजिनं पतगराजमिवारुरोह।।

16.आनीलकञ्चुकमुदञ्चितशस्तबन्धशस्तासिधेनुसविशेषरुचिन्दधानः[4]।

आपाण्डरे विलसति स्म हरिस्तुरङ्गे[5] कैलासशृङ्ग इवचारुणिकालमेघः।।

17.आरूढवेगितुरगप्रवरेण तेन भूचोदितः पतगराड्ध्वजकर्मयुक्तः।

प्रालबिम्बतन्तदनु[6]गूढपदां वरेण पर्यग्रहीत्सपदि पाण्डुरमातपत्रम्।।

18.हेतीश्वरोस्य परमानसतत्वमूर्तिश्शङ्खश्च दैत्यपतिचित्तविभेदशब्दः।

[1]पयोश्नती

[2]वाजिनंचतुरव

[3]ततस्सरङ्गी

[4]रुचिंदधानः

[5]हरिस्तरङ्गे

[6]प्रालम्बितंतदनु

मुक्तापरिष्करणमुग्धसुवर्णदण्डे द्वे चामरे परिसरे स्वयमग्रहीष्टाम्।।

19.ताक्ष्र्यच्छदव्यजनहेमकलाचिमुक्ता ताम्बूलभाजनधरैरपरैरथास्त्रैः।

आत्मोत्तमाङ्गधृतचापगदासिचिह्नैरास्थानरक्षिभिरसेव्यत रङ्गधामा।।

20.वक्षोनिवासकमलाकरपुण्डरीकशङ्काकरेण शशिमण्डलपाण्डरेण।

छत्रेण ताक्ष्र्यविधृतेन निवार्यमाण बालातपस्स विलल्लास बलेर्विजेता।।

21.पार्श्वद्वयस्थितसुदर्शनपाञ्चजन्यो दोधूयमानसितचामरमारुतेन।

व्याकीर्यमाण नवहल्लकदामरेणुः प्रीतिञ्चकार[1] मुरजिज्जनलोचनानाम्।।

22.रक्ताङ्गरागवसनाभिरणाभिरामैरासक्तहेतिभिरनेकसहस्रसंख्यैः।

वीरैः कृतप्रणतिभिः पुरुषप्रकाण्डैरासेव्यते स्म परितो हरिरम्बुजाक्षः।।

23.यातस्य सैन्धववरेण तुषारशैलप्रत्यर्थिनाग्रभुविदैत्यनिषूदनस्य।

नक्रापकृष्टचरणद्विपराजरक्षाकर्मापदानमपठद्वरवन्दिबृन्दम्।।

24.श्रीरङ्गराजसमधिष्टितवाजिराजसञ्चारसौष्ठवविशेषदिदृक्षयेव।

आरूढवानुदयभूधरशृङ्गमुच्चैरम्भोजबन्धुरधिकस्फुरितानुरागः।।

25.सेनामदद्विरदराजपरंपराणामुत्तानितोरुतरपुष्करशीकरौघैः।

उन्मृष्टरागमिव चण्डमरीचिबिम्बं दुष्प्रेक्ष्य रोचिरभवज्जनलोचनानाम्।।

26.संफुल्लपद्मविगलन्मकरन्दधारासंपर्कमन्दगतयो मरुतां प्ररोहाः।

प्राशोषयन्सुरतकेलिरसालसानां स्वेदोदकान्युषसि वारविलासिनीनाम्।।

27.नीहारशीकरिणि निर्भरसह्यकन्या रोधस्सरोविकचपङ्कजगन्धबन्धौ।

प्राभातिकेव हतिमन्दतरं समीरे चक्री जगाम चतुराननगोपुरान्तम्।।

28.आरूढतुङ्गतुरगस्य हरेरुदग्राः कोटीरसीम्नि कुरुविन्दमणिप्रकाशाः।

आम्रप्रवालनिकुरुम्बविलासमापुः वीथीस्स्फुरत्कनकबन्धितमालिकासु।।

[1]प्रीतिंचकार

29.वातायनान्तरनिवेशितनेत्रपद्म शातोदरी जनपरिष्कृतसौधश्रृङ्गात्।

प्राध्मातशङ्खनिकरान्नगरात्स वाजिनिस्साणनादमुखरान्निरगान्मुकुन्दः।।

30.उत्तुङ्गकीचकवने नततोऽन्तरीपः मार्गेण मन्दपवनेन सपश्चिमेन।

आबद्धतोरणसहस्रसमाकुलेन रङ्गी जगाम रमणीयमुखारविन्दः।।

31.स्कन्दः प्रशस्तविभवो गिरिजाकुमारो यस्योपकण्ठविपिनेषु तपश्चकार।

ईशानमङ्गलमिति प्रथितं तमीड्यं ग्रामन्ददर्श[1] पुरतो गतिरानतानाम्।।

32.अत्रस्थ एव खलु दक्षिणतीरनाथैरत्युज्ज्वलैस्तदनुजानपदैर्विनीतैः।

पूजां कृतामनुपमां पुरुषप्रकाण्डैः स्वीकृत्य मोदमगमत्सुरलोकवन्द्यः।।

33._____निचुलापुरनीरजाक्षी निर्मुक्तनीलकबरीनिपतत्प्रसूनम्।

आलोकयन्नथ सदक्षिणतीरदेशं शीघ्रञ्जगाम[2] तुरगेण कवेरजायाः।।

34.धावंस्तुरङ्गमवरेण मनोजवेन ताम्राधरो निभृतकुण्डलतारहारः।

आजानुलम्बितकरात्पतितं पृथिव्यां मुद्राङ्गुलीयकमसौ न विवेद दिष्ट्या।।

35.उत्तुङ्गचूतपनसक्रमुकावलीभिरुद्भासितो पवनमुत्तरतीरमुच्चैः।

उत्फुल्लहल्लकमनोज्ञसरः प्रतस्थे तिर्यङ्निवर्तिततुरङ्गवरस्स रङ्गी।।

36.नानाविधाभरणवस्त्रवरातपत्रनादित्रकेतनपदातिविशेषदृश्याः।

आरूढतुङ्गतुरगन्निखिला[3] महीपा रङ्गेशमाप्ततुरगाः परिवव्रुरारात्।।

37.राकासुधाकिरणमण्डलपाण्डरेषु सान्द्रेषु सह्यदुहितुस्सिकतातलेषु।

रङ्गी सलीलमधिरूढतुरङ्गराजो बाह्यालिकाविहरणाय बबन्ध चेतः।।

38.उत्पश्यतामुपगतोच्चतुरङ्गमाणामुर्वीभुजां परिहतातपवारणानाम्।

रङ्गेश्वरस्सकृदचोदयदौपवाह्यं पाददृयेन परिभूतसरोरुहेण।।

[1]ग्रामंददर्श

[2]शीघ्रंजगाम

[3]तुरगांनिखिला

39.रङ्गाधिराजपदपङ्कजचोदितस्य सन्धावतस्सपदि वाजिधुरन्धरस्य।

पश्यास्थितोऽजनि पदानि स पञ्चषाणि ताक्ष्र्योजवीधृतमितातपवारणस्सन्।।

40.वेगेन धावति हये पुरुषोत्तमेन संप्रेरिते कनकचामरमादधानः।

हेतीश्वरस्तु परमानसतत्वमूर्तिः द्वित्राणि हन्त स पदानि विलम्बते स्म।।

41.छत्रे चिरायति शिरस्सुमगन्धलुब्धमूर्ध्वं भ्रमद्भ्रमरमण्डलमेव साक्षात्।

आरूढवेगितुरगस्य सरोजनाभेः नीलातपत्रसुषमामभजन्मुहूर्तम्।।

42.प्राप्ते विलम्बममृतांशुमरीचिगौरे शौरेः प्रकीर्णकयुगे हयमास्थितस्य।

मुक्तोल्लसन्मकरकुण्डलयुग्मरश्मिसङ्घात एव सितचामरतामयासीत्।।

43.यावत्पदात्पदमयं न चलेद्वरुत्मांस्तावन्निवर्तितजनोज्ज्वलवाजिराजः।

तत्पाणिपङ्कजधृतातपवारणस्य छायाङ्गतः श्रममपानुददम्बुजाक्षः।।

44.आरूढवाजिभिरमेयगुणैरुदारैरस्तोकभक्तिविनतैरवनीशबृन्दैः।

आसेवितो हरिरवाप शुखप्रियाख्यं ग्रामं गरुत्मदभिभूतिकृताभयेन।।

45.उन्नद्धकेतुशतमुज्ज्वलराजराजगेहं प्रदीपशतभास्वरवेदिपार्श्वम्।

आनन्दकन्दलनिरर्गलसंप्रदायैरालोकनैरकृतरङ्गपतिः कृतार्थम्।।

46.आनन्दराशिरवरुह्यतुरङ्गराजादालोलकर्णमणिकुण्डलमम्बुजाक्षः।

अध्यास्त पीठमरुणोपलविद्धपार्श्वमारामपूगनिकरान्तरमण्डपस्थम्।।

47.विशाम्यमङ्गलनिधिर्बहुनृत्तगीतवाद्यैस्स तत्र रचिताभ्य वहारकृत्यः।

अप्रीणयच्चरणपङ्कजतीर्थवारिमालाङ्गरागवसनैरपि राजराम्।।

48.आखेटयोग्यमधिकोज्ज्वलमाशुवेषमास्थाय दुर्ललितदैत्यमहीध्रवज्रः।

रङ्गेश्वरस्स तुरगं पुनरारुरोह विश्रान्तमुच्चतरहेषमुदग्रवेगम्।।

49.कालायसासितरुचः करवालचर्म प्रासेषुकार्मुकपरश्वथकुन्तहस्ताः।

सालप्रमाणवपुषः पुरुषा निषादाः शौरिप्रणेमुरधिरूढतुरङ्गराजम्।।

50.तैरावृतः प्रकृतिभीषणरूपवेषैः मुक्तातपत्रसितचामरवान्मुरारिः।

उद्दामचण्डकिरणद्युतिरुत्तराशामुत्फुल्लपद्मनयनश्शनकैः प्रतस्थे।।

51.निर्धूतशार्वरतमः पटलं नितम्बसंलग्नरत्नकिरणैर्बहुलेऽपि पक्षे[1]।

ग्रामस्य तस्य महतः खलु नातिदूरे श्वेताद्रिमैक्षत शुभावहमुच्चशृङ्गम्।।

52.छत्रीकृतो न च यदुप्रवरेण पुंसा चापीकृतो न च पुरत्रयशासनेन।

मन्थीकृतो न च सुरैर्दशकण्ठचण्डदोर्मण्डलेन तुलितो न च यो विभाति।।

53.मृत्युञ्जयेन पुरभञ्जनकर्मकाले चामीकराचलचमत्कृतकार्मुकेण।

यश्चम्पकप्रसवगौररुचिर्विभाति क्लृप्तः किलोज्ज्वलगुणः[2] परिहारचापः।।

54.आपाण्डरप्रसृतनिर्झरभासुरो यः संकीर्णगैरिकरजः कमनीयशृङ्गः।

ऐरावतस्य चलदुज्ज्वलचामरस्य सिन्दूरक्लृप्तशिरसश्रियमादधाति।।

55.उद्दर्पकेसरिनखाङ्कुशभिन्नदन्तिकुम्भान्तरालपतितामलमौक्तिकानाम्।

यत्र स्फुरत्तुहिनबिन्दुपरम्पराणां कीर्णैः करोति किरणैस्तरणिर्विभेदम्।।

56.वात्या निरन्तरविघट्टनकम्पमान वंशाटवी समुदितन्दवधूमकेतुम्[3]।

यत्र स्थितामदगजाः परितप्यमाना निर्वापयन्ति करशीकरवारिपूरैः।।

57.प्राग्विस्फुरद्विमलशीतमरीचिबिम्बो यः प्रत्यगुल्लसितपाटलभानुबिम्बः।

संक्रन्दनोपलरुचिर्धृतशङ्खचक्रं राकामुखेष्वनुकरोति हरेरिवाङ्गम्।।

58.यत्र प्रगाढतिमिरासु गुहासु यूनां रन्तुं समुद्यतवतां रमणीजनेन।

ज्वालाविलम्बिजलदोदरतस्स्फुरन्ती विद्युल्लतैव विदधात्युरुदीपकृत्यम्।।

59.मत्तद्विपप्रकटगण्डमदाम्बुधारासंपर्कनित्यकलुषाणि सरिज्जलानि।

आपीय निश्चलसटाशिखराणि शश्वत्कुप्यन्ति केसरिकिशोरकुलानि यस्मिन्।।

60.मेघाननेकपधिया मृगराजशाबे शश्वच्चपेटहतिभिश्शतधा विधातुम्।

[1]बहुलेपिपक्षे

[2]किलिज्वलगुणः

[3]समुदितंदवधूमकेतुम्

उद्योगमेयुषि निजप्रियरक्षणार्थं मुग्धा ध्रुवं क्षणरुचिर्मुहुरुज्जिहीते।।

61.मुक्तामयूखचयभस्मकृताङ्गरागः कालाम्बुवाहकरिचर्मपरिष्कृताङ्गः।

नित्यश्शिरोविधृतनिर्जरलोकसिन्धुराभाति शम्भु ___ यश्शशिशिरांशुचूडः।।

62.तस्यान्तिके मुरहरस्स ददर्श दीप्तमभ्रलिहक्षितिरुहावलिसालचक्रम्।

निर्व्याजनृत्तनियमोत्सुकनीलकण्ठं नीलीननं निखिलसत्वनिवासभूमिम्।।

63.स्तम्बे रमानिजकपोलविजृम्भमाणैरापूरयन्ति मदवारिभिरालवालम्।

यस्मिन्समुन्नतमहीरुहमण्डलस्य मेधा निजैरिव जलैर्वसुधावतीर्णाः।।

64.सञ्चारिणां तत इतः फणिपुङ्गवानां फूत्कारिणां निजफणोज्वलरत्नमाला।

यत्र क्षपास्वविरतं वनदेवतानामाभात्ययत्नकृतजङ्गमदीपिकेव।।

65.एलालताभवनमध्यमुपाश्रितेषु तल्पेष्वनल्पनवपल्लवकल्पितेषु।

आश्लेषसौख्यपुलकोद्गमभूषणाभिः क्रीडन्ति यत्र पथिका निजवल्लभाभिः।।

66.आन्दोलिताखिलमहीरुहमण्डलस्य मन्दोदितस्य बहुशो मरुदङ्कुरस्य।

सप्तच्छदप्रसवकेसरगन्धबन्धोः स्पर्शन्यत्र करिणः कुपिता भवन्ति।।

67.तादृग्विधं तदनुलोक्य मुहुः प्रमोदं संप्राप्तवत्यखिललोकगुरौ मुरारौ।

इत्याकुलः कलकलो मृगयोत्सुकानामाविर्बभूव चरतान्निजसैनिकानाम्[1]।।

68.एषा मदद्विरदसिंहपदाङ्किताभूरेतत्सरो महिषशृङ्गविलोलिताम्भः।

एतच्च पल्वलमुदग्रवराहयूथसंक्षोभितोदकमियं मृगपादपङ्क्तिः।।

69.उद्भूतसंभ्रममुदञ्चितबृंहितानानुद्दामकर्णपवनाहतभूरुहाणाम्।

गण्डस्फुरन्नवमदोदयगर्वितानामालोक्यतां बहुविधः करिणां समूहः।।

70.अत्याहितद्रुतमृगास्यपरिच्युताभिरर्धोपयुक्ततृणलेशपरम्पराभिः।

रोमन्थफेनशबलाभिरियं विकीर्णा पद्या च धीरहृदयैरवलोकनीया।।

[1]चरतांनिजसैनिकानाम्

71.व्यालोलदृष्टिविनिवेदितसत्वमुक्तिव्याधूर्णतो मृगगणस्य पुरः प्रयान्तम्।

उद्गाहमानमटवीं प्रति कृष्णसारमुन्मुच्यतां शुनकयूथमुदग्रवेगम्।।

72.तादृक्शारुमृगराजकृतोपमर्दन्तस्यां कुरङ्ग[1]चमरीमहिषीसमूहम्।

आतङ्कशङ्किविहगार्तरवानुबन्धमावेष्यतां विपिनमायतवागुराभिः।।

73.इत्याकुलं बहुविधं वदतां समूहैरन्योन्यमुग्रमृगयाकलितोद्यमानाम्।

आकर्णकृष्टधनुषामतिभीषणानामापूरितं विपिनमास वनेचराणाम्।।

74.तं पुण्डरीकनयनं खलु पुण्डरीकदैत्याधिपस्समवलोक्य भयेन दूरात्।

आकम्पमानवपुरस्तमितापदानं खं नाविशत्सपदि हन्त रसातलं वा।।

75.रङ्गी प्रहर्तुमटवीसरणीं प्रविष्टामुद्वृहितां द्विरदपङ्क्तिमुदग्रसत्वाम्।

पाश्चात्यभागपरिलम्बिनिषङ्गवक्राज्जग्राह सायकवरं जलजायताक्षः।।

76.तच्चापमुक्तशरताडनसंभृतास्रैरारञ्जितानि करमस्तकमण्डलानि।

काश्मीरवर्णकरसैः कलितारुणिम्नां[2] कान्तिन्दधुः प्रियतमाकुचमण्डलानाम्।।

77.दैत्यारिचापगलितैरिषुभिर्निकृत्ताः शुण्डाः[3] क्षणेन करिणां सहकर्णतालैः।

छिन्नैः कवोष्णरुधिरैश्चिरमेत्य सन्धिं स्फायत्फणोरगरुचिं विदधुर्लुठन्त्यः।।

78.उत्प्लुत्य सत्वरपुरस्कृतपुत्रदारमाघूर्णदक्षिविनिवेदितचित्तभीतिम्।

आकर्णकृष्टविशिखोपि स कृष्णसारं कृष्णः कृपामृदुमना न चकार लक्ष्यम्।।

79.भल्लैर्निहत्य निशितैर्मुरजित्स वन्यं मार्गं पुरो महिषसार्थमुपेयिवांसम्।

तं तुङ्गगात्रविगलद्रुधिराम्बुधारापूरैरपूरयदहो विपिनान्तरालम्।।

80.आगच्छतोऽभि[4]मुखमार्तरुषोतितुङ्गगात्रस्य पोत्रिनिवहस्य जवोत्तरस्य।

[1]कृपमर्दंतस्यांकुरङ्ग

[2]कलिता…..म्नां

[3]कृताशुण्डा

[4]आगच्छतोभि

दंष्ट्रात्मृणाल[1]लतिका इव पद्मनाभश्छिछेद चित्रतरशौर्यनिधिश्शरौघैः।।

81.खड्गेनखड्गनिवहान्गदया[2] गतासून्सिंहाञ्छरेण[3] शरभान्युगपत्स रङ्गी।

चक्रेण चक्रमपि तत्र मदावलानां शंखारवेण[4] कुरुते स्म कुरङ्गसङ्घान्।।

82.कृत्वा समस्तजनसञ्चरणानुकूलं सर्वं वनं सरभसा हतदुष्टसत्वम्।

कृष्णः किरातनिवहैरुपसेव्यमानो नीलीवनात्स निरगान्निगमान्तवेद्यः।।

83.ग्रामं विभुस्त्रिजगतामवलोक्यगन्धस्तम्भेशमुख्यधरणीसुरमण्ड्यमानम्।

कारुण्यदत्तनवहल्लकमेषसौम्यजामातृमङ्गलसमाह्वयमाननन्द।।

84.कूलं कवेरदुहितुर्नवनालिकेरपूगाटवीपनससालरसालरम्यम्।

प्राप्तः प्रपन्नजनपापहरस्स रङ्गी व्याधैर्वृतो नकुलतीर्थमपश्यदग्रे।।

85.सह्यात्मजां युवतियूथनितम्बदघ्नस्त्रोतोवहां सुरनदीजलनिर्विशेषाम्।

उत्तीर्य मन्दमुहुनायककान्तवक्त्रो द्वारं सपश्चिममवाप च रङ्गधामा[5]।।

86.पारावताङ्घ्रिसुषमापरिवादशीले भासां निधौ पतति पश्चिमवारिराशौ।

ऐरम्मदेन महसा सुरकार्मुकेण शून्ये च वर्षति सिताम्बुधरेऽपि[6] सान्द्रे।।

87.तत्रैव हन्त समये भगवान्फणीन्द्रश्शेषः[7] फणैररुणरत्नमरीचिमद्भिः।

पक्षीश्वरोऽपि[8] निजपक्षयुगेन चोर्ध्वं वर्षाम्बुजालमरुणत्तरुणस्य शौरेः।।

88.देवे प्रवर्षति परन्दयमान[9] दृष्टिरारूढवाजिवर एव स रङ्गराजः[1]।

[1]दंष्ट्रम्रनाल

[2]खड्गनिवहाङ्गदया

[3]सिंहाञ्शरेण

[4]शङ्खारवेण

[5]मवापसरङ्गधाम

[6]सिताम्बुधरेपि

[7]फणीशःशेषः

[8]पक्षीश्वरोपि

[9]परंदयमान

उद्यत्कृपावसतिरुत्तमरायगेहमुद्दामहैमकलशोज्ज्वलमाससाद।।

89.अट्टालकस्य कुलभृत्यवरस्य गेहे तुङ्गाश्वपृष्ठगत एव स रङ्गधामा।

स्थित्वा चकोरनयनाजननृत्तभेदानावृष्टिपातविरतेर्भगवन्ददर्श।।

90.लक्ष्मीञ्च मातरमभङ्गगुणांश्च दारान्श्रीचक्रायमनुजं सह कृष्णरायम्।

श्रीरामचन्द्रसखमुत्तमराय एष भक्त्या न्यपातयदुरुक्रमपादपद्मे।।

91.सभ्रातृभिः प्रकृतिभृत्यपदे निविष्टैः दण्डेशकर्मणि च शर्मकरैर्जनानाम्।

देवाय कौस्तुभगभस्तिमनोहराय माणिक्यसारसनमार्पयदच्युताय।।

92.भक्तप्रियोऽथ[2] मणिसारसनम्मनोज्ञन्धृत्वा[3] निजे कटितटे धृतसर्वलोकः।

अत्याप्तभृत्यजनमेव न केवलं तद्वंशं च[4] सादरमतर्पयदक्षिपातैः।।

93.यत्र प्रशास्तविभवे निषसाद शौरिरद्यापि[5] तं प्रतिपवित्रतरं प्रदेशम्।

आरोपयन्ति रजनीषु नवप्रदीपानभ्यर्चयन्ति शिरसा प्रणमन्ति भक्ताः।।

94.वीथ्यां प्रशान्ततरवारिपरम्परायां सर्वासु दिक्षु विमलासु च चन्द्रिकाभिः।

दृष्टिन्द[6]यासहचरीं विनिवेश्य तत्र देवो हरिस्सपरिवारजनः प्रतस्थे।।

95.नानाविधायुधहरीश्वरवज्रनाभसंवार्यमाणसुरचारणकिन्नरौघम्।

उद्यप्तदीपपटलीपरिवार्यमाणो मन्दञ्जगाम[7] चतुराननगोपुरं सः।।

---

[1]रङ्गनाथः / रङ्गराजः

[2]भक्त्तप्रियोथ

[3]मनोज्ञंधृत्वा

[4]तद्वंशञ्च

[5]शौरिःअद्यापि

[6]दृष्टिं

[7]मन्दंजगाम

96.मन्दम्मन्दन्तुरङ्ग[1]प्रवरमतिसितंधावन्धाव-

न्सव्यालोलानिशिखरमणिमहः पूरिताशावकाशः। [2]

कूर्पासीहस्तबन्धप्रविलसदुदरस्थासितूणीरशार्ङ्गौ[3]

गोविन्दो गोपुरेशं गुणनिधिरगमद्रङ्गराडुत्तराय।।

97.उत्तुङ्गाद्वाजिमुख्यादथ विमलतरात्सोऽवरुह्य[4] स्वगात्रा

त्कोटीरं कुण्डले द्वे स्रजमपि कटकं हारसुन्मुच्य दिव्यम्।

स्नातः पुण्योदभारैस्सरसमलयजालेपमाल्याम्बरोद्य-

न्मूर्तिस्तत्र त्रियामामनयदनुपमः केलिभेदैस्स[5] लक्ष्म्या।।

98.देवो यस्य भुजङ्गभोगशयनश्श्रीरङ्ग[6]राजोहरिः

तातः काश्यपचक्रायविबुधो लक्ष्मीर्जनन्युत्तमा।

तस्यैवोत्तमनम्बिसत्तिरुमलाधीशप्रबन्धुः कृतौ

लक्ष्मीकाव्य उदारवैभवनिधौ षष्ठस्तु सर्गो गमत्।।

अथ सप्तमस्सर्गः

1.पुण्यधीरथ पुनर्न सुयुक्ते वासरे कृतविभातविधानः।

निर्जगाम निलयान्मणिभूषा काञ्चनाम्बरधरः कमलाक्षः।।

2.झल्लरीपणवडिण्डिमढक्काशङ्खकाहलमृदङ्गनिनादः।

प्राप्तरत्नशिबिकः प्रथितश्रीर्वीथिकासु विजहार मुरारिः।।

[1]मन्दम्मन्दंतुरङ्ग

[2] Two aksharas less in second paada

[3]स्थायितूणीरशार्ङ्गौ

[4]सोवरुह्य

[5]केलीभेदै

[6]शयश्श्रीरङ्ग

3.अग्रहारमवनित्रिदशेभ्यश्चक्रायविदुषापरिदत्तम्।

ऐक्षत त्रिजगदादिरशेषद्वारवेदिविनिवेशितकुम्भम्।।

4.ब्राह्मणोत्तमपरिष्क्रियमाणदुह्यमानमखधेनुसहस्रम्।

सौधकाञ्चनविटङ्कविलम्बिस्रक्समूहपरिलम्बषडङ्घ्रिम्।।

5.तत्र सद्यतनया तटभागेराजमानमभिजातपताकम्।

सोऽगम[1]द्गरुडवाहनधामव्यञ्जितामलकसारविशेषम्।।

6.केशवः कृतसुखांभ्यनहारो भक्तदण्डपतिदत्तकराब्जः।

मौक्तिकोज्ज्वलवितानसनाथन्तत्र[2] मण्डलमलङ्करुते स्म।।

7.वासवोपलविवादकराङ्गः सर्वलोकनयनोत्सव एषः।

आरुरोह मणिमण्डपमध्ये[3] भद्रपीठमचलेन्द्रमिवाब्दः।।

8.आबभौ स नवमौक्तिकपीठे श्रीकुचद्वितयकुङ्कुमशोणः।

पुण्डरीक इव वारुणिहंसस्तत्परागपरिपाटलगात्रः।।

9.पृष्ठतो मणिशिरः करवालं पार्श्वयोः कनकचामरयुग्मम्।

पादुके च कुरुविन्दकलाचि भौरि[4]कास्समवहन्पुरतोऽस्य[5]।।

10.भौतिकौ रुरुधतुर्दनुजारेः धूयमानसितचामरजातैः।

मारुतैः प्रणतभूपसहस्रोत्तंसमाल्यगलदच्छपरागान्।।

11.आतपत्रमुरुमौक्तिकक्लृप्तं नीलरत्नमयदण्डमनोज्ञम्।

शार्ङ्गिणोधृतमराजत पश्चाच्चन्द्र[6]बिम्बमिव सेवितुमाप्तम्।।

[1]सोगम

[2]सनाथंतत्र

[3]मण्डपमध्ये

[4]भौति

[5]पुरतोस्य

[6]पश्चाच्चन्द्

12.मागधामधुरिमोज्ज्वलिताभिः वाग्भिरद्भुततरार्थवतीभिः।

विष्टरश्रवसमिष्टदमीशं तुष्टुवुस्सदसि हृष्टमनस्काः।।

13.भूमिनम्रमकुटीतटरत्नज्योतिषां विततिभिर्नरपालाः।

तस्य पादशतपत्रनखानां चक्रुरार्द्रमिव यावकरागम्।।

14.स प्रसादसुमुखो निजदृष्ट्या स्यन्दमानकरुणामृतवृष्टया।

स प्रसादमकरोन्नृपलोकं ज्योत्स्नयेव कुमुदाकरमिन्दुः।।

15.उच्चकैरुपजगुस्तमधीशं चक्रलाञ्छित[1]मुदञ्चितकीर्तिम्।

वारवामनयनाः चिरमग्रे वल्लकीस्वरमनोहरकण्ठ्यः।।

16.जीवितं हरति पञ्चशरोमे त्राहिमामिति पुरो मुरशत्रोः।

कापिवारवनिताधृतलक्ष्मीभूमिकाभिनयति स्म वराङ्गी।।

17.पश्यतस्सपदि संसदि लक्ष्मीनाटकं नरकदानवशत्रोः।

अस्फुरद्दिनकरात्मकमुद्यत्पुण्डरीकसदृशद्युतिचक्षुः।।

18.सर्वमङ्गलगुणाकरभूमेरद्य हन्तममविस्तृतकीर्तेः।

दक्षिणाक्षिचलनं किमपूर्वं साधयेदिति विचिन्तयतीशे।।

19.कश्चिदेत्यतरसाप्रणिपत्य प्राणनाथमुदधेः प्रियपुत्र्याः।

तं व्यजितप[2]दुदारचरित्रं कञ्चुकीविधृतकाञ्चनवेत्रः।।

20.सूर्यवंशमणिना गुणधाम्ना प्रेषितः क्षितिभुजा द्विजमुख्यः।

देवपादयुगमद्यदिदृक्षुः द्वारदेशमधितिष्ठति कश्चित्।।

21.इत्युपात्तवचनं मुरवैरी किञ्चिदात्तकुतुकः कुशलात्मा।

तं प्रवेशय महीसुरमत्रेत्युक्तवानुपचितस्मितवक्त्रः।।

22.सौविदल्लकवरेण तदा तु तं प्रेवेशितमनिन्दितवेषम्।

[1]छत्रलाञ्छित

[2]व्यजिज्ञप

वीक्ष्यसादरमवन्दत तद्भूसंज्ञया च निषसाद समीपे।।

23.पृष्ट एष जगतां निखिलानां नायकेन मणिमण्डपभाजा।

व्यक्तमेव स निजागमहेतुं वक्तुमारभत राजपुरोधाः।।

24.अस्ति विस्तृतयशो गुणराशिर्नीतिमान्नृपवरो निहतारिः।

कामदः कमलदृक्करिकालो नाम रामसदृशः क्षितिपालः।।

25.धूर्वहो द्युमणिवंशनृपाणां दुन्धुमार[1]भरतप्रतिमो यः।

राजते मधुरकिन्नरगीतप्रौढसंयुगयशः परिवाहः।।

26.आन्ध्रपाण्ड्यमलयालकलिङ्गक्ष्मापमौलिकुरुविन्दमहोभिः।

बालसूर्यकिरणैरिवगाढं लिह्यते किल यदङ्घ्रिसरोजम्।।

27.सज्जनक्रमहितस्सततं यः श्रीप्रसूतिरुरुरत्ननिधानम्।

भूभृताञ्च गतिरुन्नतमूर्ध्नां भूतलेऽष्टम[2] इवाम्बुधिरिन्धे।।

28.यत्प्रतापदहनस्फुरदाज्ञामारुतोन्मिषितहेतिसमूहः।

उत्पथोरुजलदुर्गविलग्नानप्यलं दहति चित्रमरातीन्।।

29.यस्य पाणिफणिपुङ्गवजिह्वाराजमण्डलपराभवराहुः।

दुष्टकण्टकसमूहकुठारो दीप्यते[3] शिततरः[4] करवालः।।

30.मेदिनीवलयमालयमुच्चैः संपदां वहति नीलतराभम्।

लीलयाङ्गदमिवाङ्गदतेजा यो भुजेन भुजगेन्द्रनिभेन।।

31.तस्य तादृशगुणस्य मनोज्ञा रत्नजालमयसालपरीता।

[1]दुन्दुमार

[2]भूतलेष्टम

[3] Emended, original version दीप्यदे

[4]दीप्यदेशिततरः

उत्सवैरुपचितेक्षणसौख्या विद्यते हि नगरी निचुलाख्या।।

32.यत्र पङ्कजदृशां नवगीताकर्णनाद्रविशताङ्गहयेषु।

मन्दमन्दमपयात्स्वतिदीर्घं जायते दिनमृतुष्वपि षट्सु।।

33.यागभीरपरिखावलयेन प्रौढसालवलयेन च नित्यम्।

वेष्टिताविजयते निधिनापाञ्चक्र[1]वालगिरिणा च महीव।। ---- upamaa

34.यत्र नक्तमुडुनायकबिम्बं तोरणाग्रमुकुरोपरिसक्तम्।

शाणचक्रमधिरोपितमङ्कोल्लेखनाय विधिनेव विभाति।।

35.अन्तिकापतितमर्धशशाङ्कं यत्र तुङ्गतरसौधनिषण्णाः।

सुभ्रुवस्स्वचिकुरोदरलब्धैः पूरयन्ति निशि केतकबर्हैः।।

36.यत्र वीथिततयः कमनीयैराचिताविविधरत्नसमूहैः।

पाकशासनशरासनशङ्कामन्तरेणजलदञ्जनयन्ति।।

37.तीररूढतरुणक्रमुकाली पालिकानियतवासितपूरा।

यत्समीपभुविसह्यतनूजा निम्नगा वहति निर्मलतोयम्।।

38.सुभ्रुवां कुसुमकेलिरतानां पाणिपल्लवरुचारुणितेषु।

श्यामलद्रुमदलेषु युवानो यत्र पल्लवधियं रचयन्ति।।

39.तां पुरीं भवनरत्नमरीचिस्तोमदत्तदिननायकदैन्याम्।

आवसत्यनुमपमो[2] भुविसोऽयं धर्मवर्ममहितोधनदश्रीः।।

40.तस्य धर्मकवचस्य सधर्मिण्युज्ज्वलस्य निचुलापुरभर्तुः।

धर्मदेतिशशिवंशपताका रोहिणीव शशिनः किल जाता।।

[1]निधिनापांचक्र

[2]सत्यनुपमो

41.आर्तबुद्धिरनपत्यतयोर्वी पालफालतिलकाङ्कितपादः।

इन्दिरां प्रति तपोवनमध्ये कर्तुमैच्छदनघस्सहपत्न्या।।

42.शुभ्रवारणचतुष्टयशुण्डाहेमकुम्भपतयालुभिरद्भिः।

सिच्यमानमहनीयशरीरां शङ्खपद्मनिधिसेवितपादाम्।।

43.बिल्वकाननगताम्बुजवापीपुण्डरीकरचिताश्रमकृत्याम्।

अष्टशक्तिहरिरीश्वरराजत्पार्श्वभागरुचिरां महनीयाम्।।

44.जातरूपवरणावरणाङ्गां चम्पकद्युतिसहोदरवर्णाम्।

शारदामृतमयूखविलासद्वैतवादचतुराननशोभाम्।।

45.ऊर्ध्वपाणियुगलेन च पद्मानप्यधस्तनकरद्वितयेन।

आनताभयवरौ च दधानामप्रमेयकरुणाप्लुतचित्ताम्।।

46.उन्नतस्तनभरानतमध्यामुल्लसत्कुवलयोपमनेत्राम्।

निर्निमित्तदरहासविलासां निर्जरद्रुमसुमोज्ज्वलकेशीम्।।

47.तादृशीं तरुणिमोज्ज्वलगात्रीं देवतां हृदि निधाय दयालुः।

तां जपन्प्रकृतिमेव तदास्थत्बिल्वमूलनिलयां प्रपदेन।।

48.पद्मबीजवलयेन स राजा राजते स्म रविवंशधुरीणः।

पुष्पवृक्ष इव नीलिमभाजा मण्डलेन च लता भ्रमराणाम्।।

49.मञ्जुकुञ्जदलिसंकुलचूते माधवे मधुरकोकिलकण्ठे।

पञ्चबाणभुजवीर्यमुदारम्मन्यते स्म स तृणाय महीपः।।

50.वारिराशिरिववीचिसमूहैः शीतरोचिरिवरश्मिनिकायैः।

केसरीव च सटासमवायैः द्योतते स्म स जटानिकुरुम्बैः।।

51.कुर्वतः पृथुतपः क्षितिजानेः ग्रीष्मके सवितुरूष्मभिरुच्चैः[1]।

[1]रुचैः

तप्तमप्यभवदाननमस्य प्रत्युषः स्फुटितपङ्कजकान्तम्।।

52.प्रावृषिप्रचुरगर्जितचण्डैः प्रेषिता जलधरैर्जलधाराः।

आत्मनिद्रुतमसौ निपतन्तीः नावबुध्यत निरूढसमाधिः।।

53.कामिनीवदनकान्तसरोजं कामचामरमनोहरकाशम्।

शारदन्दिनमसोढरमायाः केवलं करुणया हृतचेताः।।

54.कण्ठदघ्नसलिलेषु सहस्ये निष्ठितस्य नृपतेर्हिमराशिः।

आक्षिपद्वदनपङ्कजलक्ष्मीमन्तरेण निखिलाम्बुजकान्तिम्।।

55.धर्मवर्मणिधराधिपतुल्ये धैर्यशालिनि तपश्चरतीत्थम्।

बृंहितं बृहदिभप्रवराणां श्रूयते स्म घननादगभीरम्।।

56.गण्डभित्तिविगलन्मदधाराशीकख्यतिकराधिकमन्दाः।

कर्णतालजनुषः पवमाना दन्तिनां समचरन्क्षितिपाग्रे।।

57.दन्तिनां तुहिनशैलनिभानां बृंहितेन बृहदभ्ररवेण।

कर्णतालमरुता च तदा सा लोचने समुदमीलयदाशु।।

58.श्रीरथाविरभवत्स्मयमाना सन्निधौ क्षितिपतेर्दयमाना।

केशवप्रणयिनी महनीया मङ्गलानि भजतां विदधाना।।

59.इन्दिराथ गजमण्डलमध्ये सुन्दरा कनकगौरशरीरा।

राजते स्म रमणीयविलासा तत्क्षणं तटिदिवाम्बुदमध्ये।।

60.श्रीरदृश्यत तदा गजशुण्डालग्नहेमकलशामृतसिक्ता।

भूतकीर्तिरतिगीर्धृतदीपछत्रचामरसुवर्णकलाची।।

61.अन्तराशयसरोजनिवासामिन्दिरामथ बहिश्च विलोक्य।

हर्षजैरविरलाश्रुनिपातैः हर्षमारचयति स्म नरेन्द्रः।।

62.मङ्गलप्रसवभूरविकर्मा मङ्गलगगज[1]दानविभूषा।

मञ्जुलद्युतिरियं ह्यपरोक्षेत्यञ्जलिं रचयति स्म नरेन्द्रः।।

63.पद्मगर्भनिलये मधुशत्रोर्बाहुमध्यनिलये लयहीने।

चित्तपद्मनिलये विनतानां श्रीजयेत्ययमवन्दत देवीम्।।

64.श्रीरथास्यतपसा स्थिरभक्तेस्तादृशस्तुतिगिरापि च तुष्टा।

उक्तवत्यवनिपं नियमात्ते तोषितास्मि वृणुकाममिहेति।।

65.तन्निशम्य वचनं कमलायास्तादृशस्य तपसस्स हि कर्ता।

दण्डवद्भुवि निपत्य दयालोरग्रतो निजमुदैरयदिष्टम्।।

66.शाश्वते भगवतीव[2] कुमारी शातकुम्भनिकषाधिकगौरी।

दिव्यरूपललिता कुलभूषा कापि कोकनदवासिनि भूयात्।।

67.इत्युदीर्य चरणे कमलाया न्यस्तमौलिमवनीतलचन्द्रम्।

ईरितस्तुतिपदन्नितरामुत्तिष्ठवत्ससहसेत्यवदच्छ्रीः।।

68.अब्रवीत्तमहमेव हि राजंस्त्वत्कुले जननमद्य करिष्ये।

आन्तरं करणमातकृपम्मे हन्त भक्तपरतन्त्रमवेहि।।

69.इत्यभीप्सितवरं वरदा श्रीः संप्रदायसहसाक्षितिभर्ते।

अञ्चितस्मितमुखी[3] व्यवधानं प्रापदाशुधनमूलकला सा।।

70.सोऽपि लब्धवर एव नरेन्द्रः सोमकान्तवदनो विपिनान्तात्।

निर्गतो निजपुरीं निचुलाख्यां प्राविशत्प्रमदनिर्भरपौराम्।।

71.धर्मविद्रहसि हर्म्यनिवासी चोलभूपतिरुदारविलासः।

[1]मङ्गलगजदान

[2]शाश्वे&भवतीव

[3]तस्मिथमुखी

मन्दिरेषु मृगनाभिसुगन्धिष्वात्मयौवनमशून्यमकार्षीत्। ।

72.केषुचिद्यपगतेषु दिनेषु स्वीयगर्भकलयानृपभूत्यै।

धर्मदामथ रमा विशदात्मछाययेव मुकुरोदरमज्ञा। ।

73.चोलराजमहिषी तरुणी सा धर्मदातरुणतामरसाक्षी।

प्रार्थनाफलमिवात्तशरीरं गर्भलक्षणमधत्त नतभूः। ।

74.अब्धिवीचिरिव विद्रुमवल्लीमाहृतारणिरिवानलशक्तिम्।

मेदिनीवनिधिसंपदमेषा मोदिनी श्रियमधादथगर्भे। ।

75.मीलितत्रिवलिमध्यमुरोजं नीलिमोदयसमुल्लसदग्रम्।

आननञ्च शरपाण्डरमस्या[1] दौहृदश्रियमयत्नमवोचत्। ।

76.रोमराजिरुदरे नतनाभे[2] रोचते स्म नरदेवमहिष्याः।

बिम्बितेन मधुपावलिरन्तस्सिन्धुजाकरसरोरुहलग्ना। ।

77.गर्भवासरसिकाम्बुधिकन्या सेवनागतगजेन्द्रविमुक्ता।

दानवेणिरिवमध्यविलग्ना शोभतेऽथ[3] नवरोमलतास्याः। ।

78.गर्भवीक्षणरसानतिभाजो बिम्बितः कुचतटे वदनेन्दुः।

कुक्षिलीनकमलाकरखेलत्पुण्डरीकमतिकृतक्षणमासीत्। ।

79.सोदरीञ्जल[4]धिजामुदरस्थां द्रष्टुकाम इव पाण्डिमलक्ष्यात्।

शारदेन्दुरसितायतकेश्यास्सन्निधानमकृताननबिम्बे। ।

80.इन्दिरां प्रियसखीमुदरस्थामीक्षितुं क्षितिरसोढवियोगा।

अंशितानुकमलाविशदन्तस्सौहृदात्किलनरेन्द्रमहिष्याः। ।

[1]शरपाण्डुरमस्या

[2]नतनाभेः

[3]शोभतेथ

[4]सोदरींजल

81.सालसा सपदि गन्तुमशक्ता पाणिपद्ममममवलम्ब्यसखीनाम्।

वीक्षणाक्षमविलोलतराक्षी वेश्मभूमिषु पदान्यकरोत्सा।।

82.एवमुल्बणमनोहरगर्भां तां विलोक्य महिषीं क्षितिभर्तुः।

हर्षमन्तरभजन्प्रियसख्यस्तन्मुखेन्दुविनिवेशितनेत्राः।।

83.एकदा तु मणिमण्डपभाजं भूमिपालमवदद्दिवसान्ते।

एत्य काचन महत्तरिका ते गुर्विणी किल महिष्यधुनेति।।

84.तन्निपीय वचनामृतमस्याः सोऽत्रमार्गचुलकात्करिकालः।

प्रीयमाणहृदयः पृथुलक्ष्मी रङ्कुरत्पुलकमङ्गमधत्त।।

85.पूर्णपात्रमुचितं बहुतस्यै भूमिपालतिलकस्सवितीर्य।

आनतानथ विसृज्य नरेन्द्रानास नाद[1]पजितारिरुदस्थात्।।

86.दीपिकाद्वयनिवारितकक्ष्या ध्वान्तसंहतिरभङ्गुरतेजाः।

सेवितः परिमितैः परिवारैराप्तमोदमवरोधमयासीत्।।

87.तत्र वासभवने सुनिषण्णां सन्ततज्वलितमङ्गलदीपे।

अङ्गलग्नविषधौषधिभूषामैक्षत प्रियतमां करिकालः।।

88.कुक्षिसन्निहितकोमलगर्भां बह्वमन्यत नृपो मदिराक्षीम्।

पद्मरागखनिभूमिमिवान्तः प्रस्फुरन्मणिमुदञ्चितरागाम्।।

89.पठ्यमान हरिनामसहस्रैः ब्राह्मणैरनुमतैश्च भिषग्भिः।

मन्त्रयन्त्रकुशलैश्चमहीपो गर्भरक्षणमकारयदस्याः।।

90.केषुचिद्यपगतेषु दिनेषु क्ष्मापतेरभिमता हरिणाक्षी।

मासि वै जनन ऊर्जितलग्ने मङ्गलाकृतिमसूत कुमारीम्।।

91.झल्लरीपणवडिण्डिमवीणाशङ्खकाहलमृदङ्गनिनादैः।

[1]दासनाद

प्राणिनामपि शुभोक्ति सहस्रैः पूरितन्नरपतेः[1] पुरमासीत्।।

92.दिङ्मुखानि विमलानि तदानीं मानसे न सहपौरवधूनाम्।

बाष्पवृष्टिरभवज्जनहर्षात्पुष्पवृष्टिरपि निर्जरहर्षात्।।

93.जन्मनाथ जननाथ कुमार्याः सन्ततप्रहतमङ्गलवाद्यः।

उत्सवः परमवर्धत वार्धिर्दर्शनादिव निशाकरमूर्तेः।।

94.जृम्भमाणनवगुग्गुलधूमा मोदवासितसमस्तदिगन्तम्।

सुप्रसन्नहृदयो नरनाथस्सूतिकागृहमगाच्छुभवेषः।।

95.मातुरङ्कशयनेमहनीयां सर्वलोकनयनोत्सवराजम्।

तत्र वीक्ष्य तनयामनवद्यां तादृशीं परममोदत भूपः।।

96.सर्वमङ्गलनिवासधरित्र्या जन्मना जलधिराजकुमार्याः।

तात एव न परं मुदमाप्तो वैभवैरनुपमैरपि लोकः।।

97.ब्राह्मणैः प्रकृतशान्तिविधानैः वेदघोषमुखरैस्सहपुत्र्याः।

शोभने स विहितेऽहनिलक्ष्मीरित्युदारमभिधानमकार्षीत्।।

98.उन्नतद्युमणिवंशपताकां सम्पदम्बुधिसुधाकरलेखाम्।

आह्वयत्यखिलबान्धवलोको वत्सलेन निचुला लतिकेति।।

99.कन्दुकैः कनकपांसुविहारैर्लालनेन च पितुर्ललितेन[2]।

वेदिकागणविहारविशेषाच्छैशवं तदपनीतवती सा।।

100.उन्मिषन्मणिविभूषणरम्यामाविशन्नथकलास्सकलास्ताम्।

निर्मला निखिललोकपवित्रा निम्नगा इव पयोनिधिवेलाम्।।

101.तत्र सा तरुणिमोदयरम्या वल्लिकेव कुसुमोद्गमकान्ता।

[1]पूरितंनरपतेः

[2]लालनेनपितुरुल्ललितेन

गन्धहस्तिकट[1]भूमिरिवैषा दानवारिदयिताद्य विभाति।।

102.रूपयौवनविलासविशेषैः भूषितापि धृतरत्नविभूषा।

उत्तमा त्रिभुवनप्रमदाना[2]मुल्लसत्युरुपयोधरकुम्भा।।

103.तामिमान्तरु[3]णिमोज्ज्वलगात्रीन्तादृशीं[4] प्रभुरवेक्ष्य समीपे।

अद्यचैतदनुरूपवराप्त्यै हृत्स्वयं वरविधौ विदधाति।।

104.तत्स्वयं वरनिमित्तमिदानीं देवताश्च दनुजाश्च समेताः।

तत्र चात्र भवता मुरवैरिन्सन्निधिस्सहबलेनविधेयः।।

105.प्रेषिताखलुतयाहरिलेखेत्याप्तनाममहितामदिराक्षी।

त्वत्पदाम्बुजविलोकनसक्ताद्वारितिष्ठतिहरेशुभमूर्ते।।

106.सेयमान्तरतमा किल तस्या मध्यालोकपरिपालकपुत्र्याः।

वाचिका मृतरसैश्श्रवसोस्ते संविधास्त्यतिमहोत्सवमद्य।।

107.अन्तरानय नरेन्द्रकुमारीं वाचिकाञ्चितकरां वनजाक्षीम्।

तारकं स्मररसाध्ययनां____तादृशं शृणु रहस्यविलासम्।।

108.इत्यूचिवान्विलसितस्मितकन्दलेन

सानन्दमोमिति समर्थितनिर्णयेन।

मुक्तोर्ककोटि[5] महसा मुरशासनेन

नित्योत्सवैर्निरुपमां निचुलामयासीत्।।

[1]गन्धहस्तकट

[2]प्रमादाना

[3]तामिमांतरुणि

[4]गात्रींतादृशीं

[5]मुक्तोऽर्ककोटि

109.देवो यस्य भुजङ्गभोगशयनश्श्रीरङ्गराजो हरिः तातः

काश्यपचक्रायविबुधो लक्ष्मीर्जनन्युत्तमा।

तस्यै वोत्तमनम्बिसत्तिरुमलाधीश प्रबन्धुःकृतौ

लक्ष्मीकाव्य उदारवैभवनि धौसर्गोगत स्सप्तमः।।

अथ अष्टमस्सर्गः

1.अथ सा हरिणेक्षणा[1] हरेरनुमत्या मणिमण्डपाङ्गणम्।

अविशत्करिबृन्द सेवितं हरिलेखा हरिचन्दनोज्ज्वला।।

2.अनया सदृशी कथं भवेत्तनया सा नृपतेस्तलोदरी।

इति तं विमृशन्तमच्युतं प्रणनामाङ्घ्रिसरोरुहद्वये।।

3.इत एहि निषीदसन्निधावयि भद्रे भज विशमं शनैः।

इति सा विभुना प्रसादिता भृशमानन्दमवाप दूतिका।।

4.मुरशासनपादपीठिका निकटे सा निभृतं निषेदुषी।

गदितुं विजनेऽत्र वाचिकं नयने पार्श्वचरेष्वपातयत्।।

5.उपलभ्य तदिङ्गितं शनैरुपजातस्मितकन्दलाननः।

निजभृत्यगणं नृपानपि प्रविसृज्याभवदेक एव सः।।

6.प्रचुरोत्कलिकासमाकुलः परितस्सिन्धुरसानुवेष्टने।

अजिरे स तया सह स्थितो निजशत्र्यैव युगान्तवारिधौ।।

7.अथ सा रहसि त्रपान्नि[2]जामवमत्यैव सखीष्टसिद्धये।

अवदत्प्रभुमुन्मुखं रसादमृतौपम्यधुरन्धरं वचः।।

[1]हरिणोक्षणा

[2]त्रपांनिजाम

8.जगदेकपते तवाग्रतो गदितुं न प्रभुरात्मभूरपि।

किमुत त्वदुपासनाविधानवसीतुम्मतिरङ्गनाजनेः।।

9.मुखरीकुरुते तथापि मां प्रियसख्यास्त्वयि भक्तिरुज्ज्वला।

तदिदं हि तदीयवाचिकं शृणु चेतस्य पिधेहि धीनिधे।।

10.करिकालनृपालपत्तनप्रवरासन्नतले प्रसृत्वरी।

सरिदस्ति कवेरसंभवा स्फुरदम्भोजपरागपाटला।।

11.लहरीशतघट्टनान्मुहुः पतितैरुच्छ्रयिभिस्स्वतीरजैः।

हरिचन्दनभूरुहैर्नवैः परितोयापरिवासितोदका।।

12.जलमानुषवाजिवारणास्तटमारुह्ययदीयमुन्नतम्।

क्षपयन्ति जडत्वमात्मनो ज्वलितैरोषधिभिः प्रतिक्षपम्।।

13.तटचम्पकपुष्पमञ्जरीप्रतिमास्वच्छतरेयदम्भसि।

भजते जलदेवता जनस्फुरदारात्रिकदीपविभ्रमम्।।

14.द्रमिडीकुचमण्डलद्वयी नवकस्तूरिनितान्तमेचका।

तरुणेन तमालरोचिषा फलदेनोज्ज्वलकण्टकानना।।

15.क्रमुकप्रकरेण या त्वया बहुरूपेण यथा विराजते।

यदुदञ्चितवीचिपालिका नियतारोपितमौक्तिकाङ्किता।।

16.दधते तटभूरुहस्फुरत्सुमपुन्नागसमूहविभ्रमम्।

जलकेलिनिरूढमानसद्रमिडस्त्रीमुखबिम्बसंपदा।।

17.द्विगुणीकृतपद्मकाननद्युतिराभाति दिवा निशञ्चया।

मखपावकधूमराशयो महिते यत्तटतापसाश्रमे।।

18.जलदामधुरञ्चनिर्मलञ्जल[1]मादातुमिवादराद्गताः।

[1]निर्मलंजल

अतितुङ्गतटद्रुमावली शिखरस्थैर्नवशारदाम्बुदैः।।

19.महिषीसरितामधीशितुर्विमलच्छत्रवतीव भाति या।

वलशासनसैन्यपालनस्थिरधीर्यत्तटसीम्नकान्तिमान्।।

20.अकरोदतिदुष्करन्तपश्शरजन्माकिलशक्तिलब्धये।

उपकूलविरूढकेसरद्रुमपुष्पासववृष्टसंपदा।।

21.परिवृद्धतरेयदम्भसिभ्रमराणां निपतन्ति पङ्क्तयः।

भवदालयगोपुरेशितुर्बलभद्रस्य सुधामलत्विषः।।

22.विकचोत्पलनिह्नुतोदकानवनीलाम्बरतामुपैति या।

भवदुन्नतसालमण्डलीतरणाशक्तिनिकामविह्वला।।

23.पतिता भुवि या विनिर्मला कुमुदैस्सिद्धनदीव दृश्यते।

अमलासु यदूर्मिसन्ततिष्वमृतांशुप्रतिबिम्बमण्डलान्।।

24.रजनीषु चलद्विपावलीदधिमिश्रान्कबलानिवेक्षते।

मधुपा मरुदाहताकुलभ्रमरीगाढकृतोपगूहनाः।।

25.पतितास्सह केतकैर्दलैः श्रितनौका इव भान्ति यज्जले।

उदधेर्महिषी विभाति या तनया सह्यगिरेरनुत्तमा।।

26.जगतः कुशलानि कुर्वती पवनाधः कृतपापसञ्चय्य[1]।

निचुलापुरनाथनन्दिनी सहिता जातुसखीगणैरिमाम्।।

27.जलमज्जनकेलिलालसा जननी सा ह्यवतीं समागमत्।

कमनीयकवेरजातटीविविधारामविलोकनोत्सुका।।

28.व्यचरच्छनकैरितस्ततस्सममालीभिरुदारदर्शना।

अवलोकयति स्म तत्र सा तरसा यान्तमनीकवारिधिम्।।

[1]संचया

29.करिबृन्दगिरिहयोर्मिकं विपुलस्यन्दनयानपात्रकम्।

अधिरूढतुरङ्गमोत्तमन्धृत[1]दिव्याभरणं तदन्तरे।।

30.अवलोकयति स्म सा सखी तरूणी देवभवन्तमादृता।

निरवग्रहनित्ययौवनं तव रूपं तरूणीरसायनम्।।

31.अपिबन्मुहुरादृता च सा निभृतन्निश्चल[2]तारया दृशा।

पुनरुक्तनवोत्पलप्रभा स्फुरणा त्वां स्फुटपङ्कजेक्षणम्।।

32.अकरोन्मुहुरक्षिवल्गनैरभिषिक्तं यमुनाजलैरिव।

_____

33.समये किल तत्र मे सखिं सहसा मण्डलितेक्षुकार्मुकः।।

व्यधमद्विषमायुधोदृढं हृदिसम्मोहनपत्रिणाप्रभो।

34.अविनश्वररूपसंपदं स्मरमक्षीणरुचिं क्षपाकरम्।

मलयानिलमात्तविग्रहं तरुणी त्वां भगवन्नमन्यत।।

35.प्रणयादवलोकयन्त्यलं वरद त्वामनिमेषया दृशा।

अधिरूढवती तदा क्षणादतिभूमिं मदनज्वरस्य सा।।

36.श्रमवारिकणोल्लसन्मुखी धृतरोगो[3]द्गमकञ्चुकस्तनी।

शिथिलाकुलकेशबन्धना समभूत्सन्निहिताङ्गवेपथुः।।

37.अथ मन्मथसंज्वरालसा विवशा विश्वमिदं तमोमयम्। [4]

कलयन्त्यवनीतले लुठन्त्यगमन्मोहमतीव दुस्सहम्।।

38.अथ वीथिविहारमन्त__ विदधानस्यमरुद्वृधातटे।

[1]तुरङ्गमोत्तमंधति

[2]निभृतंनिश्चल

[3]दृतरोमो

[4] Emended, original - विश्वमिदंमयम्

न्यपतत्तव पाणिपङ्कजान्नवरत्नाङ्गुलिमुद्रिका हरे।।

39.अभितापवती परिभ्रमन्त्यनघा तादृशमङ्गुलीयकम्।

उपलब्धवती यदृच्छया व्यमुचन्मोहमतो विलासिनी।।

40.किमिदम्ममसौख्यकारणं करसंलग्नमितीरयन्त्यसौ।

अभजन्मुदमङ्गुलीयके तव नामाक्षरवीक्षणात्सखी।।

41.तुरगोत्तमसादिनि त्वयि त्वरया नाथ गते यथागतम्।

स्वयमप्यगमच्छनैर्गृहं सह मात्रा च सखीजनेन च।।

42.अथ नाथ तदा प्रभृत्यसौ भवदारब्धकभाविताशया।

भवदङ्गुलिमुद्रिकेक्षणात्परमास्ते धृतजीविता सखी।।

43.कमला विधृताङ्गुलीयका सहसोद्यानमुदारकोकिलम्।

गतवत्यधिकं कदर्थ्यते सुमनोभिर्यदिदं किलाद्भुतम्।।

44.अतिमन्मथविभ्रमो भवान्दिशि यस्यां विहरत्युदारधीः।

बहुमन्यत एव मे सखी तत आयातमपि प्रभञ्जनम्।।

45.तव वाचि रतिर्न पञ्चमे तव वक्त्रे न सुधांशुमण्डले।

तव दन्तवरांशुकन्दले न च काकोलिदले नतभ्रुवः।।

46.न ददाति च पृच्छते गिरं न दृशं चालयतीष्टवस्तुषु।

न शृणोति सखीजनेरितं निशि निद्राति न पद्मलोचना।।

47.बत बालतमालकन्दलं वलभिन्नीलमणिञ्चवारिदम्।

बलवद्बहुमन्यते सखी तव सावर्ण्यधरं तलोदरी।।

48.कुचयोर्निहितां सखीजनैर्नवनीलोत्पलमालिकां सखी।

अनुकल्पमदैव ते हरेः पु__योः पुञ्जितवंशरोचिषोः[1]।।

[1]पुञ्जयोःपुंखितवंशरोचिषोः

49.भवदाननबिम्बसन्निभान्यरविन्दानि सखी जनो मुहुः।

क्षिपतिस्तनमण्डले मुखे नयने बाहुयुगे नतभ्रुवः।।

50.अतितीक्ष्णमनोभवज्वरद्विगुणीभूतपयोधरोष्मणा।

क्थितं परितापवर्धनं भवति स्निग्धपटीरलेपनम्।।

51.वपुरिछति वामचक्षुषस्तव गाढं परिरम्भणं मुहुः।

नयनं वदनावलोकनं श्रवणं श्रोतुमशेषविक्रमम्।।

52.परितः परिवीज्यते मुहुर्व्यजनैः पद्मपलाशकल्पितैः।

शयनाछयनं सखीजनैरनया शायितयाद्य भूयते।।

53.तनुलग्नपदाग्रयावकारुणशय्याकुसुमोत्करा सखी।

मुहुरालिजनैर्विभाव्यते मदनोत्तप्तसरूचितेव सा।।

54.मदनज्वरजातवेदसा परितप्ता परितस्स्फुरत्प्रभा।

तपनीयशलाकिकेव सा तनुतामेति भृशं तलोदरी।।

55.नवपाणि _____ नाभिषङ्किल चूतो मृदुमारुतेरितः।

मकरन्दरसोज्ज्वलस्स्पृशत्यशरीरिज्वरविह्वला मुहुः।।

56.मकरध्वजकाहलोपमैर्मधुमासः कलकण्ठनिस्स्वनैः।

तरुपल्लवतल्पशायिनीं तरुणीं तर्जयति स्फुटं सखीम्।।

57.सहसा सहकारमञ्जरीमकरन्दासवपानदुर्मदाः।

भ्रमराश्श्रुतिभीषणैस्स्वनैरधुना व्याकूलयन्ति[1] मे सखीम्।।

58.सुदृशास्स्मरवह्निशान्तये निहितात्पुष्पचया त्परिच्युतम्।

परितो हि परागमण्डलं समतामेति तदीयमुर्मुरैः।।

59.नवचन्दनलेपपाण्डुराकृशभावं गमिता कृशोदरी।

[1]भीषणयन्ति

मृदुपल्लवतल्पसन्न्यया कलिता चन्द्रकलेव दृश्यते।।

60.मलयाद्रिसमीरकन्दलैर्बत सन्धुक्षितमन्मथानला।

अभिवाञ्छति ते कृपारसं विनतातङ्कविनोदनप्रभो।।

61.भगवत्करशाखयाधृता भवती धन्यतमा जगत्त्रये।

इति तेऽङ्गुलिमुद्रिकां हरे स्वकरस्थां सुतनुः प्रशंसति।।

62.अनुरूपमिदं महाकुलप्रभवानान्नहि[1] योषितामिति।

कुसुमायुधसञ्ज्वरा[2]कुला कुलभूषा मुहुरुच्यते सखी।।

63.क्षणमात्रमिवानतानना सहसा वक्रि समर्थमुत्तरम्।

गदितुं ननु शक्यते त्वया स्मरबाणाविषयान्तरात्मना।।

64.इति वाचमुदीर्य कामिनी[3] स्वकरान्मोचितमङ्गुलीयकम्।

मम हस्तगतं विधाय सा पुनराभाषत पुञ्जितव्यधा ।।

65.इदमुज्ज्वलमङ्गुलीयकं तरलम्मे हृदयं बहिस्स्थितम्।

अभिजातविलाससंपदे हरये देयमुदारचेतसे।।

66.भगवान्करुणानिधिस्स्वयं हरिरागत्य समानयिष्यति।

विकचोत्पलमालयेव मां भुजया शीतलया स्मरातुराम्।।

67.अनिमित्तमनोहरेण मान्दर[4]हासेन दयापरो हरिः।

सुधयेव दृशा च दीर्घया सुखयिष्यत्यधुना सुदुःखिताम्।।

68.कुलजस्य कुमारिकामनः परिमोषः किमयं समञ्जसः।

इति मद्वचनञ्च रङ्गिणश्श्रवसी प्रापय सत्यवादिनि।।

[1]प्रभवानांनहि

[2]संज्वरा

[3]भामिनी

[4]मनो&मांदर

69.इति वाचमुदीर्य सुभ्रुवा[1] तव पादान्तिकमद्य सादरम्।

प्रहिताहमतः परं हरे कुतुकिन्यां करुणां कुरु प्रभो।।

70.इति सा चतुरामुरारये मृदुविज्ञाप्य वचो मृगीदृशः।

अभिजातमदाच्च तादृशं हरिलेखाग्र्यमथाङ्गुलीयकम्।।

71.अथ हृष्टमनाश्चतुर्भुजो हरिलेखा वचनामृतश्रवात्।

मणिमण्डनमग्रहीत्स्वयं कमलाचित्तमिवाङ्गुलीयकम्।।

72.अवलोक्य जनार्दनश्शनैरथलक्ष्मीरिति नाममुद्रितम्।

मणिमण्डनमङ्गुलीयकं मुहुरायल्लकमुद्रितोऽभवत्।।

73.मणिकल्पितमङ्गुलीयकं मुहुरालोकयतो मुरद्विषः।

समजायत सात्विकोदयस्त्वतिधीरप्रकृतेरपि क्षणात्।।

74.पुलकाङ्कुरभूषितो हरिस्स्फुटघर्माम्बुकणावलिर्बभौ।

विलसन्मुकुलोहिमाम्बुभिस्स्फुटशाखः किल नीपपादपः।।

75.अनुरागममुष्यमन्मथो मुहुरुद्वेलमकल्पयत्क्षणात्।

उदधेरिवमेचकाकृतेः कृतमुक्तात्विकृतेर्जलं शशी।।

76.अथ चोलनरेन्द्रनन्दिनीमधिकृत्याद्य किमुत्तरं हरे।

इति तामनुरागकारिणीं हरिलेखामवदत्कृपानिधिः।।

77.अधुना तु किमन्यदुत्तरं हरिलेखे हरिणीदृशो ब्रुवै।

गतजन्मनि मत्प्रियामिमामभिगम्यार्थयितुर्ममोद्यमः।।

78.पुष्ये पूर्णमनोरथस्सुरशिरः कोटीररत्नप्रभा

लाक्षारञ्जितपादपङ्कजनखस्तां राजधानीं प्रति।

यास्यामीत्यभिधाय वाचमतुलां कर्णामृतप्रक्रियां

[1]सुभ्रवा

विश्वेशो विससर्ज चोलदुहितुर्दूतीं प्रियालापिनीम्। ।

79.देवो यस्य भुजङ्गभोगशयनश्श्रीरङ्गराजोहरिः

तातःकाश्यपचक्रायविबुधोलक्ष्मीर्जनन्युत्तमा।

तस्यैवोत्तमनम्बिसत्तिरुमलाधीशप्रबन्धुःकृतौ

लक्ष्मीकाव्य उदारवैभवनिधौ सर्गो गतश्चाष्टमः। ।

अथ नवमस्सर्गः

1.अथ सव्यहस्तसरसीरुहस्फुरत्कमलासहायशयनीयकङ्कणः।

पुरवैरिकार्मुकगुणोपवीतवानुदियाय तस्य पुरतः खगेश्वरः। ।

2.शतपत्रनाथचरणावलोकनप्रियजातसान्द्रपुलकाभियोगतः।

अतिविस्तृतात्मफणरत्नविस्फुरत्फणिराजभूषणसमुज्ज्वलाकृतिः। ।

3.निजमातृदास्यदृढशङ्कमोचन[1]प्रगृहीतनाकनगरीसुधोज्ज्वलः।

भुजवीर्यनिर्जितसहस्रलोचनो भुजगप्रकाण्डपरिमर्दपण्डितः। ।

4.प्रथिताष्टनागकुलभूषणोल्लसद्वपुरष्टसंपदभिनन्दितप्रजः।

अतिसृष्टचित्तनियतस्सुराङ्गनाकथिताष्टदिग्विततकीर्तिकन्दलः। ।

5.करबाहुकण्ठमकुटीभुजान्तरश्रवणद्वयीकटितटेषु राजतः[2]।

प्रथितेन यस्य भुजगेन्द्रभूषणप्रकरेण पक्षपवनो निपीयते। ।

6.फणिमण्डलीमणिभवैर्मरीचिभिः स्फुरतो यदीय कटकस्य जीवतः।

कृतकेतरोरुतरपेटिकाश्रियं लभते गभीरकुहरं रसातलम्। ।

[1]शङ्कमोचन

[2]राजता

7.अतिशोणया श्रवणरत्नकुण्डलप्रभवेन यो द्युतिभरेण दंष्ट्रया।

परिपन्नगरिकायदंशनस्यशोणितारुणितयेव[1] राजते।।

8.भृशमाकिरीटचरणं विभूषितः फणिनां फणामणिमतां गणेन यः।

समुपैति पाणितलपल्लवोज्ज्वलो हरिचन्दनक्षितिरुहस्य विभ्रमम्।।

9.वपुषा मनोज्ञमणिभूषणेन[2] यो दधदिन्द्रकोपरु[3]चिमच्छकञ्चुकम्।

अवतीर्य भास्कररथादनूरुणा प्रकृतोपग्रहण इवैधते मुदा।।

10.श्रुतिकुण्डलीकृतभुजङ्गमद्वयी फणरत्नरश्मिततिमालिकायुगः।

विधिताभितः प्रसृतधातुमेखला[4] द्वितयस्फुरत्कनकशैलविभ्रमम्।।

11.द्रुतशातकुम्भरुचिदर्पहारिणा किरणेन यत्तनुभुवा विसारिणा।

नितरामिलावृतविलासमुल्लसद्वरसह्यजावहतिचोलमेदिनी।।

12.अधिकप्रफुल्लनवचम्पक[5]छविर्विलसन्निहीनकटकस्समुन्नतः।

तपनीयशैल इव यः प्रकाशते पुनरङ्कुरद्गरु _____प्रसादनः।।

13.त्रिजगद्विभूषणममर्त्यनिम्नगाशिशिरांशुजन्मचरणाब्जमानसः।

स विभूषणत्वमयते यदंसयोः गुलिकोरगाननसमीरकोष्णयोः।।

14.असमग्रनीलिमकतङ्कलमग्रतो दधर्त समुल्लसति यस्य नासिका।

बलिनां विरोधिफणिनां फणेष्ववस्करणेन लग्नगरलेव सर्वदा।।

15.महति त्रयीवपुषि[6] यत्र साञ्जलौ स्थिरकीर्तिकन्दलविभूतिनिर्मले।

हरिरात्मरूपगुणमग्रतस्स्थिते मणिदर्पणे किल विलोकयत्यलम्।।

[1]तयारुणितयेव

[2]मणिभूषणेन

[3]दधदिन्द्रकोपरु

[4]रत्नमेखला

[5]वनचम्पक

[6]मह(त्रि)तीत्रयीवपुषि

16.उपवीतवासुकि_____स्थित[1]स्तपनीयसारकमनीयविग्रहः।

नवचन्द्रिकाविलसदंशुवर्षया धवलार्ध उल्लसति यस्य दंष्ट्रया।।

17.गरुडं कृताञ्जलिपुटं पुरोगरुत्पवमाननन्दितभूषणोरगम्।

दरहासकोरकितकोमलाधरं सुचिरं विलोक्य स ननन्द नन्दकी।।

18.धृतशङ्खपालभुजगेन्द्रमस्तकस्थितरत्नकान्तिततिहल्लकस्रजा।

मकुटार्पिताञ्जलिपुटेन मौलिना प्रणनाम नागमथनो जनार्दनम्।।

19.प्रणतोत्थितं गरुडमग्रतस्स्थितं भगवानलङ्कलयति[2] स्म पाणिना।

कलशाम्बुराशितनयासमुन्नतस्तनमण्डलीकठिनतैकसाक्षिणा।।

20.विनिवेश्य शेषफणिराजकङ्कणे चरणाम्बुजं मृदुकरे प्रसारिते।

महितं किरीटमवलम्ब्य पाणिना हरिरारुरोह विहगेशमंसयोः।।

21.असुरारिरंसयुगले करद्वयेप्युरगद्विषः कनकपिङ्गरोचिषः।

निहितोरुपादकमलद्वयो बभौ तपनीयशैलकटके तमालवत्।।

22.वनमालया विपुलया समुज्ज्वलन्तमुवाह तामरसचारुलोचनम्।

हरितालवर्णसदृशोभिभञ्जनस्तपनीयभूधर इवाञ्जनाचलम्।।

23.गरुडोऽभवद्गजवरस्सकेवलं गरुदस्य चाभजत कर्णतालताम्।

अपि चाङ्कुशो हृदयमास भक्तिमद्दनुजेश्वरारिरगमन्निषादिताम्।।

24.निगमात्मनोविहगचक्रवर्तिनः कटकोरगस्सकलशब्दधूर्वहः।

प्रतिमाछलेन फणरत्नमध्यगन्तदसूययेव तमुवाह रङ्गिणम्।।

25.विपुला समण्डपगतो यतोऽगमत्[3] भगवान्सुखेन शयितुं ततस्स्फुटम्।

[1]उपवीतवाकिरस्थितः

[2]भगवानलंकलयति

[3]यतोगमत्

समुवाह कङ्कणमिषेण पाणिना फणिसार्वभौमशयनन्द्विजोत्तमः[1]।।

26.महनीयमारुतमनोजवोल्लसद्गरुडासमण्डपगतो गदाधरः।

स चराचराणि भुवनानि गोष्पदप्रतिमानि हन्त सकलान्यमन्यत।।

27.दयदाश्रयन्त्रिज[2]गतामधोक्षजं दधमानदीर्घनयनाम्बुजद्वयम्।

पतगेश एव सुकृती न केवलं तदलङ्कृता च मणिरङ्गवीथिका।।

28.गरुडस्य वीथिषु शुभासु गच्छतश्च[3]लमातपक्षपवमानपूरितः।

करकम्बुरम्बुरुहचक्षुषस्तदा व्यनदत्स्वयं विपुलकन्धराजुषः।।

29.सुगुणं सुवृत्तमकलङ्कमद्भुतं प्रकटीकृतश्रियमनर्घमञ्चितम्।

तरलेन्द्रनीलरुचिमेचकं हरिं समुवाह हारमिव पन्नगाशनः।।

30.कमलासखं सुभुजमध्यकौस्तुभद्युतिसञ्चयस्थगितदीपिकाततिः।

गतकल्मषे गरुड एव केवलं न निषीदति स्म जनतामनस्वपि।।

31.अनिलैश्शकुन्तपतिपक्षसंभवैः व्यजनोद्भवैश्च चलचामरोद्भवैः।

नलिनेक्षणस्य युगपच्चकम्पिरे नतनाभिपङ्कजदलानि तत्क्षणम्।।

32.पुरवीथिकां भवनवेदिकाद्वयीनिहितप्रदीपततिचम्पकोज्ज्वलाम्।

गमनोल्लसद्गरुडकन्धरागतोधृतभूषणावलिरलञ्चकार सः।।

33.मधुसूदनस्य भुजमध्यमालतीदलमालिकापरिमलेन मांसलः।

मरुदाववौ गरुडपक्षसंभवो धृतनाभिपङ्कजमरन्दशीतलः।।

34.दृढमार्जनाधिकगभीरमद्दलस्वनचारुनृत्तविधिना नटीजनः।

पुरवीथिकोटिषु चकार शार्ङ्गिणः प्रियमण्डजाधिपति[4]कन्धराजुषः।।

[1]शयनंद्विजोत्तमः

[2]द(य)धदाश्रयंत्रिज

[3]गच्छतः

[4]मणडनाधिपति

35.कमलासहायनिहिताङ्घ्रिभास्वतः पतगेशपाणिकमलस्य भासुरः।

बिसकाण्डतामुपगतोऽभवत्परः कटकोभुजस्य धरणीधरक्षमः।।

36.मुरशासनं गरुडकन्धरासनं वनमालिनं महितरूपशालिनम्।

अनुवेलमाचरणमौलिलोचनैः जनतार्चयद्विकसितैरिवाम्बुजैः।।

37.पवनेन वामकटकोरगाननप्रभवेन पाणिकमले गरुत्मतः।

निहितं रमापतिपदाम्बुजं भृशं गतसैन्यरेणुपटलं व्यराजत।।

38.विनताशयप्रियकरः करद्वयीनिहिताच्युताङ्घ्रिनखरश्मिकैतवात्।

अतिगाढलग्नममलं सुधारसं मुहुरुत्सृजन्निव रराज पक्षिराट्।।

39.कनकाङ्गदी मकरकुण्डली मकुटी मणित्रिसरवांस्त्रिविक्रमः।

गरुडांसयोर्गगनचारिमानसेष्वबलाजनाक्षिकमलेषु चावसत्।।

40.प्रणते जने नयनपङ्कजद्वयं विनतात्मजे सकलमङ्ग[1]मात्मनः।

निचुलालतागुणगणे च मानसं निदधे निरङ्कुशदयोदयो हरिः।।

41.भगवान्गभीरहृदयोपि सत्वभूरपिदृष्टशीतकिरणस्सुपर्णगः।

नितराञ्चचाल निचुलालतागुणस्मरणोपबृंहितमनोभवो हरिः।।

42.अवधानपूर्वमशृणोत् स सुभ्रुवाम[2]तिचारुगीतमहिवैरिवाहनः।

निचुलापुरेशतनयार्पिताशयो नयनेन केवलममानयत्प्रभुः।।

43.सहचारिणीसखचकोर[3]मण्डलीपरिपीयमानकमनीयचन्द्रिकाम्।

अवलोकयन्विपुलराजवीथिकां[4] विजहार चारुचरितश्चतुर्भजः।।

44.स्फुरदग्रहारवलयेन भूषितां गृहसौधहेमकलशीकुचोज्ज्वलाम्।

[1]निखिलमङ्ग

[2] Emended, original versionअशृणोन्नसुभ्रुवाम्

[3]सहचकोर

[4]राथवीथिकां

नगरीं नवोपवनपल्लवाधरामकरोत्प्रदक्षिणमुदारविग्रहः।।

45.मुरजिद्रथेभहयपत्तिवाहिनीपदचङ्क्रमोत्थितपरागधूसरैः।

गगने गृहीतघनकञ्चुकोऽभवत्[1] सहसा सहस्रनयनस्स सम्भ्रमम्।।

46.इति विविधविलासस्कन्धपीठेन देवन्दध[2]दहिवरभूषाभासमानो गरुत्मान्।

कनकमयकवाटद्वारमोङ्कारधाम्नो जयविजयसनाथम्मन्दमन्दं प्रपेदे।।

47.तार्क्ष्यस्यांसादचलविपुलात्सोवरुह्यावरोधं प्राप्योदग्रं विरचितनिशाकृत्यशेषस्सुवेषः।

विद्युत्कोटीविलसिततनुं वीचिमालीन्द्रकन्यां स्मारं स्मारं स्मरपरवशस्तत्र रात्रिन्निनाय।।

48.देवो यस्य भुजङ्गभोगशयनश्श्रीरङ्गराजोहरिः

तातः काश्यपचक्रायविबुधो लक्ष्मीर्जनन्युत्तमा।

तस्यैवोत्तमनम्बिसत्तिरुमलाधीशप्रबन्धुःकृतौ

लक्ष्मीकाव्य उदारवैभवनिधौ नवमस्समग्रो गतः।।

<u>अथ दशमस्सर्गः</u>

1.रजनिविलसिते गतत्रिभागे रतिपतिचोदनया स रङ्गधामा।

अचकमत विलासधामा[3] मतिविभवां प्रति चोलराजधानीम्।।

2.उदयति रजनी चतुर्थयामे कनकमयः पटहप्रयाणशंसी।

मुहुरथ मुरशासनस्य[4] भृत्यैरतिदृढकोणकरैरताड्यतोच्चैः।।

3.मधुरिपुविजयप्रयाणकाले प्रकटतरः पटहध्वनिर्महीयान्।

प्रलयजलदघोषनिर्विशेषः समजनि दारितसर्वशैलकूटः।।

[1]कोभवत्

[2]देवंदध

[3]विलासधा

[4]मुरशासनस्य

4.शयनतलविमर्दशीर्णवक्षस्स्थलहरिचन्दनकुङ्कुमैरशेषैः।

समधिकनिबिडासरोजनाभेः सुभटजनैः प्रतिहारभूमिरासीत्।।

5.प्रहतपटहवाद्यजातघोषश्चटुलतुरङ्गतरङ्गरोचमानः।

तदनु सपदि सैन्यवारिराशिः मणिचतुराननगोपुरं प्रपेदे।।

6.ज्वलितमकरकेतुपावकोपि प्रकटसमुज्ज्वलदीपिकासहस्रः।

झटिति स निरगान्निजावरोधं द्विजसमुदीरितमङ्गलस्त्रिधामा।।

7.मधुरिपुरुपगम्य बाह्यकक्ष्यामरतकमण्डपवेदिकोपविष्टाम्।

मणिगणरचितां सुवर्णपीठीमभजत वेषमसौ प्रयाणयोग्यम्।।

8.अथ दनुजसपत्नवाहनानामभिनवकाञ्चनभाण्डभासुराणाम्।

जयकरमबलाश्चिराय नीराजननिधिमुज्ज्वलभूषणा वितेनुः।।

9.मरतकमणिमण्डपात्स रङ्गी मरतकभूषणमेचकाङ्गकान्तिः।

उदचलदतिशोभने मुहूर्ते विजयकरे विनतातनूजकेतुः।।

10.त्रिभुवनतिलकस्य तस्य काचिद्विनयवती पुरतस्सरोरुहाक्षी।

प्रसृमरबहलांशुशोभमानेनिहितवतीमणिपादुके मनोज्ञे।।

11.निरगमदथ नित्ययौवनश्रीर्निजपदलङ्कृतरत्नपादुकस्सन्।

निखिलनृपतिसेवितो निशान्तात्स्वयमवलंब्य चमूधरस्य पाणिम्।।

12.निरवधिभुजवीर्यनिर्जितारिः निबिडतराञ्जय[1]वैजयन्तिकाभिः।

प्रहतपटहतूर्यमुख्यघोषान्नय[2]विदवेक्ष्यवरूथिनीं ननन्द।।

13.अभिमतनरपालमण्डलेभ्यः तुरगमुखानि वितीर्य वाहनानि।

प्रमुदितमधिकप्रसाददानैरकृतहरिः कुलपुत्रलोकमाप्तः।।

14.अहमहमिकया शुभैर्निमित्तैः प्रथिततरैः परमग्रतोभवद्भिः।

[1]तरांजय

[2]घोषांनय

असुररिपुरसेव्यतातिहृद्यैः सुभटजनैरिति शुद्धपक्षपादैः।।

15.कनककलितकिङ्किणीकलापध्वनिमुखरीकृतदिङ्मुखान्तरिक्षाम्।

ललितगतिमलोकयन्मुकुन्दस्सपदिनिषादिनियन्त्रितां करेणुम्।।

16.कलितमहितदीपिकासहस्रप्रतिहतसान्द्रतमस्तमालनीलः।

स कनकचतुरन्तयानमुच्चैरभिमतकिङ्करबाह्यमारुरोह।।

17.तदनु गरुडकेतुशासनेन क्षितिपतयस्सकलाः प्रतापवन्तः।

विभवसमुचितानि वाहनानि द्रुततरमारुरुहुस्समुन्नतानि।।

18.स्फुरदुरुनवहारयष्टिभासा पुनरवकुण्ठनवाससा वृताङ्गाः।

मणिमयशिबिकाम्मनोज्ञवेषास्सललितमारुरुहुर्नरेन्द्रदाराः।।

19.सरभसमधिरोहणं विराजन्मणिरशनाभिरकारि सैन्धवानाम्।

विधृतधवलरत्नकञ्चुकाभिः विविधचमूचरवामलोचनाभिः।।

20.ग्रथितजयपदस्तुतिप्रबन्धप्रविलसदाननसूतवन्दिबृन्दैः।

मधुरिपुरुपचक्रमे प्रयातुं महिततरैश्च निषेवितो नरेन्द्रैः।।

21.भटकलकलवाजिबृन्दहेषाकरिकुलबृंहितचक्रिचीत्क्रियाभिः।

मुखरमपि समस्तवाद्यघोषैः मुरमथनस्य चचाल दण्डचक्रम्।।

22.नव नव इव रूपविभ्रमाभ्यां मनसिजविक्रमवृद्धिकारणाभ्याम्।

अभवदनुपमप्रतापलक्ष्मीस्तरुणिमसंपदलङ्कृतो मुरारिः।।

23.सुभट इति भटैः कृशोदरीभिः स्मर इति कल्पक इत्यथार्थिबृन्दैः।

मुनिरिति मुनिभिर्मुकुन्द एकोप्यभवदजस्रमनेकधा[1] गृहीतः।।

24.धृतमभिनवमौक्तिकाभिरामं मुरहरमूर्ध्नि वलक्षमातपत्रम्।

[1] Emended, original version - अनेकथा

धरणियुवतिकर्णदन्तपत्रन्निरुप[1]मशोभमशोभतातितुङ्गम्।।

25.अधिगतवरवाजिनां नृपाणामसुरसपत्नसमीपदेशभाजाम्।

मणिमकुटविनिर्गतैर्मयूखैररुणरुचस्सकला बभूवुराशाः।।

26.अमृतकिरणमण्डलप्रकाशप्रकृतिभिरातपवारणैर्नृपाणाम्।

रजनिरतितरां रराज वापीस्फुटितदलैरिव पुण्डरीकषण्डैः।।

27.दिशि दिशि चलितानि चामराणि स्फुटतरतन्तुकलापपाण्डुराणि।

बलिमथनवरूथिनीतटिन्या धवलमरालगणाश्रियं वितेनुः।।

28.विपुलकटतटान्तरप्रसर्पन्मदलहरीपरिषिक्तराजमार्गाः।

कलितमहितशङ्खकर्णतालाः करिपतयो नगरात्क्षणान्निरीयुः।।

29.कटितटघटितासिधेनुकच्छः करधृतकाञ्चनचर्मखड्गभीमः।

मलयजरसक्लृप्तमण्डनश्रीः निरगमदक्रममुद्भटो भटौघः।।

30.शुभतरवचनाश्च पौरकान्ता निजनिजमन्दिरतुङ्गसौधभाजः।

अभिनवकुसुमोत्करैस्सलाजैरमरपतिं तमवाकिरन्समन्तात्।।

31.पृथुतरभुजमध्यकौस्तुभांशुप्रतिहतपार्श्वगदीपिकाप्रकाशः।

निरुपमचरितोनिशीथवत्यान्निज[2]नगरादथ निर्जगाम रङ्गी।।

32.हरिमणिमयतोरणाभिरामां हरितमगस्त्यपदानुषङ्गपूताम्।।

निजतनुमहसानिरङ्कुशश्रीः कुवलयितामकरोत्कुशेशयाक्षः।।

33.स्मरपरवशचक्रवाकदीनस्वरकरुणोभयकूलदर्शनीयाम्।

पुलिनशरवणप्रसुप्तहंसां हरिरवलोकयति स्म सत्यकन्याम्।।

34.पृथुपुलिनतले कवेरजाया धवलगरुत्पटलीविधूतनिद्राम्।

[1]दन्तपत्रंनिरुप

[2]निशीथवत्यांनिज

अकृतकुमुदमन्दिरप्रसुप्तामलिविततिश्च मुकुन्दसैन्यघोषः।।

35.अथ मुहुरमले कवेरजायाः पयसि नवे प्रतिबिम्बितो बभार।

ज्वलितबहुलदीपिकासमूहः फणिपतिमौलिमणिप्रकाशलीलाम्।।

36.अविरलहिममण्डलप्रकाशैः निबिडतरैर्बलरेणुभिः प्रकीर्णैः।

परिपिहितजला कवेरकन्या समजनि भूतलनिर्विशेषकान्तिः।।

37.प्रथममिभततिस्ततोश्वपङ्क्तिः तदनुपदातिगणो गृहीतशस्त्रः।

अथ दनुजरिपुश्च सत्यकन्यामुरुलहरीमुपचक्रमे तरीतुम्।।

38.मदसलिलमुचामदावलानां मुहुरुदितैश्चलकर्णतालवातैः।

क्षणमधिकपयाः पयोधिकल्पा समजनिसह्यमुतासमाकुलोर्मिः।।

39.पृथुभिरतिसमाकुलैस्तरङ्गैः पयसि तरङ्गसहस्रभासमानैः।

तुरगशतवरैः कवेरकन्याद्विगुणितवीचिपरम्परेव रेजे।।

40.परिसरविचरत्पदातिचक्रोद्धृतशितकुन्तशतैस्तरङ्गिणी सा।

अलभत नितरामनीचदण्डोत्पलमुकुलोत्कर[1]कान्तिपौनरुक्त्यम्।।

41.गजतुरगपदातिमण्डलेन स्फुटगरुडध्वजलाञ्छनेन साकम्।

अतिपृथुलहरीं कवेरकन्यामतरदुदारगुणस्स रङ्गधामा।।

42.निभृतमहसि दीपिकासमूहे शशिनि च तारकमण्डिते समस्ते।

कुसुमतरुनिकायकायमानं तदनु सदक्षिणतीरमापशौरिः।।

43.अरुणितनयनः प्रजागरेण प्रगलितचन्दनकुङ्कुमाङ्गरागः।

विभवनिधिरवातरत्स यानान्मरतकरत्नमनोहराङ्गकान्तिः।।

44.न्यवसदथ स तस्य नातिदूरे शिशिरतरे तृणनिर्मिते निवेशे।

बहुतरपटमण्डपाभिरामे सकलबलोपगमाय रङ्गराजः।।

[1]मुकुरोत्कर

45.दिनमुखविहितं क्रियाकलापं स निजयशोविशदीकृताखिलाशः।

अतिमहतिचकार धाम्नि तार्णे प्रतिनववन्दनमालिकाभिरामः।।

46.परिसरपरिवर्ति दण्डनाथ प्रसृतकरार्पितपाणिपुण्डरीकः।

पुनरपि चतुरन्तयानमारादुपनतमुज्ज्वलमारुरोह रङ्गी।।

47.पटहपणवगोमुखादिवाद्यस्वनमुखरीकृतसर्वदिग्विभागा।

द्विरदतुरगपङ्क्तिदीप्यमाना हरिमनुकूलमनीकिनी सिषेवे।।

48.अनतिविकसितारविन्दषण्डस्नुतमकरन्दनिरन्तरातिशीतः।

अनुकलमनुकूल एव शौरेरलिकुलबन्धुरवात्समीरपोतः।।

49.सपदि सरसरेति सौविदल्लप्रकटितभीषणभाषणैरुदग्रैः।

द्विरदनिकरकर्णतालशब्दैरपिबधिरीक्रियते स्म सर्वलोकः।।

50.अविरलमणिभूषणाभिरामाः परिरचिताञ्जलिसपुटास्समस्ताः।

अधिगतनिजवाहनाविनीतानरपतयःपरिवव्रुरेनमारात्।।

51.त्रिपुरमथनदीप्तिमत्रिशूलव्यतिकरभीषणमेखलावकाशम्।

प्रमथगणपरिष्कृतं समन्तात्त्विदशपतिस्त्रिशिरोगिरिन्ददर्श[1]।।

52.पथिजनपरिवारनिह्रुताशः सहनरपालवरूथिनीसहस्रैः।

बहुगजतुरगैरमेयभूमा मधुभिदशोभत मञ्जुलापदानः।।

53.मदकरटितुरङ्गपत्तिसङ्घैः प्रलयघनाघनबृन्दभीमनादैः।

सहवरुणपरिष्कृतां प्रतस्थे हरितमभङ्गुरकीर्तिरम्बुजाक्षः।।

54.सपदि तत इतः प्रसर्पिणीनां दनुजहरस्य तदा वरुथिनीनाम्।

प्रचलितकुलशैलसन्धिबन्धाक्षितिरखिलापदचङ्कमैश्चकम्पे।।

55.जनपदजनबन्धतोरणेन स्फुटकुहलीपरिमोदिमारुतेन।

[1]गिरिंददर्श

सिकतिलतलवर्त्मनाप्रयान्तं हरिमिव सेवितुमुद्ययौ विवस्वान्। ।

56.कलरवमणिनूपुरोज्ज्वलानामसितदृशामरुणातपोभटीनाम्।

पदकमलनखेन्दुपक्ष्मलश्रीः प्रतिनवयावकविभ्रमं वितेने। ।

57.अकुरुत भगवान्मयूखमाली क्षणमनुसंहितशैशवैः[1] कराग्रैः।

बहुलसृणिमण्डनप्रतीतिं बलमदकुञ्जरकुम्भमण्डलेषु। ।

58.सुभटजनकराग्रकम्प्यमाना सुचिरमुदग्रफलाकृपाणरेखा।

अनुकलमरुणातपावलीढा दितिसुतशोणितरूषितेव रेजे। ।

59.बलिमथनवरूथिनीतुरङ्गप्रकरललाटनिबद्धदर्पणेषु।

तरणिरुषसि बिम्बितो मुकुन्दं स्वमिव विभज्य सहस्रधा सिषेवे। ।

60.चलितगजघटातुरङ्गपालीभटजनपादसमुत्थरेणुराशिः।

अपि वियति वसुन्धरामपूर्वामकलयदम्बुजसंभवानपेक्षम्। ।

61.प्रथममुपरुरोध वारणेन्द्रांस्तदनु रथानथ केतुमण्डलानि।

तदुपरि रजसां कुलं महीध्रान्परमखिलाः ककुभस्ततोऽर्क[2]बिम्बम्। ।

62.झटिति च बहुलो रजो निकायो मुरहरसैन्यसमुत्थितस्समन्तात्।

अकलुषहृदयैरजस्रगाढां सुरसरितं कलुषीचकार तूर्णम्। ।

63.अनुपममदवारणेन्द्रशुण्डामुखविगलद्घनशीकरप्रभावः।

परिपिहितसमस्तदिग्विभागं प्रशमयति स्म रजःकुलं समन्तात्। ।

64.घनतरमकरन्दशोभमानान्यपि कुसुमानि मनोहराणि मुक्ता।

परिमलबहुलेषु चञ्चरीकाभटसुदृशामपतन्घनालकेषु। ।

65.अधिगतमदहस्तिकन्धराणां कमलदृशामतिचञ्चलालकानाम्।

वदनसरसिजानि सैनिकानां मुहुरवलोकयताम्मुदं वितेनुः। ।

[1]शैशवः

[2]ततोर्क

66.अविहिततुरगेण पातितायां सह च निषादिवरेण यामचेट्याम्।

हरिरथ निचुलाधिराजकन्याहृतहृदयोऽपि चिरं जहास धीरः।।

67.द्विरदकरशताङ्गकेतु[1]दण्डाहतिपतितैर्निचितातरुप्रसूनैः।

तटसरणिरवाप तारकाभिस्तरलतरस्य नगस्थलस्य लीलाम्।।

68.परममथ पुमांसमुन्नतांसं पथिपरिकल्पिततोरणे प्रयान्तम्।

करलसदुपदाः प्रणेमुरेनं निकटनिवेशसमाश्रया नरेन्द्राः।।

69.मृगमदरचितोर्ध्वपुण्ड्रेरेखापरिमलशालिमुखेन्दुरादरेण।

मुररिपु[2]रवलोकनेन[3] सर्वानपि समभागयदानतान्नरेन्द्रान्।।

70.अथ मुररिपुमागतं निशम्य प्रथितयशाः प्रकटीकृतप्रमोदः।

झटिति स निरगात्प्रणामलोलो निजनगरात्करिकालचोलराजः।।

71.धीरात्मा करिकालचोलनृपतिस्सैन्यैस्स्वकीयैस्समं

प्रत्युद्गम्य मुहुः प्रणम्य शिरसा श्रीरङ्गधामेश्वरम्।

कावेरीजलशीतलेऽत्र निचुलोद्याने भवद्वाहिनी

गुर्वी देवनिवेश्यतामिति मुदा विज्ञापयामास तम्।।

72.तेनोदारगुणेन चोलविभुना वीरेण संप्रार्थितः

पुण्ये पुष्यदिने पुराणपुरुषः पूर्णेन्दुबिम्बाननः।

ऐछत्कारयितुं मनोहरतरे सेनानिवेशं मुदा

विस्तीर्णे निचुलापुरीपरिसरारामे लसत्तोरणे।।

73.तिल्लारण्यतले त्रिवर्गफलदस्तिल्लेश्वरोनृत्तरा-

ङ्गम्बूनां विपिने जनश्रमहरे जम्बूपतिर्जन्मभित्।

[1]द्विरदशतकराङ्गकेतु

[2]मुररिपु

[3]मुखलोकनेन

आम्रानोकहकानने त्रिजगतामेकान्तनाथो भुव-

श्चक्रे वासमुदारमर्जुनवने मध्यार्जुनेशस्सुखम्। ।

74.प्रख्याता निचुलास्वयं नरकृते स्थानान्तरादागता

देवादीप्तकिरीटकोटिकिरणैरुद्योतयन्तो दिशः।

कावेरीतटसीम्नि पूगविपिने कान्ते लतामण्डपे-

ऽप्यन्ये वासमरोचयन्नभिमते वादित्रघोषैस्सहम्। ।

75.देवो यस्य भुजङ्गभोगशयनश्श्रीरङ्गराजो हरिः

तातः काश्यपचक्रायविबुधो लक्ष्मीर्जनन्युत्तमा।

तस्यैवोत्तमनम्बिसत्तिरुमलाधीशप्रबन्धुःकृतौ

लक्ष्मीकाव्य उदारभूम्नि दशमः सर्गस्समाप्तिं गतः। ।

अथ एकादशस्सर्गः

1.मुरहरोऽथ चमूपतिमादिशद्बलमिदं गजवाजिसमाकुलम्।

इह निवेशय पुष्पितभूरुहे सिकतिले निचुलोपवनेत्विति। ।

2.प्रलयकालघनाघनमण्डली निनदभीमतरः परितश्शनैः।

उदचलद्विपुलः पटहध्वनिर्विविधसैन्यनिवेशनसूचकः। ।

3.अथ निशम्य निवेशनसूचकं पटहघोषमुदग्रतरोदयम्।

उपवनस्थलमुन्नतभूरुहं श्रमवती द्रुतमाप वरूथिनी। ।

4.समधिकोर्जितगर्जितभीषणा वसुमतीं सकलां वरवारणाः।

बभुरुदग्रमदोदकवर्षिणो गगनमम्बुधरा इवनूतनाः। ।

5.रदनयुग्मविखण्डितपातितक्षितिरुहप्रकरोभयपार्श्वकाः।

पृथुलबृंहितपूरितदिङ्मुखास्सममिलन्सहसा मदकुञ्जराः। ।

6.प्रचलतां शिबिरं मदहस्तिनां मदजलैः परिकर्दमिते पथि।

तदितरामवलम्ब्य च पद्धतिं द्रुतमगामि तुरङ्गममण्डलैः।।

7.चलितचामरधामरपक्षकाः खरखुराञ्चलखण्डितभूतलाः।

अलिकभासुरकाञ्चनभूषणाः शुशुभिरे तुरगाश्शुभलक्षणाः।।

8.भुवि निपत्य निजोपरिनिष्ठितामनिभृतामवरोधकृशोदरीम्।

शिथिलकेशभरां शुकभूषणाम्मुहुरुदप्लवताश्वतरस्तदा।।

9.पथिषु पुष्पभरानतवल्लरीनिकरक्लप्तगृहेषु निशश्रमुः।

कतिचिदध्वपरिश्रमतो भटा निजवधूपरिरम्भणनिर्वृताः।।

10.कुपितसिंहविदारितकाननद्विरदकुम्भतलात्पतितं नवम्।

झटितिमौक्तिकसञ्चयमग्रहीत्पथिमुहुर्जनता हि सकौतुका।।

11.अभिमुखापतितं वनसूकरं भटजनैरतिदूरमनुद्रुतम्।

झटिति हस्तिपकोमदहस्तिना विगतजीवमकारयदद्भुतम्।।

12.महति वर्त्मनि वन्यमहीरुहप्रकरशोभिनिकुञ्जनिरन्तरे।

तत इतश्चलितं शशमुद्रुतं लगुडलोष्टशवैरवधीज्जनः।।

13.पथिसमाहृतशुष्कतरेन्धनाः शकटसंभृतभाण्डपरिच्छदाः।

भटगणा वरपुङ्गवरोपितप्रचुरधान्यभरास्सहसा ययुः।।

14.दृढतरांसनिवेशितकार्मुका अतिविलम्बिमृगामिषसञ्चयाः।

निजवधूकरदत्तवरायुधाश्शिबिरमानशिरे कतिचिद्भटाः।।

15.वनकिटिव्रजमम्ववगाहनागतमपास्य मुहुश्शरवर्षतः।

विकचपङ्कजगन्धिसरोजलं परिविगाह्य पपुस्तृषिता भटाः।।

16.विपिनसिन्धुतरङ्गसमीरणश्चलितपङ्कजसौरभमेदुरः।

अयनजातमनीकमृगीदृशामपजहार परिश्रममञ्जसा।।

17.अनुतटामलकीफलचर्वणव्यपगताध्वरुजश्शिबिरं ययुः।

भटजनाः कतिचिन्निजवल्लभाधरसुधारसवीतपरिश्रमाः।।

18.स्तबकजालविकल्पितभूषणा वकुलदामविशेषितमेखलाः।

रुरुचिरे शिबिरे वनदेवताः किल चमूचरजीवितवल्लभाः।।

19.समवलम्ब्य सखीकरपल्लवं प्रचलिता पथि काचन कामिनी।

घनपयोधरवल्गनविभ्रमा युवदृशामकृताधिकमुत्सवम्।।

20.द्रमिडशैवलिनीपुलिनं प्रियैस्सह समेत्यसरोरुहलोचनाः।

कतिचिदध्वपरिश्रममुद्वहतं समनुदञ्जलशीकरमारुतैः।।

21.तटलताकुसुमोत्कररेणुभिः सिकतिले ललनासहितः परः।

किसलयाकलिते शयने युवा श्रमवशात्स्वपिति स्म सुखोत्तरम्।।

22.पवनधूतपचेलिमकेतकीकुसुमजन्मपरागपरम्पराम्।

करतलैरपसार्यमुहुर्मुहुः परमपायि जनैस्तटिनीपयः।।

23.कबलितेव सुधावलयेक्षणात्करभकर्णनिभैः क्षितिरेणुभिः।

मुहुरवोधिषत ध्वनिभेदतः पृथुशताङ्गमतङ्गजवाजिनः।।

24.पटगृहाणि वितत्य च पार्श्वयोः प्रचुरपण्ययुतापणशोभिनीम्।

परिपतत्क्रयिकाकुलितान्तरां विपणिनो विपणिं व्यभजन्पुरः।।

25.तृणकुटीतटतल्पसमाश्रिताः कृतनवप्रतिकर्ममनोहराः।

अरमयन्गणिकाः पुरतो जनानगणि[1]तात्मपरिश्रममादरात्।।

26.पटगृहान्तरवीथिषु काश्चन प्रकटशिञ्जितनूपुरमेखलाः।

युववशीकरणाय शनैश्शनैरभिविचेरनुक्षणमङ्गनाः।।

27.असितकाण्डपटान्तरचारिणी द्रुतसुवर्णमनोहरविग्रहा।

अनुचकार सरोरुहलोचना तटितमम्बुधरान्तरलक्षिताम्।।

[1]जनान्अगणि

28.सितपटावसथाः परितो बहुध्वजपटैश्चलितैर्वियदन्तरे।

परिमृजन्त इवाखिल दिङ्मुखं बलपरागचयैः परिधूसरम्।।

29.हरिबलार्पितवस्त्रपरम्पराः प्रविलसद्विटपास्तरवो दधुः।

कपटगोपनिवेशितवल्लवीवसनबन्धुरकुन्दतरुश्रियम्।।

30.गिरिगुहां मृगनाभिसुवासितां घुसृणपल्लवितां च वनस्थलीम्।

कुसुमितञ्च[1] लतामयमण्डपं नृपतयोन्यवसन्हरिसेविनः।।

31.अवतरत्यवरोधवधूजने नृपतिवेशमुपेत्य तुरङ्गमात्।

अधिरुरोह किलारुणसारथिः गगनमध्यमसह्यतरातपः।।

32.अतिखरैः किरणैस्तरणिर्निजैरजनयद्वजिनीमृगचक्षुषाम्।

घनतरेषु कुचेषु शनैश्शनैः श्रमपयः कणमौक्तिकमालिकाम्।।

33.अनुवनं प्रसृतां मृगतृष्णिकामनुसृतान्तृषि[2]तैर्मृगमण्डलैः।

श्रदधुरेव जनास्तृषितामुहुश्चलतरङ्गयुतां तटिनीं ध्रुवम्।।

34.खरतरार्कमयूखपरम्परा व्यतिकरेण कवेरतनूद्भवा।

कुपितदाशरथिज्वलनाशुगक्थित वारिधिविभ्रममाययौ।।

35.घननिरन्तरपीनयोधरामृगदृशो नवमौक्तिकभूषणाः।

पटगृहेषु विशश्रमुरुद्रुतैः प्रियतमैः पदवीपरिखेदिताः।।

36.सिकतिलेषु तलेषु महीरुहामतितरामलुठन्हयपुङ्गवाः।

प्रचुरकेसरलग्नरजोभरं विवलदास्यविनिर्गतहुङ्क्रियम्।।

37.समवतारितभारतया जनैः परिलघुत्वमुपेत्य मदोद्धताः।

निशितशृङ्गशिखाभिरनुक्षणं तटतलान्यवचस्करिरे वृषाः।।

38.पटगृहेषु निषादिभिरापगाशिशिरवारिविहारगतक्लमा।

[1]कुसुमितंच

[2]मनुसृतांतृषि

तुरगपङ्क्तिरबन्धिपुरस्स्फुरद्यवसचर्वणबद्धकुतूहला।।

39.भुवि निपात्य निषादिनमुच्चकैर्विकटकुम्भविधूननसम्भ्रमैः।

मदवशात्करिणीमनुधावता शिबिरमाकुलमास विषाणिना।।

40.पवनकम्पितपत्रपरम्परा निनदमर्मरितेषु निषादिनः।

पृथुलतालवनेष्ववधानतः परिबबन्धुरधोमदसिन्धुरान्।।

41.महति रोधसि वेतसवल्लरी विरचितासु कुटीषु कवेरजा।

युवतिभिस्स्वपदाञ्जलशीकरैरपजहार परिश्रममध्वजम्।।

42.अथ हरिरिशबिरे शिबिरे कृतां स निचुलानगरोपवनान्तरे।

उचितकेलिसखीमुपकारिकामुरुतरां मणिमञ्चवतीं ययौ।।

43.शिबिरमध्यमुपेयुषि केशवे गरुडलाञ्छनकेतुपटाञ्चितम्।

उदचलत्पृथुकाहलिकायुगी समुदितः किल तारतरो[1] ध्वनिः।।

44.अथ विसर्जितसम्मतराजकः सपदि मङ्गलमज्जनकौतुकी।

सुरभिताम्बुकटाहसमावृतामभिययावभिषेकचतुष्किकाम्।।

45.कनकक्लृप्तकटाहगतैर्जलैः शुचितरैरिशशिरैः कृतमज्जनः।

समुचितन्दिन[2]मध्यविधिं हरिः स कुरुते स्म गुरुर्गुणशालिनाम्।।

46.परिलसत्परमान्नमनुत्तमं विविधभक्ष्यफलाज्य परिष्कृतम्।

अमलमन्नमभीष्टमथाग्रहीत्त्रिभुवनाभ्युदयाय जगत्पतिः।।

47.प्रणमता करिकालमहीभुजा समुपनीतमनर्घमनुत्तमम्।

अलमकुप्यमुपायनमण्डनम्मुरहरस्स्मयमानमुखोऽग्रहीत्।।

48.तस्मिन्निषण्णमरुणोपलरोचमाने मञ्चे मनोभवशराकुलचित्तवृत्तिम्।

देवं प्रणम्य शिरसा करिकालचोलो व्यज्ञापयद्विनयपूर्वमुदारचेताः।।

[1]तारवो

[2]समुचितंदिन

49.स्वामिन्स्वयं वरनिमित्तमिहात्मजायाः संवित्सभापतिमुखास्सकलाश्च देवाः।

मञ्चस्थलेषु मिलितामहनीयवेषा भद्रासनान्यधिवसन्त्युचितास्तराणि।।

50.नव्यं स्वयंवरनिमित्तकृतं विशालं माणिक्यमण्डपमभङ्गविटङ्कजालम्।

स्वाङ्गप्रकाशनिवहैर्भवतापिशौरे सुत्रामरत्नचयक्लृप्तमिवाद्यकार्यम्।।

51.इत्युक्तमुज्ज्वलयशः प्रकरेण चोलक्षोणीश्वरेण वचनं स्मरतापहारि।

श्रुत्वा हरिः परमवाप्तसमस्तकामोप्यानन्दवानजनि रङ्गपुरीधुरीणः।।

52.ओमित्युदीर्य निचुलाधिपतिर्विसृज्य वैवाहिकन्तदनु[1]वेषविधिन्द्[2]धानः।

मञ्चस्थलाभिगमनत्वरितस्सशार्ङ्गीसज्जन्मदावलवरं सहसारुरोह।।

53.कण्ठस्थितस्य विनतातनयध्वजस्य रेखाङ्कुशो चरण पङ्कजयोर्विलग्नौ।

मत्तः करीभयवशादिवकर्णतालयुग्मेनहन्तपिदधेमुहुरौपवाह्यः।।

54.कण्ठे स्थितो मधुरिपुः करियूथपस्य नीलाचलप्रतिनिधेर्निरवग्रहस्य।

पश्चाद्गतेनपुरुषेण धृतातपत्रः[3] प्रीतिं चकार निजसेवकभूपतीनाम्।।

55.निर्व्याजमन्दहसितस्फुरदाननोसौ निर्निद्रपङ्कजविशालविलोचनश्रीः।

रङ्गेश्वरस्य मदगर्वितदानवानां जेता जगाम भगवानथ राजवीथ्या।।

56.हर्म्येषु कैतुकजुषां हरिणेक्षणानामालीढकान्तिरनुरागयुतैरपाङ्गैः।

मञ्चस्थलप्रणयिनामथदेवतानां मालां ददर्श मदनाकुलमानसानाम्।।

57.मञ्चान्तरे मदगजादवतीर्य शौरिः मान्यैः कृतावतरमङ्गलदीप्यमानः।

चोलेश्वराधिकृतवेदितमुत्पताकं मञ्चान्तरम्मणिगणोज्ज्वलमारुरोह।।

58.पुष्पायुधस्य जनकं परमं पुमांसं पूर्णेन्दुबिम्बवदनं हरिनीलनीलम्।

[1]वैवाहिकंतदनु

[2]विधिंद

[3]धृतापत्रः

देवास्समीक्ष्य ललिताकृतयोऽपि काममासन्निवृत्तनिचुलालतिकाभिलाषाः।।

59.उच्चैरुदारवचनैरथ वन्दिबृन्दैरुद्गीयमानभुवनप्रथितापदानः।

सर्वां स्वयं वरसभा किल रङ्गराजस्तापि[1]ञ्छकान्तिमकरोत्तरलेन भासा।।

60.आस्थाने मणिमञ्चमेयुषि हरौ श्रीरङ्गधामेश्वरे

कस्तूरीकलितोर्ध्वपुण्ड्रललिते कन्दर्पलीलास्पदे।

उत्थाया हि तवन्दनास्सं विनयं कोटीरिभिर्मस्तकैः

तद्भूचोदनयासनानि पुनरप्यध्यासत क्षोणिपाः।।

61.देवो यस्य भुजङ्गभोगशयनश्श्रीरङ्गराजो हरिः

तातःकाश्यपचक्रायविबुधोलक्ष्मीर्जनन्युत्तमा।

तस्यैवोत्तमनम्बिसत्तिरुमलाधीशप्रबन्धुः

कृतौलक्ष्मीकाव्य उदारभूमनिगतस्सर्गोयमेकादशः।।

अथ द्वादशस्सर्गः

1.अथानुरूपे सुरराजलोके मञ्चान्तरस्थे महनीयवेषे।

पतिंवरान्नेतुमियेष मञ्चन्निजां तनूजान्निचुलापुरीशः।।

2.पुष्ये ततः पुण्यतरे मुहूर्ते राजा तनूजामभिजातलीलाम्।

आनेतुमाप्तं सचिवप्रधानं महोदयाख्यं विससर्ज धीरः।।

3.चामीकराढ्यञ्च तुरन्तयानम्मुक्तातपत्रम्मणिचामरे च।

राजाज्ञयादाय नरेन्द्रपुत्र्यै कन्यावरोधं सचिवः प्रपेदे।।

4.अन्तःप्रपश्य क्षितिपालपुत्रीमानन्दयन्नत्र जयेति वाचा।

स्वयंवरस्थानमलंकुरु त्वं स्वाम्याज्ञयेत्याह सुनीतिरेषः।।

[1]रङ्गराजःतापि

5.निशम्य तद्वाक्यमथानुकूलं नितम्बिनी सा नियमेन युक्ता।

सार्धं प्रहृष्टा निरगात्सखीभिः कन्यावरोधात्करभोपमोरुः।।

6.आरुह्य हैमञ्च तुरन्त[1]यानमाधूतवालव्यजना सुगात्री।

धात्रेयिकाभिर्विधृतातपत्रा धर्मोत्तरस्याप गुरोस्सकाशम्।।

7.पुष्पोपहारप्रकरोज्ज्वलेन पुरःपथा पूर्णमनोरथा सा।

समुल्लसन्मङ्गलवाद्यघोषा पितुस्समीपं शनकैः प्रपेदे।।

8. तां दृष्टमात्रेण कृतप्रणामामुत्थाप्य निर्वृत्तविवाहवेषाम्।

मुदा नरेन्द्रो मुहुरालिलिङ्गे गौरीमिवाद्रिः कमलामिवाब्धिः।।

9.आकारितानामथ राजपुत्र्यास्स्वयंवरार्थं सुरपुङ्गवानाम्।

विभूषणश्रेणिमणिप्रकाशैरोजायते स्मोज्ज्वलराजवीथिः।।

10.नित्येन्द्रदाराद्भुतदेवताया नीलांशुकख्यातिमुदञ्चयद्भिः।

आमोदिकालागरुधूपजालैरास्थानमासीदधिवासितं तत्।।

11.पुङ्खानुपुङ्खप्रसृतैस्समन्तात्पूरैर्मणिस्तम्भसहस्त्रभासाम्।

भूषांशुजालैरपि देवतानां नव्यस्तदा नाव्य इवास रङ्गः।।

12.अथात्त चामीकरवेत्रदण्डैश्शुद्धान्तरक्षीनिवहैःपरीताम्।

स्वयंवरस्थानमुदग्रधूपं प्रवेशयामास सुतां नरेन्द्रः।।

13.अव्याजकान्तामथ तां विशन्तीं स्वैरं समालोकयतां सुराणाम्।

प्रसूनबाणः प्रतिचित्तमासीत्सान्निध्यवान्संहतिबाणचापः।।

14.रङ्गेशनिक्षिप्तमनःप्रवृत्तिस्सा तत्र देवानभिजातवेषान्।

मञ्चस्थितान्मञ्जुलकान्तिपूरान्विलोकयामास विलासभाजः।।

15. अमोहयत्सा निखिलान्सुरेन्द्रानार्द्रैरपाङ्गैरमृतान्तरङ्गैः।

[1]हैमंचतुरन्त

बबन्ध चित्तं न तु तेषु बाला बद्धादरा रङ्गपतौ चिराय।।

16.कल्याणकान्त्यां करपल्लवेन कल्हारबद्धां वरणार्थमालाम्।

सम्मानयन्त्यां सहसा निपेतुस्सुपर्वणां स्वैरमथेक्षणानि।।

17.उदञ्चयत्पञ्चशरावलेपमुत्कूलयद्रागपयोधिमुच्चैः।

सञ्जीवयद्विभ्रमभेदमस्यास्सौन्दर्यमास्वाद्यसुरानतृप्ताः।।

18.राजा ततो रङ्गमुपेत्य रम्यं तत्रासनस्थानमरानशेषान्।

विस्फारिणा वीक्ष्य विलोचनेन भक्त्या क्रमेणप्रणनाम मूर्ध्ना।।

19.कुतूहलेनाथ सुरान्कुमार्यै प्रदर्शयन्नेष पतिंवरायै।

वृत्तञ्च वासं व्यपदेशमेषां प्रचक्रमे वक्तुमनुक्रमेण।।

20.अयं हि नाम्ना सितविघ्नराजश्रीदक्षिणावर्तपुरस्य नाथः।

दत्तप्रभाचन्द्रिकया नतानां विघ्नान्धकारं विदलीकरोति।।

21.पुरा महाभारतलेखनाय दन्ते परस्मिन्दलिते निकामम्।

अस्य प्रभोरायतचारुशुण्डमास्यं किलासीदसपल्लदन्तम्।।

22.अयं कुमारस्सुकुमारमूर्तिस्सुकर्शनस्स्वामिमहीधरेशः।

दयानिधिर्देववरूथिनीनां गोप्ता गुणानां निलयो विभाति।।

23.एकेन मूर्ध्ना गुरुरिन्दुमौलेर्द्वाभ्याञ्चदोर्भ्यान्दु[1]रवाप तेजाः।

अपूर्वयाचाप्युपदेशाक्रुत्या गुरुत्वमङ्गीकृतवाङ्किलैषः[2]।।

24.साधारणे केरलपाण्ड्यचेलक्षोणीभुजामस्य हि धर्मभर्तुः।

सुगन्धिरम्भाफललोलपक्षिकोलाहले कोल्लिगिरौ विहारः।।

25.गर्भेश्वरस्यास्य गभीरवृत्तेर्गर्भाभिधानं नगरं विशालम्।

[1]दोर्भ्यांदु

[2]कृतवान्किलैषः

गवां व्रजानां गजपुङ्गवानां तुरङ्गमानामपि जन्मभूमिः।।

26.अनेन यूना समधिष्ठितस्य रत्नाचलस्योर्ध्वमुदग्रभूम्नः।

अद्यापि नोगच्छति पक्षिजालन्तदं[1]शुमालानलशङ्कयेव।।

27.असौ विलासेन विराजमानो यत्रोत्सवे पुत्रिविजृम्भमाणे।

गानोल्लसद्भृङ्गयुगापदेशादासेव्यते तुम्बुरुनारदाभ्याम्।।

28.पादानतानां सुलभस्सपल्लतूलावलीनां प्रबलः कृशानुः।

अयं हि नीलीवननीलकण्ठोनिरङ्कुशश्रीर्नितरां विभाति।।

29.शङ्खद्युतिश्चारुतरार्यवेषः श्रीशब्दमुख्याश्रमनाथ एषः।

जानाति जाम्बूनदधातुवर्णं वर्णञ्च[2]सर्वं निकषाशयाभ्याम्।।

30.निरञ्जनस्सन्नयमादिभिक्षुर्नित्योत्तमब्रह्मनिलीनचेताः।

कदम्बतीर्थप्रणयीदृशोस्ते करोतु कल्याणि चिरायसौख्यम्।।

31.विद्याप्रतीतः किल वैद्यनाथ इत्याख्यया विश्रुत एष देवः।

हस्तेन रक्षत्यभयोज्वलेन भक्तान्समस्तान्भवरोगतप्तान्।।

32.धृतौषधीशेन दयाधनेन दीर्घायुषानेन भिषग्वरेण।

न केवलम्मोच्यत एव रोगो रागादिदोषोपि सतान्नतानाम्[3]।।

33.कृती व्रतस्थानविहारशीलः कृशानुभानुप्रतिमानतेजाः।

व्रताभिषेककक्रियया कृतार्थः कृतार्थयत्यङ्घ्रिनतान्समस्तान्।।

34.पञ्चायुधद्रोहिविलोचनोयं पञ्चाननः पञ्चनदाधिराजः।

सूते फलं काङ्क्षितमानतानांसुखासनस्सूर्यसरःप्रतीरे।।

35.मध्यार्जुनेशोयमुदग्रधामा महेन्द्रसंपूजितपादपद्मः।

[1]पक्षिजालंतदं

[2]वर्णंच

[3]सतांनतानाम्

कल्याणवेषोर्जितगात्रयष्टिः कल्याणि मे कौतुकमादधाति।।

36.निक्षिप्य दारान्निजसीम्निविप्रन्निर्वृत्त[1]काशीगमनान्निवृत्तम्।

निघ्नन्नृपस्वात्मनि विप्रहत्यामस्यावलोकेन[2] परन्नुनोद।।

37.सजग्विदोषो ध्वजलास्यवध्वास्तद्रासभाराधनदोषतोपि।

मुक्तो व्यतीर्थाम्बुविगाहनेन मुक्तिं ययौ पुत्रि स कोपि विप्रः।।

38.शूली कपाली शुभवारबाणश्शुचिस्मितश्शोणवनस्यनाथः।

पिनाकवान्पिङ्गजटाकलापो भद्राकृतिर्भैरव एष भाति।।

39.यस्मिन्स्मृते मुक्तिपथोन्मुखानां पुंसां पुनर्नैव शरीरबन्धः।

कृत्तेन भिक्षार्थममुष्य तस्य पुनश्शरीरं जगृहे हि चित्रम्।।

40.उच्छ्रायिणोवृद्धमहीधरस्य नाथोप्यसौ नित्ययुवा विलासी।

सदाशिवोप्यात्मकिरीटकोटिनिक्षिप्तदोषाकर एव भाति।।

41.अस्मै कृपानिर्भरलोचनाय गृध्रावलस्य प्रभवे परस्मै।

अद्यापि गृध्रद्वयमन्तरिक्षादागत्यनित्यं कुरुते प्रणामम्।

42.धन्यन्धनु[3]ष्कोटिविलेखनान्तर्विगाढवीचीविहिताभिषेकम्।

अत्यद्भुतं स्थाणुममुं फलानान्दातार[4]मालोकय रामनाथम्।।

43.अयं महीयान्मधुरापुरीशस्सोमान्वयैः[5] पाण्ड्यनरेन्द्रवर्गैः।

नीराजिताङ्घ्रिर्निजमौलिमुक्तामणिप्रकाशैर्नियतं विभाति।।

44.देवः किलायन्दय[6]मानचेता भक्तस्य कारागृहयन्त्रितस्य।

[1]विप्रंनिर्वृत्त

[2] Emended, original version वलेकेन

[3]धन्यंधनु

[4]फलानांदातार

[5]पुरीशःसोमान्वयैः

[6]देवःकिलायंदय

जीवातवे जम्बुकचक्रवालं तुरङ्गरूपज्वरितं चकार।।

45.पिष्टादराद्रोधसि वेगवत्याः क्लिष्टाम्मृदं प्राग्वहतोस्य मन्दम्।

वेत्राहतिर्या वपुषि प्रसक्ता सा सर्वजन्तुष्वपि हन्त दृष्टा।।

46.अयं हि संसारमहेन्द्रजालमादौ स्वयं कल्पितवान्महिम्ना।

क्रीडाश्चतुष्षष्टिमिह व्यतानीदद्येति किञ्चित्र[1]मनिन्द्यशीले।।

47.तृप्तस्सदा यज्ञशिरोगिरीशस्त्रिमार्गगोष्णीषपरीतमौलिः।

त्रिभागशोणायतलोचनश्रीस्त्रि[2]कालविज्ञाननिधिर्विभाति।।

48.प्रसूनहेतोः परिवृत्यतिष्ठन्पाश्चात्यराजन्यपुरीलयाय।

मृद्वर्षमेष प्रथयन्स्वभक्त्तामापन्नसत्वामवति[3] स्म राज्ञीम्।।

49.काले जनन्यां कृतसंविधायां कल्लोलिनीपूरनियन्त्रितायाम्।

कस्याश्चिदेष प्रसवोदकायामान्यो[4]न्वतिष्ठत्किलमातृकृत्यम्।।

50.असौ गजारण्यनिवासशीलो गजेन्द्रशुण्डाजलशीकरेण।

क्लृप्ताभिषेकः कृतपुण्यहृ तातन्तुछटाक्लृप्तवितानलीलः।।

51.जलान्तरज्योतिरुदारसत्यज्ञाम्बू[5]नदाकल्पितगोलकाङ्कम्।

जगत्रयीमूलमिदं हि वत्से जागर्ति जम्बूतरुमूलसीम्नि।।

52.प्रजास्समस्ताभवनारिराशेरुत्तारयन्तप्युरगोज्वलोपि।

चित्रन्निमग्नोम्भसि सह्यजायाश्चिरं[6] विभात्येष गजाटवीशः।।

[1]किंचित्र

[2]लोचनश्रीःत्रिकाल

[3]सत्तामवति

[4]प्रसवोदकायांमान्ये

[5]सत्यंजाम्बू

[6]जायाःचिरं

53.आपादचूडं सलिलार्द्रमूर्तिं गजाटवीनाथममुं वरेण्यम्।

आलिङ्गतीव स्वयमुत्तमाङ्गं गङ्गेर्ष्यया सह्यगिरेस्तनूजा।।

54.काञ्चीपुरीमण्डनमुज्ज्वलाङ्गस्सविन्मयोयं सहकारमूले।

प्रत्यक्षतो भक्तिमतां जनानां प्राचीनवाग्भिः प्रतिपादितोर्थः।।

55.अमुष्य सङ्गात्परमद्वितीयः कम्पानदीरोधसि कश्चिदाम्रः।

आसीच्छियोमूलमतश्च लोके माकन्दशब्दम्महितं बिभर्ति।।

56.एकाम्रनाथं प्रथितापदानमेनं समुद्दिश्य पतिश्चिराय।

कम्पातटे कल्पितपर्णशालातपश्चरत्यन्वहमन्नपूर्णा।।

57.प्रसेदुषानेन परं वितीर्णं प्रस्थद्वयीसम्मितशालिमात्रम्।

लब्ध्वा तया त्रिंशदुभौ च धर्माः पोष्यन्त एवान्वहमद्रिपुत्र्या।।

58.अर्थक्रियाकुर्वदयत्नपूर्वमापेषयन्त्रन्ति[1]लमर्दयन्त्रम्।

अपि प्रदीपार्चिरमुष्य भूम्ना कम्पातटे कौतुकमावहन्ति।।

59.श्रीकालहस्तीश्वर ऊर्जितश्रीरुद्यत्कृपापूरित एष देवः।

चमत्करोत्यात्मवपुर्विभेदैश्चराचरं विश्वमुदारभूमा।।

60.पुण्येन गङ्गासलिलेन सिक्तः पुलिन्दगण्डूसलिलेन भूयः।

अयत्नकोटीरमसौ चिदात्मा तारेशखण्डन्तदुपानहञ्च।।

61.शूलाकृते शूलधरेण मांसे भुक्तेमुनारण्यकभुक्तशेषे।

उच्छोषणं केवलमीशभागमुदीरयन्ती श्रुतिरुर्जितार्था।।

62.शोणाचलेन्द्रः प्रभुरेष शुद्धश्शुद्धान्तश्चङ्गारितवामभागः।

पादाब्जयोर्भक्तिविशेषभाजां पुष्णाति पुंसाञ्चतुरः[2] पुमर्थान्।।

63.प्रासूतलोकानखिलान्क्रमेण प्रावर्धयच्चास्य हि धर्मपत्नी।

[1]यन्त्रंति

[2]पुंसांचतुरः

अथाप्यसौ घुष्यत एव चित्रमपीतवक्षोरुहनायिकेति।।

64.तुङ्गो गुणैरेव हि तुङ्गभद्रारोधस्स्थले कल्पितसन्निवेशः।

नाम्ना विरूपाक्ष इतिप्रसिद्धस्तस्यायथार्थं कमलायताक्षः।।

65.उदारमन्तःपुरमम्बुराशेरुत्कूलहंसावलिसैकतश्रीः।

अपाङ्गितानेन सवीचिकम्पा पम्पानदी पावनतामुपैति।।

66.अस्याङ्घ्रिपङ्केरुहलग्नचित्तैर्महा[1]बलैर्मध्यमलोकपालैः।

भूरिद्वितीयातपवारणे यं भूम्नां निकेतैरनुपाल्यते हि।।

67.श्रीपर्वतस्याखिलवाञ्छितानां प्रसाधकस्यैव पतिर्विभाति।

आश्चर्यमस्य स्फटिकोज्ज्वलेन पातालगङ्गापयसाभिषेकः।।

68.नीराजयन्तो निजमौलिरत्नरोचिर्भिरस्याङ्घ्रिसरोजयुग्मम्।

विद्याधराः पुत्रि विनैवयत्नं समीहितार्थान्सहसा लभन्ते।।

69.कैवल्यविश्राणनकीर्तिशालीकाशीपुरीकल्पितसन्निधानः।

चित्रीयमाणं कुरुते मनो मे श्रीविश्वनाथश्शिवतातिरेषः।।

70.काशीपुरेकालवशङ्गतानां[2] कर्णेषु नित्यं करुणार्द्रचेताः।

उदीरयत्येष भवाम्बुराशेरुत्तारणम्मन्त्रमुदग्रतेजाः।।

71.निमीलितानां नियतेर्वशेन दत्वा स्वसारूप्यमयं दयालुः।

सार्थां[3] सहस्राणिसहस्रशो ये रुद्रास्तुतिं हन्त करोति लोके।।

72.अपाङ्गितायाममुना त्रिसन्ध्यमशेषतीर्थैरुपसेवितायाम्।

मङ्कैकवारं मणिकर्णिकायां पुंसं[4] पुनर्नास्ति शरीरबन्धः।।

[1]चित्तैःमहा

[2]कालवशंगतानां

[3]सार्थं

[4]पुंसाः

73.वीथीविटङ्कप्रभुरद्भुतश्रीर्वि[1]शाणनाल्पीकृतकल्पशाखी।

पादं प्रनृत्यत्फणिकिङ्किणीकं वहन्नसौ राजति हाटकेशः।।

74.दूत्ये नियुक्तस्य हि सुन्दरेण द्वारे निवेशं प्रवराङ्गनायाः।

गाण्डीवदत्तं व्रणमस्यमौलौ नासाभिघातेन नवी बभूव।।

75.सूक्तिप्रियस्सुन्दरनाथसूरेः पण्यं वदान्यैः परितोषदत्तम्।

नद्यां विनष्टं किल देवतीर्थे प्रादर्शयद्भक्तपरायणोयम्।।

76.पदेपदे निष्कसहस्रदानं प्रकल्पयन्वीथिविहारकाले।

दृष्टे घनेसौ जलदानशौण्डे वदान्यसाम्यत्रपयान्तरेति।।

77.अंसोल्लसत्तर्णकमास्रदिग्धं करस्थमम्बापटहं करालम्।

मातङ्गवेषं महितं विवृण्वन्विप्रं विशुद्धाध्वरमेष चक्रे।।

78.जागर्ति जाम्बूनदसंसदीशो जेतापुरीमेष जगच्छरण्यः।

आपाटलेनाङ्घ्रियुगेन कुर्वन्नानन्दनृत्तप्रथमावतारम्।।

79.कारुण्यभाजाकबलीकृतस्सन्कण्ठे स्थितोऽनेन[2] हि कालकूठः।

कल्याणवेषग्रहणानुकूलं कस्तूरिकालेपरुचिं करोति।।

80.दृष्ट्वास्य रूपं त्रपयैव नूनं पञ्चायुधः प्रापदनङ्गभावम्।

फालान्तरालाक्षिभुवानलेन प्लुष्टश्शिवस्येति पुराणवादः।।

81.आनन्दनृत्तम्मु[3]हुरादिभिक्षोरातन्वतस्स्वर्णसदस्यमुष्य।

प्रकोष्ठभूषा भुजगेन्द्रचूडा रत्नावली गच्छति दीपिकात्वम्।।

82.अस्याङ्घ्रिपङ्केरुहमष्टमूर्तेराकुञ्चितन्ता[4]ण्डवसंभ्रमेण।

[1]श्रीःवि

[2]स्थितोनेन

[3]अनन्तनृत्तं

[4]राकुञ्चितंता

अजस्त्रमालोकयतां सुराणामानन्दमत्यद्भुतमातनोति।।

83.सुमेरुधन्वासुमुखस्सुराणां स्वाहासखार्केन्दुविलोचनोऽयम्।

पुरत्रयीपुष्करलोचनानां वैधव्यमुद्रां कलयाञ्चकार।।

84.चक्रीकृते येन हि चापदण्डे स नागराजस्स च नाकराजः।

एकासिकां तत्क्षणमेयिवांसौ सोऽयं विभुस्सोमदलावचूडः।।

85.आपादयन्तं वलिमुद्रयैव ज्ञानोदयं भक्तिमतां मुनीनाम्।

योनित्यमास्ते वटशाखिमूले सोऽयं हरस्सोमकलावतंसः।।

86.आपाण्डरं कैतकमुत्तमाङ्गे जटोज्ज्वले बर्हमिवेन्दुखण्डम्।

मालामिवेष्टां सुमनस्स्रवन्तीं वहत्यसौ वासववन्दनीयः। ।

87.गात्रेण वामेन गिरेरपत्यञ्जह्नोरपत्यञ्च[1] जटाभरेण।

दाक्षिण्ययोगाद्दधदेष नित्यं कामी स्वयं कामजिदित्यवाच्यम्।।

88.प्रत्यग्रपाटीरमयाङ्गरागश्रियं शरीरे नवभस्मलेपः।

अस्याधुनानेकपचर्मभूयो नीलाम्बरख्यातिमहो विधत्ते।।

89.पतञ्जलिप्रार्थितमोक्षलक्ष्मीरुदञ्जलिस्वर्गिजनाभिगम्यः।

चिदम्बरेशो जितपञ्चबाणो नाथोयमास्ते नटसार्वभौमः।।

90.अमुष्य मुख्यस्य नटोत्तमानां पुरद्विषः पूर्णमनोरथस्य।

न केवलं कार्मुकमेवहैमं संविन्मयं साध्वि सभातलञ्च।।

91.विचित्रधीश्चारुणिचित्रकूटे विहारवाराहकिरीटधारी।

गोविन्दनामाकुशलास्पदोऽयं कुतूहलं ते कुरुतां तनूजे।।

92.अस्य प्रभोर्व्योमपुरीविनेतुर्लावण्यरेखा ललिता विभाति।

आकारावाञ्चितसौकुमार्यो नाहार एषा सुलभावकाशा।।

[1]गिरेरपत्यं&ह्नोरपत्यंच

93.अयं हि शौरिश्शरणागतानामहो भरं कृष्णपुरीधुरीणः।

आनन्दसान्द्रैररविन्दकान्तैरपाकरोत्याशु कटाक्षपातैः।।

94.अव्याजरम्यामपनिद्रचिञ्चामसत्फलं केसरमन्तरेण।

वि__मानेमुनिभिश्चतुर्भिः कृतार्हणः कृष्णविभुः किलासौ।।

95.असुप्रियोसावभिषेकवल्लयाः श्रीकृष्णमाङ्गल्यपुराधिनाथः।

आकारासौन्दर्यनिधिर्हि भक्तप्राणेश्वरो मे प्रमदं तनोति।।

96.द्वाराङ्कणेऽनुष्ठितसारमेयवृत्ताय भक्त्ताय हि गायकाय।

अयं व्यतानीदपवर्गलक्ष्मीं भक्तासु नाथो हरिनीलनीलः।।

97.परःपुमानेष परार्थ्यपङ्कस्थानेश्वरो बालतमालनीलः।

लक्ष्मीपतिर्लक्षणवान्नतानां पुंसां क्षणात्पुत्रि विहन्त्यघानि।।

98.मध्ये सुगन्धाटविकृप्तकेलिस्वनायिकासूचितपारतन्त्रः।

अयं पुरोदर्शितशङ्खचक्रः संकर्षणाद्यैस्सह संनिधत्ते[1]।।

99.श्रीकुम्भघोणे नवशातकुम्भसरोजिनीरोधसि शार्ङ्गपाणिः।

करोति सान्निध्यमसावजस्त्रं सहस्त्रनेत्राद्यमरैरुपेतः।।

100.माली बली मन्मथजन्मभूमिर्मन्दस्मितो मङ्गलविग्रहश्रीः।

कृपाणवान्कृत्तसपत्नलोकश्यामो विभात्येष हि शार्ङ्गपाणिः।।

101.असावरक्षत्कमलायताक्षः कपिस्थलेशः करुणार्द्रचेताः।

मूलेति भीत्या मुहुरुच्चरन्तं गजेन्द्रमम्भश्चरशिंशुमारात्।।

102.अयं हि नाथः खलु पापनाशक्षेत्रस्य सह्यात्मजयोर्जितस्य।

निरस्य चोलेश्वरविप्रहत्यां निर्वक्ति यः पापविनाशनाख्याम्।।

103.पलाशपृथ्वीरुहकाननानां भर्तुर्वसुक्ष्मापतिरक्षकस्य।

[1]सन्निधत्ते

आस्तेस्य हस्तोऽयमपूर्वकुम्भे वक्षोजकुम्भे च निजाङ्गनायाः।।

104.शुभ्रार्चिषश्श्वेतगिरेरजस्रं सुत्रामनीलोत्पलशृङ्गतुल्यः।

शोणाम्बुजाक्षस्स मृगेक्षणोक्त्या प्रायः प्रसिध्यद्गृहमेधितन्त्रः।।

105.पूर्वं महापातकनाशनाय फुल्लाटवीचन्द्रमसं पुराणम्।

अमुं युवानं प्रणिपत्य पश्चात्पश्यन्ति सर्वे खलु रामसेतुम्।।

106.अवत्यसौ नित्ययुवापुरीन्तां[1] श्रीविल्लिपुत्तूरिति विश्रुताख्याम्।

अस्यां भुवां मातृवती विनीता सीतेव गोदा गुणभूषणाभूत्।।

107.यो दक्षिणे दक्षिणवारिराशेस्तटे शयानस्तरुणाम्बुजाक्षः।

उद्योतते सोऽयमुदग्रधामा पयोदनीलः खलु पद्मनाभः।।

108.भद्रास्पदे फल्गुननाम्नि तीर्थे स्नात्वाग्रतोऽमुष्य[2] सरोजनाभेः।

गवां सहस्राणि विभूषितानां विप्रोत्तमेभ्यो विततार सीरी।।

109.अनन्तभोगप्रतिपन्न[3]सौख्यो निरन्तरायस्फुरितानुभावः।

उद्यानशैलेश्वर एव साक्षादुद्योतते सुन्दरराजनामा।।

110.नृपैर्गजानां पतिभिस्समस्तैर्गौडेश्वरैर्धैर्यधनैस्सुसेव्यः।

जिष्णुर्जगन्नाथ इतिप्रतीतस्स्फुरत्यसौ फुल्लसरोरुहाक्षः।।

111.अयं हि विद्यानगरीनिवासश्श्रीविट्ठलो विश्रुतपाण्डुरङ्गः।

सिंहासनस्थक्षितिपाललोकं कृतार्थयत्यद्य[4]कृपाविशेषैः।।

112.काञ्चीपुरीशः[5] कमलप्रसूतेरुल्लासवानुत्तरवेदिमध्यात्।

[1]पुरींतां

[2]वाग्रतोऽमुष्य

[3]प्रपिन्न

[4]यत्यत्र

[5]काञ्चपुरेशं

अविर्बभूवायमनन्तवापीतटीतमालस्तरुणाम्बुजाक्षः।।

113.शिखामणिर्निर्जरमण्डलानां चिन्तामणिर्याचकसञ्चयानाम्।

रक्षामणिर्भक्तपरम्पराणामसौवृषाद्रेरधिपो विभाति।।

114.असौ विभात्यञ्जनशैलराजो वपुःप्रभावञ्चितवारिवाहः।

सिद्धाञ्जनं भक्तविलोचनानामुदारतारञ्जितराजलोकः।।

115.ददात्यसौ मार्गणमण्डलेभ्यो न केवलं सम्पदमेव शीघ्रम्।

छिन्नानि चाङ्गानि नवानि चित्रं गोप्ता दयालुर्गृहदीर्घिकायाः।।

116.असौ जगत्कारणहेतुभूतः श्रीरङ्गनाथो जगदेकनाथः।

मरुद्दधासैकतमध्यवर्ती मान्योदयो राजति मङ्गलात्मा।।

117.पुरार्चितः पङ्कजसंभवेन पूषान्ववायैश्च विभीषणेन।

पुष्णाति भूमेश्श्रियमद्य सोऽयं पुण्ये विमाने प्रणवायमाने।।

118.जगत्समस्तं रजसाविधत्ते सत्वेन तत्पालयते स एषः।

विहन्ति भूयस्तमसा तदेवमेकोऽधिकारत्रितये निरूढः।।

119.शङ्खी रथाङ्गी शतपत्रनाभः शमस्थितश्शत्रुगणस्य शास्ता।

श्रीवत्सवान्जृम्भितकीर्तिपूरो विश्वाकृतिर्विष्णुरसौ विभाति।।

120.मनुष्यधर्मा धनदस्सशङ्खो मान्योदयश्रीरलकोज्ज्वलोऽपि।

रङ्गेश्वरो नामजनार्दनोऽयं कुबेरभावं भजते न चित्रम्।।

121.भानौ प्रपन्नेपि दिनस्य मध्यं श्रीरङ्गधामेशितुरस्य यूनः।

आभाति रत्नाभरणप्रकाशैर्बालातपछन्नमिवान्तरिक्षम्।।

122.कौमोदकी लक्ष्मणि रङ्गधाम्नि त्रिधाम्नि दैत्यद्विषि दृष्टमात्रे।

विधूयपापानि विनैव यत्नं पुण्यातिरेकं पुरुषा लभन्ते।।

123.विनापि योगञ्च विनापि यागं विनापि वेदान्तविगाहनानि।

पादाम्बुजं केवलमस्य दृष्ट्वा पचेलिमः प्राणवतां प्रबोधः।।

124.पुंसावतंसीकृतहल्लकेन कंसारिणानेन गदाधरेण।

न केवलं राजति रङ्गमेव चराचरात्मा सकलोऽपिलोकः।।

125.अपाङ्गिताः काममनेन पूतास्तृणाय मत्वा दनुजापदानम्।

नयन्ति कालं सममप्सरोभिर्नाकौकसो नन्दनवाटिकासु।।

126.अयं हि मत्स्यावतरादिभेदै[1]र्नित्यो युवा निर्मितलोकरक्षः।

त्वद्भागधेया त्वरितोद्य वत्से सभान्तरे सन्निधिमातनोति।।

127.अमुष्य मुग्धाननचन्द्रकान्तेरौपम्यक्लृप्तौ विधिरादृतस्सन्।

विलोड्य नूनं विदधाति वृद्धिक्षयापदेशात्प्रति[2]मासमिन्दुम्।।

128.कस्तूरिकागन्धिमुखारविन्दं कल्हारदामोल्लसदुत्तमाङ्गम्।

युवानमाजानुविलम्बिबाहुमेनं हि नारायणमामनन्ति।।

129.एवं हरिं वर्णयति क्षितीशे शृङ्गारचेष्टाद्भुतनाटिकायाः।

नीलोत्पलाक्षी निपुणस्मितांशुपुष्पाञ्जलिं सा व्यकिरत्पुरस्तात्।।

130.अन्तर्निमग्नप्रसवास्त्रबाणपुङ्खोपमेयैः पुलकप्रपञ्चैः।

नित्योदये रङ्गिणि भावबन्धं नितम्बगुर्वी प्रकटीचकार।।

131.स्वैरोदितेन प्रणयेन रेजे सुभ्रूर्मुहुः स्विन्नशरीरयष्टिः।

श्रीरङ्गनेतुर्महिषी पदे सा शृङ्गारजेनेव कृताभिषेका।।

132.निबद्धभावमथ रङ्गराजे निजान्तनूजां[3] नृपतिर्विलोक्य।।

वत्से कृतार्था वरणस्रजं त्वं कण्ठे च पुंसः कलयेत्युवाच।।

133.श्रुत्वा पितुर्वाक्यमथ प्रहृष्टा शुचिस्मिता रङ्गपतेस्सलीलम्।

कण्ठे मनोहारिणि कम्बुकण्ठी कल्हारमालां कलयाञ्चकार।।

[1]मत्स्याद्यवतारभेदैः

[2]पदेशाप्रति

[3]निजांतनूजां

134.तया बभौ तस्य भुजान्तरालं विलाससख्या[1]वनमालिकायाः।

नक्षत्रमालापरभागवत्या संध्यांशुपङ्क्तेव नभोन्तरालम्।।

135.प्रत्यग्रसंपन्नमनोरथौ तौ परस्परालोकनसाभिलाषौ।

ह्री यन्त्रणा काप्यरुणत्तदानीं जायापती रङ्गपुरीधुरीणौ।।

136.अमर्त्यतूर्याणि विनेदुरुच्चैरालोलकोणाहतपुष्कराणि।

आश्चर्यमेधाववृषुस्तदानीमाखण्डलोद्यानतरुप्रसूनम्।।

137.कबलितशतकोटिख्यातिबाहुप्रकाण्डे

सपदिनिचुलवल्ल्या संगते रङ्गराजे।

स सुरदनुजवर्गः केवलन्नैष[2] लोके

स्वयमणिपितृमत्तां स्वीचकारेषुधन्वा[3]।।

138.देवो यस्य भुजङ्गभोगशयनःश्रीरङ्गराजो हरिः

तातःकाश्यपचक्रायविबुधो लक्ष्मीर्जनन्युत्तमा।

तस्यैवोत्तमनम्बिसत्तिरुमलाधीशप्रबन्धुः कृतौ

लक्ष्मीकाव्य उदारवैभवनिधौ सर्गो गतो द्वादशः।।

अथ त्रयोदशस्सर्गः

1.अथागरुभवैर्धूपैरामोदवति मण्डपे। वधूवरौ गुणोपेतौ भेजतुर्भद्रमासनम्।।

2.विवाहसूचकस्तत्र मङ्गल्यश्शङ्खनिस्स्वनः। उदभूदुज्ज्वलतरः कालमेघरवोपमः।।

3.कौतुकं दधतुश्चित्ते पूर्वपुष्पास्त्रशासनात्। पश्चाद्वधूवरौ पाणौ शासनेन पुरोधसः।।

[1]विलासवत्या

[2]केवलंनैष

[3]स्वीचकारेषुक्षुधन्वा

4.पुण्ये मुहूर्ते तत्राग्निं प्रतिष्ठाप्य पुरोहितः। वधूवरौ पुरस्कृत्य[1] वैधं कर्माकरोत्स्वयम्।।

5.व्यसृजत्सुमुखी लाजान्विधिना चोदितानले। पवनेनेरिता वल्ली प्रसवानीव पल्लवे।।

6.आचाराङ्गीकृताधूम्यालाजहोमसमुद्भवा। वधूवदनराजीवेभृङ्गराजश्रियन्दधौ[2]।।

7.धृतवैवाहिकाकल्पौ होमधूमारुणेक्षणौ। तौ दम्पती नरेन्द्राणाञ्चक्र[3] तुर्नयनोत्सवम्।।

8.अन्योन्यपुलकस्वेदसूचितान्योन्यसौहृदौ। लक्ष्मीनारायणौ स्मेरमुखाब्जौ मुदमीयतुः।।

9.अनयोरनुरागार्द्रचित्तयोश्चोलभूपतिः। विवाहं कारयित्वैवमात्मानं[4] बह्वमन्यत।।

10.रूपलावण्यसौभाग्यशौर्यगाम्भीर्यशालिषु। सत्स्वन्येष्वपि देवेषु वीरसेनस्वयंवरे।।

11.कण्ठे रङ्गपतेर्मालामर्पयामास सा यदा। तदा प्रभृति तं सर्वे सौम्यजामातरं विदुः।।

12.प्रभयेव सहस्रांशुर्ज्यो[5]त्स्नयेन[6] सुधाकरः। स्वाहयेन[7] बृहद्भानुर्लक्ष्म्या रङ्गपतिर्बभौ।।

13.धनं स निचुलावल्ल्यै धन्या धात्रेयिकाः शतम्[8]। वितीर्य यौतकत्वेन रङ्गेश्वरमतोषयत्।।

14.मदावलानां घटया मालया वरवाजिनाम्। दत्तवानृपतिर्देवमप्रमेयमधोक्षजम्।।

15.ऐन्द्रनीलैर्भृतं पूगैरहिवल्लिदलैरपि। अदात्पटलकं हैमञ्जामात्रे[9] पारितोषिकम्।।

16.हैमतण्डुलभाराणां षष्ट्युत्तरशतत्रयीम्। हैरण्यानि फलान्यस्मै हरिणीकृतवान्नृपः।।

17.मधुद्विषः पुरो भक्त्या मङ्गलारात्रिकक्रियाम्। वराङ्गनाजनश्चक्रे वलत्कर्पूरदीपिकाम्।।

18.कैशिकीं वृत्तिमालम्ब्य जनितं जनरञ्जकम्। आद्यनृत्तं सुरस्त्रीणामालुलोके परःपुमान्।।

19.कृतेसुरासुरैस्सार्धं कृत्वा मथनमम्बुधेः। इन्दिरामकृथाः कामिन्नर्धोरस्स्थलमन्दिराम्।।

[1]पुरस्कृत्वा

[2]भृङ्गराजिश्रियंदधौ

[3]नरेन्द्राणांचक्र

[4]कारयित्वेवमात्मानं

[5]स्रांशुःज्यो

[6] Emended as ज्योत्स्नयेव

[7] Emended as स्वाहयेव

[8]धात्रेयिकाशतम्

[9]हैमंजामात्रे

20.चण्डीरमणकोदण्डपरिखण्डनपण्डितः। कमलां मैथिलीसंज्ञा त्रेतायां त्वमुपायथाः[1]।।

21.मिषतां द्विषतां राज्ञां रुक्मिणीं रुक्मभूषिताम्। दोर्दण्डचण्डिमस्फूर्त्या द्वापरे व्यूढवानसि।।

22.विश्वाधिकविशालाक्षविभ्रमैरद्य केवलम्। तुल्यानुरागां निचुलां त्वं पाणौ कृतवानसि।।

23.हस्ते करणसौलभ्यमस्मिन्[2] कलियुगे तव। यत्तन्नायास्त्येवमतिमन्नपरस्मिन्युगत्रये।।

24.इति शश्वद्रमाकान्तमिन्धानं रङ्गधूर्वहम्। आलापैरमृतप्रायैरस्तुवन्मागधास्तदा।।

25.मन्दस्मितशिरःकम्पमान्यालापैर्यथोचितम्। अभीष्टफलदैर्देवानप्रीणयदधोक्षजः।।

26.आह्लादयन्नृपश्रेणीमानतामवलोकनैः। विभवैर्योजयामास विभुर्विश्वधुरन्धरः।।

27.यथाक्रमम्म्हीपालो यातुकामान्दिवौकसः। पूर्णश्रीरत्ननिकरैः पूज्यामास पुष्कलैः।।

28.संपूजितास्तदा देवास्सविशेषम्महीभुजा। निखिलैर्वाद्यनिर्घोषैर्निर्जग्मुर्निचुलापुरात्।।

29.अनघन्निचुला[3]नाथमनुगच्छन्तमच्युतः। न्यवर्तयदिमं सोऽपि प्रणम्य स्वपुरीं ययौ।।

30.निवर्त्य श्वशुरं शौरौ गच्छति स्वपुरं प्रति। दूरेऽश्रूयत दैत्यानां सेनानिस्त्राण निस्वनः[4]।।

31.शार्दूलध्वजमुत्तुङ्गचामीकरमयं पुरः। अद्राक्षीद्रङ्गिणस्सेना तार्क्ष्यध्वजविभूषणा।।

32.विपक्षध्वजिनीं घोरां वीक्ष्य सारङ्गिणश्चमूः। स्फुरद्दक्षिणदोश्शीर्षापुष्यद्रणरसाभवत्।।

33.बद्धक्ष्याभटाः कोशादुत्खातः खड्गसंचयः। आरोपितगुणाश्चापानिषङ्गादुद्धृताश्शराः।।

34.मुहुराबद्धसन्नाहामौकुन्दी सा वरुथिनी। आसुरीं ध्वजिनीमग्रे लक्षीकृत्य ययौ जवात्।।

35.अग्रस्कन्धेऽरि[5]सैन्यस्य व्यूहविन्यासशालिनः। स्थित्वोत्पुच्छयमानं[6]तं स्थिरदंष्ट्रोत्कटाननम्।।

स्थिरदंष्ट्रोत्कटाननम्।।

36.निर्भयं रङ्गिणस्सेना निशितानखपञ्जरम्। चिरं निर्वर्णयामास चित्रकायं महासुरम्।।

[1]त्वामुपायथाः

[2]सौरभ्यमस्मिन्

[3]अनघंनिचुला

[4]सेनानिस्सणनिस्वनः

[5]अग्रस्कन्धेरि

[6]पुच्छायमानं

37.अमर्षमिवतम्मूर्तमहङ्कारमिवाङ्गिनम्। आशौचमिव संस्पृश्यमघौघमिवचाक्षुषम्।।

38.नीलचर्मधरं भीमन्निशितासिलतोज्ज्वलम्। प्रावृदकालमिवाम्भोदप्रान्तस्फुरितविद्युतम्।।

39.गिराविवरथे लोलत्पताकानिर्झरेस्थितम्। पूषाङ्घ्रिपमिवोद्दत्तं सदा पल्लवसाधकम्।।

40.दंष्ट्रारोचिः प्रपञ्चेन दीपिताखिलदिङ्मुखम्। कण्ठीरवनिनादेन कदर्थितघनध्वनिम्।।

41.वीक्ष्यापितं प्रतिभयं निधातारङ्गिणश्चमूः। अभ्यमित्रीणतान्नैव विजहौ विधृतायुधा।।

42.अथोपसृत्य दण्डेशध्वजिनीप्रथमोद्रुतम्। विघ्नहारी गजमुखो जगर्ज व्याघ्रदानवम्।।

43.अकाण्डं मृत्युं स्सर्वेषामसुराणामधोक्षजः। रङ्गधामा हि भगवान्गतस्ते कर्णगोचरम्।।

44.निरङ्कुशबलस्तोमनिचुलापुरभूभुजः। उदूत्द्यकन्यां स्वपुरं प्रति याति चमूसखः।।

45.निस्सीमवैभवस्यास्य निचुलाधिपकन्यया। रङ्गं विविक्षतोऽसि त्वं प्रवेशबलिरद्यभोः।।

46.पुरानीलीवने रङ्गी तमालतरुशालिनि। मृगयाच्छद्मनाहन्तुं त्वामेवत्वरितोऽभवत्[1]।।

47.तस्मिन्नवसरे त्वन्तु संप्रेक्ष्य वधमात्मनः। असमर्थस्समर्थत्तुस्वामिनोऽन्तर्हितो भवः।।

48.अरे दिष्ट्याद्य दृष्टोऽसि मृत्युना परिचोदितः। तत्पुरं गमयित्वा त्वां वैरशुद्धिं करोम्यहम्।।

49.आशाबन्धोऽस्ति भवतो जीविते यदि दानव। दानवारिं प्रपद्यस्व सर्वभूताभयप्रदम्।।

50.मत्स्वामिचरणाम्भोजद्वन्द्वं मूर्ध्नासमुद्वह। प्राणान्लब्धुं परं श्रेयः प्राप्तुं च यदितेऽर्थिता।।

51.यद्वा स्वयामनीं गन्तुं[2] सज्जस्त्वं सहयुध्वनः। पुरतो मम सन्नाह दण्डचक्रान्वितः कुरु।।

52.इत्युक्तयो र्गजास्येन गणाध्यक्षेण पक्षयोः। उभयोश्चरमन्दर्पादूरीचक्रे स दानवः।।

53.अथाध्यवस्यतोर्चोद्भूमहं पूर्विकया तयोः। _____ तत्रैवाविरभूद्रङ्गी तमालतरुमेचकः।।

54.तस्मिन्साक्ष्ये स्थिते देवे वारणव्याघ्रवक्त्रयोः। तयोस्समभवत्तत्र संग्रामो रोमहर्षणः।।

55.परस्परजयोत्साहकोलाहलसमाकुले। युयुधा ते तदा दण्ड _____ दैत्यादि[3]दैत्ययोः।।

[1]त्वरितोभवत्

[2]स्वयगन्तुं

[3]दैत्यारि

56.रथी रथिनमश्वोश्वं पत्तिःपत्तिं गजोगजम्। देशान्तरात्समायातो बन्धुर्बन्धुमिवाभ्यगात्।।

57.करीन्द्रबृंहितैश्चक्रचीत्कारैर्वाजिहेषितैः। अपि कार्मुकविफारैरासीच्छब्दमयं जगत्।।

58.निस्साणनिनदैर्भीमैःफलकास्फालनस्वनैः। चापास्तशरशात्कारैरासन्बधिरितादिशः।।

59.निजवंशस्थबिरुदवीर्यविन्यासमुद्रितैः। अन्योन्यपादैर्वीराणां पूरितं भुवनत्रयम्।।

60.इतरेतरमुक्तानामिषूणां नतपर्वणाम्। निकरैरभवत्क्षिप्रं निरन्तरमथाम्बरम्।।

61.परस्परविधूतासि घट्टनोत्थस्तनूनपात्। सेनासागरयोर्भूयो बडबानलतां ययौ।।

62.चतुर्विधास्त्रमोक्षेषु चतुरास्ते चमूचराः। मिथः खलु चुरीयष्टिशक्तीषु भुरताडयन्।।

63.भग्ने कुन्ते निजे कुन्तकूटसंघट्टनात्परः। परस्य खड्गमादाय चिच्छेद करिणः करम्।।

64.शत्रोः खड्गप्रहारेण मूर्छितस्सुभटो रणे। मूर्छोपाय क्षणे भूयस्तमेवाकृतमूर्छितम्।।

65.बाणानां ततिभिः केचिदाकर्णं कृष्टकार्मुकाः।अवाकिरन्गजान्मेघाधाराभिरिव पर्वतान्।।

66.साति मुक्तैश्शरैर्भिन्ना निशितैर्मदकुञ्जराः। चेलुः कल्पान्तजनितैः पवनैरिव पर्वताः।।

67.धीरैःकैश्चिन्महासत्त्वैस्तरवारि[1]भिरुज्ज्वलैः। प्रच्छिन्नरदना रेजुः करिण्य इव वारणाः।।

68.वीरोन्मुक्तशराघातवेदनाजातबृंहिताः। पद्मिनःपातितारोहाःपरितस्तत्र बभ्रमुः।।

69.अङ्गलग्नं गजेन्द्रस्य च्छित्वा कङ्कटमायसम्। वीरस्त्वचमिवक्षोण्यां पातयामास सायकैः।।

70.शत्रुमुक्ताञ्शरान्केचित्सहसा पततोरणे। चर्मणा विनिवार्याशु व्यूहमध्यं व्यगाहत।।

71.कश्चिदेकेन भल्लेन करिणा चरणान्बहून्। सलीलमिवचिच्छेद रामस्सालतरूनिव।।

72.मिथः प्रहरणाघातमृतवीरगणे रणे। नितान्तं सुरकान्तानां कृतान्ते पूततां ययौ।।

73.वेतण्डपृथुशुण्डाग्रप्रहारपरिविह्वलः। छिन्नजिह्वः पतद्दृष्टिः पपाताखो रणाङ्गणे।।

74.ततो युद्धाय सन्नद्धौ तावुभौ दर्पशालिनौ। नितान्तशातरदननखाङ्कुशमहायुधौ।।

75.गण्डस्यन्दिमदापूरो गणाध्यक्षो गजाननः। द्वीपिदैत्यमुखेदीप्तौ दन्तकुन्तौ न्यमज्जयत्।।

76.उग्रौ स तत उद्गृह्य[2] दन्तौ दृप्तो गजाननः। आदाय दुर्नमच्चापं सन्दधेऽत्र शराञ्शितान्।।

[1]तरक्षवादि

[2]उद्धृत्य

77.भूष्णुर्गजाननो भूयः पुष्यन्मदपयस्स्रुतिः। दनुजं व्याघ्रवदनं शितैर्बाणैरवाकिरत्।।

78.गजाननेन सहसा विमुक्तान्विशिखान्शितान्। अरुणत्फलकप्रख्यैरसौ नखरपञ्जरैः।।

79.पुनश्चादाय कोदण्डं पुङ्खितैस्तत्र सायकैः। अकृन्तन्मर्मसुक्रोधादनेकपमुखं रिपुः।।

80.वलद्भ्रांकर्णतालाभ्यां व्याघ्रासुरशरोत्करम्। ___ प्रतीपं प्रेरयामास प्रदीप्तो दण्डपालकः।।

81.तैरेवं पूरितं बाणैर्यथापूर्वजवोद्धतैः। व्याघ्रा सुरमुखं भीमं तूणिरश्रियमाययौ।।

82.चित्रीयमाणहृदयश्चित्रकायमुखोरुषा। गजास्यशुण्डां तूणीरमकरोदात्मपत्रिणां।।

83.चलाभ्यां कर्णतालाभ्यां चर्माभ्यामिव[1] सत्वभूः। अवारयद्गजमुखो दैत्यमुक्ताञ्शिलीमुखान्।।

84.गजाननकटस्यन्दि मदगन्धि समीरणः। जहार समरश्रान्तिं भटानां शरपक्षकाः।।

85.दन्तिवक्त्रधनुर्मुक्तैस्ताडितोऽथ शिलीमुखैः। व्याघ्रासुरः पपातोर्व्यां मुमोह च मुहुर्मुहुः।।

86.वारणास्यकरोन्मुक्तवमथुत्याजितक्लमः। उदतिष्ठत्पुनर्दैत्यो युद्धार्थं चादधे धनुः।।

87.दोर्भिश्चतुर्भिः तत्काले दुर्ममो द्विरदाननः। जग्राह व्याघ्रदैतेयं जगर्ज चमुहुःकृती।।

88.पातितं रणभूमौ तं पादेनाक्रम्यदानवम्। निर्जघानसदन्ताभ्यां निशिताभ्यां गजाननः।।

89.निहते व्याघ्रदैतेये नीलीवननिवासिनि। नागाननं गणाधीशं ननन्दुरखिलाः प्रजाः।।

90.काहलीकृतसञ्छिन्नकरिशुण्डास्तदा मुहुः। आजिभूमौ सहस्त्रीभिरनृत्यन्पिशिताशनाः।।

91.शिरस्त्रैः काञ्चनैश्शीर्णै रराज रणमेदिनी। वर्चराय इव क्षिप्तैरर्चनास्वर्णपङ्कजैः।।

92.चलच्चामरशैवालाः प्लवमानध्वजद्रुमाः। आयोधनाङ्गणे तस्मिन्प्रावहन्नुधिरापगाः।।

93.प्रहृष्टमनसस्सर्वे विष्वक्सेनभटारणे। जयशब्दं प्रयुञ्जाना रङ्गराजमथास्तुवन्।।

94.इत्थं रङ्गपतिर्विजित्य सयशः कर्पूरपूराञ्चित-

त्रैलोक्यो दृढशौर्यधैर्यविभवैर्व्यघ्रासुरंभासुरम्।

संग्रामात्तजयप्रशस्तिपटहश्रेणीनिनादोद्भटः

साकं सह्यभवां ततारतरुणप्रायैर्निजैस्सैनिकैः।।

[1]चर्मभ्यामिव

95.ऊढेनानेकसंख्यैर्नृभिरतिगुरुणा कूर्मपृष्ठस्तदाशा

दन्तिश्रेणीधृतेन द्रुतकनकमयेन हिराजेनगच्छन्।

विश्णुर्वीथीषु लक्ष्म्या सह तदुरुफणा कोटिरत्नोज्ज्वलाङ्गो

विभ्रज्जामातृवेषं स्मर इव सरतिर्माननीयो बभासे ।।

96.देवो यस्य भुजङ्गभोगशयनश्श्रीरङ्गराजो हरिः

तातः काश्यपचक्रायविबुधो लक्ष्मीर्जनन्युत्तमा।

तस्यैवोत्तमनम्बिसत्तिरुमलाधीशप्रबन्धुःकृतौ

लक्ष्मीकाव्यवरे त्रयोदश इह क्षेमेणसर्गोगतः।।

अथ चतुर्दशस्सर्गः

1.अनन्तरं श्रितफणिराजपीठिकस्सतत्फणामणिकिरणारुणाकृतिः।

पयोधिजापतिरभिजातविभ्रमः शनैः पुरीसविधमवाप सत्वभूः।।

2.सविष्टरश्रवसिफणीन्द्रविष्टरे त्रिविष्टपच्युतसुमनः प्रसाधिते।

निषेवणागतजनतादृशस्तताः तदापतन्युगपदुदग्रकौतुकाः।।

3.सकौस्तुभत्विषिगरुडध्वजे हरौ पयोनिधेर्दुहितरि चैतदन्तिके।

तदासनोरगपतिभोगमण्डले मुहुस्समम्मुदमभजत्तदा जनः।।

4.फणाभृतो मणिगणरश्मिरञ्जिताफणातता विपुलतरातपत्रताम्।

समेयुषस्स्थितिमधिभोगमण्डलं मधुद्विषस्समगमदुज्ज्वलश्रियः।।

5.रजोगणैरभिमतसैनिकोत्थितैः नभोङ्गणे भजति महीतलश्रियम्।

अधोगतः फणधरपुङ्गवोजनैः रसातले स्थित इव दृश्यतेस्म सः।।

6.प्रकम्पिताच्युतभुजमध्यहल्लकस्रगावलीनवमकरन्दमन्थरः।

समीरणोऽजनि धुतचामरोद्भवः फणिप्रभोरशनमभीष्टमञ्जसा।।

7.पयोधिजाप्रियतमपार्श्वयोर्द्वयोः तलोदरीकरवलयांशुपिञ्जरैः।

प्रकीर्णकैः पदचलितैः पदे पदे पतत्रवानिव ददृशे फणीश्वर।

8.मनोहरोमलयजलेपनोज्ज्वलोऽवतं[1]सितप्रतिनवकेतकीदलः।

मुखाम्बुजस्फुरितसुगन्धिमारुतो मुहुर्मुहुर्मुदमकृतो[2]रगेशितुः।।

9.फणाधरप्रभुररुणत्फणामुखप्रजृम्भितश्वसनभरेण रङ्गिणः।

विसृत्वरीं बहुलपरागमण्डलीमगान्मरुद्यजनभवोपदेशताम्।।

10.फणीश्वरः पवनपदं पिबन्मुखैः प्रतिक्षिपन्श्वसनभरैः पयोधरान्।

प्रकम्पयन्भुवमुरुभोगभारतः शिरोमणिद्युतिभिरनुन्यवारयत्।।

11.विलोचनैर्विगतनिमेषनिश्चलैः विलोकयन्नसभरविस्तृताञ्चलैः।

ननाम तं नगरजनः कृताञ्जलिः जनार्दनं स्थितमहिभोगमण्डले।।

12.समाधवो मरतकसाल[3]मण्डलीं समुल्लसद्गुरुकुरुविन्दगोपुराम्।

समाविशत्पुरममरावतीसमां समुज्ज्वलां मणिगृहसौधमण्डलैः।।

13.खगेश्वरध्वजपटजातमारुतप्रकम्पितप्रबलवलाहकव्रजम्।

प्रसेदिवान्प्रगुणिचतत्रनिर्मलः सदक्षिणम्मणिमयगोपुरं ययौ।।

14.फणीशितुर्वदनसहस्रमारुतैः मुहुर्मुहुर्विगतरजोमहीतलम्।

विजृम्भितैरगरुगधूपराशिभिः वलाहकैरिव पुरमास मेचकम्।।

15.सचामरः कनकमयातपत्रवान्समुज्ज्वलाकृतिरभिजातभूषणः।

सझल्लरीपटहमृदङ्गनिस्स्वनः सवीथिकाविहरणतत्परोऽभवत्।।

16.पुरातनं पुरुषमुदारदर्शनं विलोकितुन्निज[4]निजकार्यनिस्पृहाः।

समुन्नतं मणिगृहसौधमण्डलं क्षणात्समारुरुहुरथोत्पलेक्षणाः।।

[1]पनोज्ज्वलोवतं

[2]मुहुर्मुहुर्मदमकृतो

[3]मरकतसाल

[4]मोदयंनकेवलं

17.विगाहतोऽहमहमिकासमुन्नतं गवाक्षवच्छशिमणिसौधमण्डलम्।

चलदृशो युवतिजनस्य दक्षिणाम्मनोभवस्सविधमगात्स कार्मुकः।।

18.तनुप्रभाविजिततटिद्गुणास्तदा मृगेक्षणाश्शशिमणिसौधराजिषु।

चकाशिरे कनकलता इवानिलप्रणर्तितास्त्रिपुरहराद्रिसानुषु।।

19.अपेक्षया मधुमथनस्य सुभ्रवां समुत्सुकैर्मदनविकासनिर्भरैः।

विलोचनैस्स्फटिकगवाक्षमण्डलं सरोरुहैरिवनिबिडं सरोऽभवत्।।

20.उषस्स्फुरत्कमलसमानरोचिषा करेण काचन धृतरत्नमालिका।

नवातपद्युतिविततिप्रशस्तया समं बभौ सहदिवसागमश्रिया।।

21.तलोदरी तनुतरमध्यमापरा पयोधरद्वितयभरस्खलद्गतिः।

अदृश्यतापतितशुभोत्तरीयका शुचिस्मितस्तबकितपाटलाधरा।।

22.त्रिविक्रमार्पितनयनाञ्चलापरा नितम्बिनी द्रुततरचङ्क्रमाकुला।

विवेदनप्रशिथिलकेशबन्धनात्परिच्युतां नवसुमनः परम्पराम्।।

23.अधोक्षजं युवतिजनस्य पश्यतः पृथुस्तनद्वितयभरावखेदिनः।

न केवलं मुखशशिबिम्बमेव तत्प्रसन्नतामभजत मध्यमप्यहो।।

24.दधच्छ्रियं नवगुलिकामिवोरसा खगेश्वरध्वज उरगे निषेदिवान्।

जगद्गुरुर्मुररिपुराहितुण्डिकभ्रमं मुहुः प्रकटयति स्म सुभ्रुवाम्।।

25.बभार तं तरुणिमविभ्रमोदयन्न केवलं[1] भुजगनिकायनायकः।

नतभ्रुवान्ततिरपि सुन्दरश्रियां दृगुत्पलैरपि हृदयाम्बुजैरपि।।

26.यथा यथा विगतनिमेषया दृशा पुरातनं पुरुषमुदग्रयौवनम्।

विलोकयन्त्यधिमणिसौधमङ्गनाः तथा तथा स्मरशरलक्ष्यतां ययुः।।

27.स्थितिर्विभोश्रुति[1]सविधे तवानिशं तदद्यनस्सफलयितुं स्मरातुराः।

[1]मोदयंनकेवलं

निवेदयाण्डजपतिकेतवे शनैरितिस्त्रियो मणिमुकुरं ययाचिरे।।

28.सुदर्शनत्वयि विनिवेशिताशयस्त्रिविक्रमस्त्वमपि तदर्पिताशयः।

अतो निवेदय हरये स्मरव्यथामिति स्फुटं तमवददाशु काचन।।

29.चतुर्भुजाननशतपत्रमारुतप्रपूरितोदरदरराजते नमः[2]।

स्मरव्यथां[3] मम सरसाय रङ्गिणे निवेदयेत्यथ तमयाचता परा।।

30.तथैव[4] नोवदतमनोभवश्रमं यथा कृपां स च भगवान्विधास्यति।

इति स्फुटन्तद[5]भिमतं धनुर्गदां कृपाणमप्यथ पृथगूचिरेऽङ्गनाः।।

31.अधिष्ठतोरगपतिभोगमण्डलस्तदाननश्वसनविलोलकुन्तलः।

अपाङ्गयन्प्रणतजनान्मुहुर्बभौ पुराङ्गनाः स्मितकलयाचमोहयन्।।

32.कलत्रवान्कलशपयोधिकन्यया प्रयाञ्शनैः फणधरनायकासनः।

अगाहतस्फटिकमिवाशयन्तदामृगीदृशां मदन इवापरो हरिः।।

33.मृगीदृशो मृगमदगन्धिकन्धरा मृगाङ्कजिद्वदनसरोरुहप्रभाः।

परस्परं मधुमथनाङ्गवर्णनारसालसामुहुरभवन्कचित्कचित्।।

34.उपेक्ष्यतामुषसि विकस्वराम्बुजे निराशतां शशधरमण्डलेन वे।

नतभ्रुवां विरचयति स्म रङ्गिणो मनोहरं दरहसितोज्वलं मुखम्।।

35.पटच्छदाकृतिजठरे दधाति यः सदा चतुर्दशभुवनानि तं हरिम्।

स्वभोगतो वहति यतश्चतुर्भुजात्फणाभृतां पतिरतिरिच्यते स्म सः।।

36.नतभ्रुवो निजनिजमानसार्पितत्रिविक्रमामणिगृहसौधसंश्रिताः।

---

[1]विभोतव

[2]प्रपूरितोदररोरगदरराजतेनमः

[3]स्मरव्यधां

[4]तथेव

[5]स्फुटंतद

न केवलं मनसिजमेव सर्वदा तदा जयन्घनमपि पापसञ्चयम्।।

37.उरस्थली[1]विलसितकौस्तुभप्रभा परिष्कृतः प्रकृतिमनोज्ञविग्रहः।

जनार्दनो जगदवनैकदीक्षितः स्ववीथिषु व्यचरदहीश्वरेण सः।।

38.फणाभृतामधिपतिना जगद्गुरौ शनैश्शनै र्विहरति राजवीथिषु।

इतस्ततस्स्फुरदरुणार्कभाननः चकाशिरे चरममहीध्रसानवः।।

39.रमापतिः फणधरचक्रवर्तिनः फणामणिद्युतिनिकरैरिवोद्गतैः।

गभस्तिभिर्जरठतरैर्विवस्वतो विपाटलं समजनि सौधमण्डलम्।।

40.नभस्तरोः प्रतिनवसाध्यवारिदच्छदच्छटापरिचयमेयुषःक्षणात्।

पचेलिमं फलमिव पश्चिमे पृथुप्रभावतोऽपतदथ[2]बिम्बमम्बुधौ।।

41.ततश्शिखाकतिपयपर्णशाद्वलीकृताम्बरैररसितसितैस्सहेक्षुभिः।

प्रदीपिकाविततिरराजदग्रतो हरेर्धृतानरनिकरैश्चपार्श्वतः।।

42.भुजङ्गराड्नदनसहस्रसंभवैः प्रकीर्णकव्यजनभवैश्चमारुतैः।

चलच्छिखाबभुरथ दीपमालिकास्तमांस्यभिप्रकटिततर्जना इव।।

43.समुज्ज्वलामणिमयसालबिम्बिता प्रदीपिका ततिरनिलाङ्कुरा[3]कुला।

इतस्ततः प्रसृतविलम्बिचम्पकस्रगावलीश्रियमभजत्पदे पदे।।

44.शनैश्शनैर्मलयभवेन वायुना प्रकम्पितस्फुटतरहल्लकस्रजा।

असेव्यत त्रिजगदधीश्वरो हरिः समल्लिकापरिमलसान्द्रसंपदा।।

45.विसृत्वरीमधुरिपुवाहनोरगप्रभोः फणामणिगणरश्मिमण्डलीः।

वितर्दिकाशशिमणिसालभञ्जिका कुचस्थलेष्वकुरुत कुङ्कुमश्रियम्।।

46.ततस्सुधानिधिरधिरूढवाञ्छनैरलक्ककद्युतिरुदयाद्रिमेखलाम्।

[1]उरस्स्थली

[2]प्रभावतोपतदथ

[3]निलांकुरा

प्रकाशयन्सकलदिशोगभस्तिभिः प्रहर्षयंश्चटुलचकोरमण्डलीम्। ।

47.तदा दहन्प्रथममधोक्षजस्यताः प्रदीपिकास्तिमिरतमालकाननम्।

निशाकरः पुनरवशिष्टमञ्जसाविसारिणा निजकरदीपिकार्चिषा। ।

48.अथाहरत्पुरहरशैलनिर्मलो निशाकरः किरणसटाच्छटावृतः।

तमस्ततिं सकलदिगन्तवर्तिनीं मृगेन्द्रवद्विरदघटां मदोत्कटाम्। ।

49.प्रदक्षिणीकृतमणिसालमण्डलः सकुण्डलीश्वरपृथुभोगमाश्रितः।

प्रदीपिकाप्रकरवृतः परात्परः सुदर्शनालयसविधं ययौ हरिः। ।

50.समार्जनस्फुटतरमद्दलध्वनिप्रकाशिताभिनयविशेषविभ्रमाः।

मृगीदृशां तदनुचलास्यपद्धतीरलोकयद्दनुजरिपुर्दयानिधिः। ।

51.मधुद्विषोवतरणमङ्गलक्रिया चिकीर्षया गतमबलाकदम्बकम्।

सपर्परीघनतरतमालपत्रिका सुभङ्गिनी निनद पुरस्सरं[1] महत्। ।

52.विभूषणद्युतिमतिनातिदूरतः कदम्बके स्थितवति वारयोषिताम्।

समुज्ज्वले महति च वाद्यनिःस्वने[2] प्रशान्ततां गतवति वेत्रशासनात्। ।

53.मनोहरावतरणमङ्गलार्पितं महत्तरं द्रमिडगिरा सुबोधया।

सुतेः प्रियं तदनु च पद्यमात्मनः कवीरितं हरिरशृणोद्गुणाकरः। ।

54.इहान्तरेऽवतर[3]णमङ्गलोचितप्रतिस्फुरद्बहुविधवाद्यनिस्वनैः।

सहाग्रतोभिनयतिस्मरङ्गिणः तलोदरी ततिरहिभोगवासिनः। ।

55.ततःक्रियावतरणमङ्गलक्रिया दरस्मितस्तबकितपाटलाधरा।

मुहुःक्वणन्मणिमयमेखलोज्ज्वला विनिर्गता युवतिपरम्परा शनैः। ।

56.ससम्भ्रमम्मुहुरुरुचर्मपट्टिका दृढा हतो निरुपपदस्तुसाणकः।

[1]पुस्सरं

[2]वाद्यनिस्वने

[3]इहान्तरेवतर

मधुद्रहोवतरणमङ्गलात्परं धनं धनन्धनमिति शब्दमैरयत्।।

57.घनन्ततं सुषिरमथावनद्धमित्यनेकधा भिन्नमरुन्धवादनम्।

निजैस्स्वनैर्निपुणतरं विजृम्भितैः नृणां सुतेर्ग्रहणकलासु पाटवम्।।

58.अहीश्वरादवनतमौलिमण्डलादधोक्षजो हरिरवरुह्य सत्वभूः।

समीपगामथशिबिरां मनोहरां समुल्लसन्मणिततिमारुरोह सः।।

59.नितम्बिनीनिवहसुगीतविक्रमो निजालयं तदनु च गन्तुमीश्वरः।

प्रचक्रमे मुररिपुरन्तरान्तरा समुल्लसत्पनवगभीरनिस्स्वनम्।।

60.विसर्जितक्षितिपसहस्रमण्डलो ययौ हरिः कतिपयदीपिकावृतः।

सहेतिराङ्गरुडसुरक्षितं महत्गुणाकरः पृथुकुरुविन्दगोपुरम्।।

61.अहीश्वरद्विजपतिदण्डनायकैः वृतः कृताञ्जलिभिरमेयवैभवैः।

अगाद्गृहं निखिलजगन्निवासभूः जनार्दनो जयविजयाभिरक्षितम्।।

62.गजाननप्रभृतिभिरात्तहेतिभिः गणेश्वरैः कुमुदमुखैश्चसैनिकैः।

श्रियःपतेरकुरुत पादपद्मयोः चमूपतिर्निजगमनोचितां नतिम्।।

63.परस्परव्यपगतरोषपेशलौ निरञ्जनौ हिमगिरिमेरुसन्निभौ।

पुरस्स्थितौ भुजगविहङ्गमेश्वरौ प्रणेमतुः प्रथितगुणाय रङ्गिणे।।

64.जगद्धुरन्धरमथदण्डनायकं गजाननाद्यनवधिसैनिकोज्ज्वलम्।

प्रसाद्यतन्निजभुजमध्यहल्लकस्रजानतं व्यसृजदुदारवैभवः।।

65.सपादुकीकृतफणिमण्डलेश्वरः खगाधिपप्रहितकरावलम्बनः।

श्रिया सह स्फुरितसुवर्णवर्णया विवेश तत्प्रणवमयं गृहोत्तमम्।।

66.अतिशुचिजह्नुचण्डकरसह्यसुताजसलिलै-

विरचितमज्जनोविधृतपीतदुकूलयुगः।

धृतहरिचन्दनो भुजगपुङ्गवमञ्चगतो हरि-

रकरोन्मुदा ललितमभ्यवहारविधिम्।।

67.उत्तंसीकृतहल्लकोज्ज्वलमुखः कर्पूरवीटीवह-

न्कस्तूरीकलितोर्ध्वपुण्ड्रललितःकन्दर्पदर्पाकरः।

लक्ष्म्या रागरसार्द्रया सभगवानानन्दराशेः परां

कोटिं प्राप कुतूहलार्द्रहृदयः श्रीरङ्गधामेश्वरः।।

68.देवो यस्य भुजङ्गभोगशयनः श्रीरङ्गराजो हरिः

तातः काश्यपचक्रायविबुधो लक्ष्मीर्जनन्युत्तमा।

तस्यैवोत्तमनम्बिसत्तिरुमलाधीशप्रबन्धुः कृतौ

लक्ष्मीकाव्यवरे चतुर्दश इह क्षेमेण सर्गोगतः।।

अथ पञ्चदशस्सर्गः

1.आश्लेषासु प्रातरम्भोधिकन्या गाढाश्लेषोन्मृष्टकाश्मीरलेपः।

निद्राशेषा पाटलाक्षित्रिभागोरङ्गस्वामी सामिबोधो बभूव।।

2.गङ्गातुङ्गासह्यजा कृष्णवेणी गोदापाथः क्लृप्तधर्माभिषेकः।

शुद्धस्वान्तोदिव्यशुद्धान्तवासी चक्रे सर्वं कर्मकल्यानुरूपम्।।

3.कल्याणात्मा कल्पिता कल्पजातो मुक्तास्फायद्भासमान्दोलिकां सः।

आरूढस्सन्नब्धिराजन्यकन्याजानिर्मन्दं निर्जगाम स्वधाम्नः।।

4.रेजे रङ्गी पाण्डरैरातपत्रैः दूर्वाश्यामश्चामरैश्च प्रकीर्णैः।

व्योम्नोभागश्शारदाभैरिवोच्चैः प्रालेयांशोः पक्ष्मलैश्चांशुजालैः।।

5.मुक्ताच्छत्रैः केतुभिस्तालवृन्तैः शश्वल्लोलैश्चामरैश्चन्द्रगौरैः।

आकल्पानामंशुभिश्चस्फुरद्भिः श्रीरङ्गेशश्च्छन्नबालातपोऽभूत्।।

6.ढक्काभेरीझल्लरीमद्दलानां मन्दैर्नादैः पूरिताशावकाशः।

दीप्तं शृङ्गैर्गोपुरं पद्मरागप्रायैश्शौरिः प्रापदामोदरस्य।।

7.मन्दङ्गच्छन्मङ्गलानां निधानं मार्गेणोद्यत्तोरणालङ्कृतेन।

प्रापप्रातः पुण्डरीकायताक्षो बालो यानं पल्लवाधीशकृष्टम्।।

8.तत्र स्थित्वा मण्डपे वज्रमुक्तामाणिक्यादिस्तम्भसंसारयुक्ते।

अङ्गीचक्रे नारिकेलाम्ररम्भा पूगैः प्राज्यं शौरिराहारकृत्यम्।।

9.रङ्गाधीशः पक्वबिम्बोष्ठरेखागाढालग्नप्रौढताम्बूलरागम्।

स्वैस्स्वैर्लिङ्गैर्भासुराणामृतूनां भक्ष्यषड्कं यौगपद्येन भेजे।।

10.चाम्पेयानां सञ्चयैः पीतपीता तापिञ्छानां पङ्क्तिभिर्नीलनीला।

मञ्जिष्ठानां मण्डलैरक्तरक्ता नानावर्णैर्वावनिस्साबभासे।।

11.बालाशोकश्रेणिरुद्यत्प्रवालामूलोद्देशे दृश्यते सानुवेलम्।

तन्वङ्गीनां सान्द्रतारुण्यभाजां पादाघाताल्लग्नलाक्षारसेव[1]।।

12.माकन्दानां मारतूणीरभासां शाखासूच्चैरुज्ज्वला सुप्रवालैः।

आघ्रायाघ्रायाशुबभ्रामभृङ्गश्रेणीपुष्पस्तोमनिर्याणदेशम्।।

13.वीथ्यां वीथ्यां मन्दमन्दस्समीरो वल्लयां वल्लयां पल्लवानां प्ररोहः।

पुष्पे पुष्पे षट्पदानां समूहः चित्ते चित्ते चित्तजन्मा जनानाम्।।

14.शश्वन्नृत्यत्तालवृन्तानिलोऽथ ग्रीष्मः कालः पाटलापाटलाशः।

सायं मल्लीसान्द्रसौरभ्यवाही रङ्गेशाग्रे सन्निधानं चकार।।

15.मार्ताण्डस्य ज्योतिषातप्यमानं मातङ्गानाम्मण्डलं[2] पूर्णमानम्।

आलोलैस्स्वैः कर्णतालैर्विशालैः शश्वल्लेभे तालवृन्तस्य कृत्यम्।।

16.गात्रे गात्रे सान्द्र[3]पाटीरचर्चा पाणौ पाणौ पक्ष्मलं तालवृन्तम्।

कण्ठे कण्ठे हारयष्टिर्वधूनां केशे केशे मल्लिकादामबन्धः।।

17.धारागेहेष्वङ्गनानां कुचेषु प्रत्यग्रार्द्रैश्चन्दनैश्शीतलेषु।

[1]लग्नराक्षारसेव

[2]मण्डनं

[3]सन्द्र

क्षिप्त्वा क्षिप्त्वा चक्षुषीसानुरागा निन्युः कालं गाढतापं युवानः।।

18.सह्यक्ष्माभृत्कन्दराद्वन्ध्यवाहो मन्दं मन्दं कम्पयंश्चम्पकानि।

पाटीरार्द्रस्सह्यजावारिशीतः शौरि भेजे भाजनम्मङ्गलानाम्।।

19.मूले मूले पुष्पितानां तरूणां गानासक्तः कामिनीनां निकायः।

शृङ्गे शृङ्गे मत्तभृङ्गीनिनादो मध्ये मध्ये मारचापध्वनिश्च।।

20.प्रावृड्कालः प्रादुरासीदथाग्रे विष्णोर्विद्युद्वल्लरीवेल्लिताशः।

मेघश्रेणीनिस्स्वनाकर्णनोद्यत्प्रीत्या नृत्यन्नीलकण्ठाभिरामः।।

21.व्योमस्थानां वारिदानां तमालश्रेणीच्छायासन्निभानां समूहः।

पान्थस्त्रीणामिन्धनस्तोमशून्यप्रद्युम्याग्नेे[1]र्धूमराशित्वमाप।।

22.जीमूतानामिन्द्रलीलोपमानां बृन्दैश्च्छन्ने मण्डले भानवीये।

लक्ष्मीजानेः कौस्तुभो बाहुमध्ये प्रायस्स्फूर्जन्नास पर्यायभानुः।।

23.प्रावृल्लक्ष्म्या पूरितस्यातिमात्रं पाथस्तैलैर्मेरुदण्डस्थितस्य।

आनीलस्याम्भोदपात्रस्य दीप्ता विद्युल्लेखा दीपरेखां प्रपेदे।।

24.जम्बूवृक्षस्सर्वगानां फलानां रेजे बृन्दैरिन्द्रनीलोपमानैः।

निष्पन्दानां षड्दानामिवौघैः भूयोलग्नो भाति पुष्पादरेण।।

25.दैत्यारातेर्देहकान्त्या समानच्छाया जाता पङ्क्तिरम्भोधराणाम्[2]।

विद्युल्लेखा तत्कलत्राङ्गलक्ष्म्या निर्घातस्तत्पाञ्चजन्यस्वनेन।।

26.निर्निद्राणान्नीपगन्धोदयानां वोढाव्यूहं कम्पयन्मालतीनाम्।

निर्भिन्दानोमानिनीमानमुद्रामन्दम्मन्दं गन्धवाहश्चचार।।

27.विद्युज्जालैः पूरितो वारिवाहस्तोमः कामध्वंसिकण्ठप्रकाशः।

चापस्यैन्द्रस्याप सौवर्णबाणव्यूहापूर्णश्यामतूणीरलीलाम्।।

[1]नाग्ने

[2]रम्भोरुहानाम्

28.अम्भोदानां पङ्क्तिरुच्चैर्विहायः प्रासादाग्रं तुङ्गमारुह्यमन्दम्।

निध्यायन्तीवाबभासे मयूरैः कृप्तं नृत्तं विद्युदुन्मेषनैत्रैः।।

29.पश्चादच्छाम्भोदकृप्तोत्तरीयां हंसश्रेणीनादमञ्जीरशब्दाम्।

हृद्यां लक्ष्मीशारदां शार्ङ्गधन्वा देवोद्राक्षीदक्षयानन्दराशिः।।

30.उद्यानक्ष्मामण्डपोपान्तराजद्धंसस्तोमच्छद्मना पद्मनाभम्।

लक्ष्मीकान्तं द्रष्टुमुत्कण्ठितस्सन्नासीत्साक्षात्क्षीरवाराकरेन्द्रः।।

31.उर्वीबाणैस्सुभ्रुवः कामबाणैः नद्यः सर्वाः पुण्डरीकैः प्रफुल्लैः।

शालिव्रातास्ताम्रवक्त्रैश्शकुन्तैराशा हंसैस्संविभक्ता बभूवुः।।

32.नीपाव्यक्तन्यक्कृताः सप्तपर्णैः बाणैः फुल्लैर्मञ्जरीचार्जुनानाम्।

रम्याकारैराजहंसैर्मयूरा मेघध्वान्तं भानुभिर्भानवीयैः ।।

33.श्वेताब्जानिस्फारं सौरभ्यपूरा कृष्टालोलैष्षट्पदैरञ्चितानि।

नेत्राण्यासन्नीलशैवालकेशप्रख्यातानां दीपिकादारिकाणाम्।।

34.शङ्खज्योतिर्निर्मलामेघमाला व्योमस्थायन्नन्दकासिप्रकाशम्।

नाभीपद्मञ्छायमासीत्समस्तं नालीकानां मण्डलं रङ्गभर्तुः।।

35.भूयस्सिध्यत्सप्तपर्णप्रसूनक्रोडीकारैर्गन्धवाहप्ररोहैः।

माद्यन्ति स्म श्रीपतेस्सैन्यनागामध्वापूरं सप्तधैवस्रवन्तः।।

36.हेमन्तश्रीरङ्गधाम्ना त्रिधाम्ना सर्वत्रोद्यत्पञ्चबाणापदाना।

अग्रे दृष्टा सान्द्रनीहारबिन्दुश्रेणीमुक्ताहारविद्योतमाना।।

37.तन्वङ्गीनां तुङ्गवक्षोरुहोष्मप्रोढिं हित्वा सर्वतस्संपतन्तम्।

पातङ्गानां दीधितीनां प्रपञ्चं मन्दोष्माणं हन्त चक्रे हिमानी।।

38.प्रालेयाम्भः प्रौढधारासटानां प्रत्यग्राणां मण्डलैर्मण्ड्यमानः।

भेजे निघ्नन्पुण्डरीकं सहस्यः सैंहीलीलां सर्वमार्गापहारी।।

39.माभूल्लक्ष्म्यास्सोदराया मुखश्रीसच्छायैषा पङ्कजालीति तूर्णम्।

रोषावेगेनेवदोषाकरस्तान्नीहारैस्स्वैर्निहुताभां वितेने।।

40.याते यत्र क्वापि पङ्केरुहाणां संघे वायोर्हैमनस्याभियोगात्।

लोलम्बानां मण्डलं पुण्डरीकं नाभीरूढं प्राप नारायणस्य।।

41.अम्भोजानामञ्चितानामलाभादाकम्पागास्सान्द्रनीहारपातैः।

भृङ्गाः प्रापुश्श्वेतराजीवबुध्याशौरेः पाणौपाञ्चजन्यान्तरालम्।।

42.रङ्गेशाग्रे शैशिरः काल एष प्रादुर्भूतो भूतभूतानुकम्पः।

नाथैस्साकं योजयन्मन्मथत्वं राजीवाक्षीः कुन्दपुष्पावतंसः।।

43.लक्ष्मीभर्तुर्वारनारीप्रकोष्ठं मुक्तामुक्तोदारमुक्ता विभूषे।

कुर्पासाङ्के[1]शीतभीत्या शुकस्तद्वक्षोजाग्रे कल्पयामास वासम्।।

44.आविद्धाङ्गोवारवर्णैर्हसन्ती वह्निज्वाला पास्तशीताभियोगः।

गाढाश्लिष्टस्सिन्धुपुत्र्या स चक्री चक्रे प्रीतिं पश्यतां भक्तिभाजाम्।।

45.चक्षुस्सूर्यज्योतिषा चारुवक्षो लक्ष्मीपीनोरोजकुम्भोष्मणा च।

पाणौ चक्रज्वालया चानुवेलं दैत्यारातिर्नीतवाञ्शीतकालम्।।

46.तीव्रं शीतं कुन्दसौरभ्यभास्वद्वातोदीर्णं बाडबाग्नेरिशखानाम्।

संघातेनेवापनेतुं दिनेशः संप्राप्तोऽभूत्पश्चिमांभोधिमध्यम्।।

47.देवो रङ्गी फल्गुस[2]र्वर्तुपुष्पैः मालां क्लृप्तां यौगपद्याद्दधानः।

तं तं कालं तावदानन्दयित्र्या लक्ष्म्या नैषीत्पल्लवोद्यानभूमौ।।

48.सायं सन्ध्यासूचकैश्शङ्खनादैः साकं मेघस्तोमगम्भीरघोषैः[3]।

वेषं नागारोहणप्राप्तमुच्चैरङ्गीकुर्वञ्शार्ङ्गधन्वो[4]दतिष्ठत्।।

[1]कूर्पासाङ्के

[2]फुल्गुस

[3]मेघगम्भीरघोषैः

[4]शार्ङ्गधन्वो

49.भूयो भुयो गन्धतैलावसेकाद्दीप्तज्वालादीपिकाचक्रवालम्।

सान्द्रच्छायं सच्छदैरिक्षुकाण्डैः नेदीयोऽभून्निस्तमस्कस्यशौरेः।।

50.देवोदन्त्यारोहणाख्यं विशालं मुक्तामालालङ्कृतं मण्डपं सः।

सोपानानां पर्वभिर्मन्दमन्दं पाथस्सेकाशीतलैरारुरोह।।

51.तस्मिन्मुक्ताभद्रपीठे तदानीं कृत्वासायङ्कालयोग्यं विमानम्।

आसाञ्चक्रे चक्रपाणिर्दयावान् अग्र्याहारैराप्तसौहित्ययोगः।।

52.हृष्टस्वान्तस्स्पष्टताम्बूलरागः श्रीमद्वक्त्रोदृष्टसङ्गीतभेदः।

देवोऽद्राक्षीदौपवाह्यं गजेन्द्रं चञ्चच्छुण्डमायान्तमग्रे।।

53.अग्रेनादण्डिण्डिमस्यानुवेलं संशृण्वानं कूणिताक्षित्रिभागम्।

पार्श्वद्वन्द्वालम्बिसौवर्णघण्टानादावृत्तैर्दृश्यमानं जनौघैः।।

54.ऊर्ध्वीभूताकुञ्चिताग्रोरुशुण्डालग्नैर्भान्तं केलिपुण्ड्रप्ररोहैः।

ग्रासीभूतादिक्षुखण्डादखण्डात्कुक्षौलीनादुत्थितैः कन्दलैर्वा।।

55.उच्चैर्वेगोदग्रहस्तावलग्नैः पौण्ड्रैः पर्णैः श्यामलैः कोमलाग्रैः।

दूर्वाशङ्कां दूरमुद्भावयन्तं राकाद्राकाशीतरोचिर्मृगस्य।।

56.वातैश्चञ्चत्कर्णतालान्तजातैरम्भोवाहस्तोममुत्सारयन्तम्।

अभ्रंलीनो दस्तहस्तोरुचिन्तं दुस्तौमैस्ताशारमाकल्पयन्तम्।।

57.आगत्योच्चैर्मण्डपोपान्तमेतं सेनानागान्बृंहितैर्भीषयन्तम्।

सिन्दूरोद्यत्कुम्भमम्भोरुहाक्षः कल्याणश्रीरारुरोह द्विपेन्द्रम्।।

58.श्रीरङ्गेशो गाढमारुढनागश्रेष्ठस्कन्धश्यामलाङ्गश्चकाशे।

आलोलाभ्यां चामराभ्यां सिताभ्यामद्रीन्द्रस्थो निर्झराभ्यामिवाब्दः।।

59.श्वेतच्छत्रज्योतिषा भागथासौ श्रीरङ्गेशो वारणेन्द्रोपविष्टः।

मुक्ताभूषा चारुहस्ताब्जराजच्छङ्खज्योतिर्मण्डलैर्नौ तथैव।।

60.आसीनस्योत्तुङ्गमत्तद्विपेन्द्रस्कन्धालग्नेस्वर्णपीठेविशाले।

शौरेरासीत्सौम्यजामातृनाम्नःचान्द्रं बिम्बं निष्प्रयत्नातपत्रम्।।

61.सौवर्णानां चर्मकोणाहतानां निस्साणानां निन्दिताम्भोदघोषैः।

नादैस्साकं मण्डपस्योपकण्ठं नागश्रेष्ठे___च्युतो निर्जगाम।।

62.उत्तुङ्गानां साग्रपर्णप्रदीप्यत्पुण्ड्रेक्षूणां गन्धतैलोज्ज्वलानाम्।

ज्योतिश्चक्रे दीपिकामण्डलानामासीद्रात्रिश्छादितेन्दुप्रकाशा।।

63.लक्ष्मीभर्तुर्मूलभृत्योरुगेहप्रासादोद्यस्वर्णकुम्भप्रकाशैः।

सेनानागाः पीतभासो बभूवुः सन्ध्यारागश्लिष्टरक्ता इवाब्दाः।।

64.रङ्गेशाग्रे गच्छदग्र्याश्चतुर्भिः[1] हस्तैर्हेती र्दन्ति[2]वक्त्रो दधानः।

विघ्नध्वंसी शुण्डया हेमदण्डं विष्वक्सेनस्यादिमो धैर्यमुख्यः।।

65.रङ्गाधीशाधिष्ठितो हस्तिमल्लो मन्दं गच्छन्राजमार्गे कदाचित्।

पश्चात्कुर्वन्गर्ववेगप्रचारं जग्राहोच्चैर्ग्रानवानां मनांसि।।

66.कृतकुवलयापीडध्वंसः कृपानिधिरच्युतः

प्रशमितमहाग्राहग्रस्तद्विपप्रवरव्यधः।

मधुरमधुरं पश्यन्सङ्गीतकं मदहस्तिना

व्यहरदधिकं वीथ्यां रङ्गेशहस्तिपकोत्तमः।।

67.नागस्कन्धनिषण्ण एव तरुणी पङ्क्तिद्वयीकल्पितां

देवे पश्यति नृत्तवाद्यमधुरां नीराजनप्रक्रियाम्।

राजानः सकलाः प्रतापमहितास्सैन्यैस्समंसादरैः

फालन्यस्तकरारविन्दमुकुलाश्शौरिप्रणेमुर्मुहुः।।

68.हस्त्यारोहणमण्डपान्तिकजुषः प्रद्योतमानश्रियो

विस्तीर्णादवरुह्यगन्धकरिणः स्कन्धात्कुथामन्थरात्।

[1]रङ्गेशाग्रेऽगच्छ , दग्ग्रांश्चतुर्भिः

[2]हेतीन्दन्ति

संप्राप्ते शिबिरं सुवर्णरचितं श्रीरङ्गराजेहरा-

वग्रे ताडित डिण्डिमध्वनिभरश्शालां निजां प्राप सः।।

69.वीथीषु श्रुतवामवामनयनागानार्थहृष्टाशयो

मन्दं प्राप्य स पुण्यकोटिनिलयं धामोत्तमं तादृशम्।

स्नातस्स्वच्छतरां शुकोज्ज्वलतरस्रक्चन्दनालङ्कृतः

कृप्ताहारविधिर्निनाय रजनीम्लक्ष्मीद्वितीयो हरिः।।

70.देवो यस्य भुजङ्गभोगशयनश्श्रीरङ्गराजो हरि-

स्तातःकाश्यपचक्रायविबुधो लक्ष्मीर्जनन्युत्तमा।

तस्यैवोत्तमनम्बिसत्तिरुमलाधीशप्रबन्धुः कृतौ

लक्ष्मीकाव्यवरे जगाम दशमात्सर्गः परं पञ्चमः।।

अथ षोडशस्सर्गः

1.रङ्गी मघानामनितारके शुभे ततो पराह्णे रमणीयवैभवः।

अङ्गीचकाराद्भुतविभ्रमोदयो वसन्तवेषं वपुषा महीयसा।।

2.उष्णीषमच्छाङ्गलोहितारुणं वहन्वरेण्यश्शिरसा किरीटिना।

अग्रप्रफुल्लप्रसवाधिकोज्ज्वलः पलाशशाखी वरराजमाधवः।।

3.शम्पाहरिद्राहरितालकाञ्चनप्रभासमानं वसनं वहन्हरिः।

मूलालवालच्युतपुष्पमण्डली समुल्लसच्चम्पकविभ्रमं ययौ।।

4.माणिक्यकेयूरकिरीटकुण्डलाङ्गुलीयकोत्तंसकटीगुणोज्ज्वला।

मूर्तिर्मनोज्ञा विरराजरङ्गिणः प्रफुल्लकल्हार[1]वतीव दीर्घिका।।

5.कस्तूरिकास्थासकपङ्किराबभौ भुजे हरेः कुङ्कुमपङ्कचर्चिते।

[1]प्रफुल्लकल्हार

बालातपाढ्ये विटपे ससौरभे तरोर्विलीनेव मधुव्रताली।।

6.कल्हारमालाकमनीयसौरभा भुजङ्गतल्पस्य भुजान्तरंगता।

कल्याणिनीकौस्तुभरत्ननिर्गता प्रभेव संपिण्डितवेणिका बभौ।।

7.मुक्तास्रगुद्भावितविग्रहद्युतिः प्रसन्नवक्त्रोभगवाञ्जनार्दनः।

नक्षत्रमाला हिमभानुमण्डलप्रकाशिताकाशविलालमभ्यगात्[1]।।

8.भद्रासने पल्लवलेखिताधरं वसन्तमुत्तंसितचारुचम्पकम्।

उद्दर्पपञ्चायुधसख्यमच्युतं सिषेविरे मध्यमलोकनायकाः।।

9.कौसुम्भचेलप्रकरैर्विभूषणैः सुवर्णपुष्पैर्विशदैश्चमौक्तिकैः।

अप्रीणयन्माधवमानतानृपाः सुगन्धिभिः कुङ्कुमरेणुसञ्चयैः।।

10.कोटीरराजत्कुरुविन्दनिस्सृतैः प्रभाचयैः पादसरोरुहं हरेः।

चक्रुस्समस्तामकरन्दपूरवत्सुधांशुसूर्यान्वयसंभवा नृपाः।।

11.आजानशुद्धं शतपत्रपाठलं[2] पदद्वयं पन्नगभोगशायिनः।

प्रक्षाल्यगीर्वाणनदीजले नतत्पयोलवप्रोक्षणभाविता नृपाः।।

12.हारिद्रचूर्णप्रकरैरलङ्कृता प्रवृत्तसंगीतविशेषनिर्भरा।

आसीद्वसन्तोत्सववृद्धिरग्रतो रमामहीभर्तुरनन्तशायिनः।।

13.रेजुः क्वचित्कुङ्कुमपङ्कसञ्चयाः क्वचिद्धरिद्रारजसां च राशयः।

भूयः क्वचिच्चन्दनसारनिम्नगाः क्वचिच्च नानाविधपुष्पमालिकाः।।

14.एकत्र कर्पूरपरागमण्डली भूयोऽपरत्र स्फुटकाहलोत्करः।

अन्यत्र कस्तूरिकदम्बकर्दमस्तथेतरत्रागरुसारसारिणी।।

15.अत्रान्तरेकेलिमुपेयुषो हरेः कराग्रविक्षिप्तनिशारजश्छटाम्।

लीलारविन्देन कराग्रसङ्गिना निवारयामास सुता पयोनिधेः।।

[1]विलासमभ्यगात्

[2]शतपत्रपाटलं

16.काश्मीरचूर्णं कलशाब्धिकन्यका करप्रमुक्तं प्रतिरङ्गिणं मुहुः।

शय्याफणीन्द्रोऽरुणदन्तरान्तरा समीरणैर्वक्रसहस्रसंभवैः।।

17.अग्रस्थिताम्भोनिधिराजनन्दिनी विमुक्तहारिद्रपरागरूषिताः।

रङ्गेशवक्षःस्थल[1]मौक्तिकस्रजो बभूवुरष्टापदनिर्मिता इव[2]।।

18.पीताम्बरेणाग्ग्ररसेन लीलया मुहुर्विमुक्तैर्घनसाररेणुभिः।

आपाण्डरासागरसार्वभौमजा सरस्वती विभ्रममभ्यगात्क्षणम्।।

19.आधोरणोमत्तगजो परिस्थितो गजान्तरस्थं पुरुषं मुहुर्मुहुः।

चिक्षेप हारिद्रपरागमुष्टिभिः प्रतप्तकार्तस्वररेणुसन्निभैः।।

20.राजानरेन्द्रं सचिवोऽपि मन्त्रिणं द्विजो द्विजं स्त्रीवनीतां भटो भटम्।

हारिद्रचूर्णैरकृतातिपिञ्जलं हरेः पुरस्तादरविन्दचक्षुषः।।

21.सौवर्णशोभाविमलासु विस्तृतैः दिशासु हारिद्ररजोभरैस्तदा।

रङ्गेशसेवार्थसमागता जनाश्चकाशिरे मेरुसमीपगा इव।।

22.सर्वेनरेन्द्रास्सचिवाश्च सुभ्रुवो मदद्विपा वाजिवराः पदातयः।

हारिद्रचूर्णप्रकरेण केवलं विनिर्मिताङ्गा इव रेजिरे तदा।।

23.वैकक्ष्यमालाकमनीयकन्धरः पुरो हरेर्गानविशेषमन्थरः।

नृत्तं वसन्तोचितमङ्गनाजनः चकार हारिद्रपरागधूसरः।।

24.उत्फुल्लवेगादुचितभ्रमामिथो विघट्टिताष्टापदकेलियष्टयः।

स्थानं भजन्त्यः क्रमतो निजं निजं हरेः पुरस्तान्ननृतुर्नतभ्रुवः।।

25.द्वारेस्थितश्चारुणिकोष्ठसद्मनो विशुद्धमुक्तामणितोरणोज्ज्वले।

सव्रीहिमाक्षितिमानदक्षिणोजगत्कुटुम्बी भगवान्व्यलोकयत्।।

26.रङ्गाधिराजो रसिकाग्रणीर्हरिः श्रिया धरण्या च समं सविभ्रमः।

[1]वक्षस्स्थल

[2]निर्मलाइव

वीथीषु वीथीषु विलोकयन्प्रजाः चचाल वाचालमृदङ्गमण्डलम्।।

27.आसायमानन्दनिधिर्विहृत्य[1] स श्रियःपतिर्वीथिषु वीतपांसुषु।

प्रापप्रदोषे शुभरङ्गनायिका गृहोत्तमं मौक्तिकमालिकाञ्चितम्।।

28.द्वारिस्थिते[2]रङ्गिणि रङ्गनायिका कटाक्षसंज्ञाविभवेन चोदिताः।

आविर्बभूवुर्मणिमेखलोज्वलाः क्रमेण नीराजननीरजेक्षणाः।।

29.आरात्रिकं रत्नविभूषणावलीप्रभानुवेधद्विगुणीकृतप्रभम्।

वाराङ्गनापङ्क्तियुगीससंभ्रमं मधुद्विषे[3]ऽदर्शयदात्तविभ्रमा।।

30.निर्वृत्तनीराजनकर्मनर्मणामधुद्विषामन्मथजन्मसद्मना।

श्रीमण्डपं मौक्तिकदाममण्डली समुज्ज्वलं मन्दमभाजि रङ्गिणा।।

31.मान्यात्कलापानपनीयमाधवः कलेवरत्काञ्चनपीठमाश्रितः।

भक्तैर्विनीतैः परिचारकैर्मतैर्वृतो विशश्राम रमामहीसखः।।

32.शौरेर्मुखाम्भोरुहगन्धलोलुपाः मधुव्रताश्चामरमारुताङ्कुरैः।

उत्सारिताः पार्श्वगदीपिकाशतैर्यथान्धकाराहरकन्धरोपमाः।।

33.लक्ष्मीमहीभ्यां सह चम्पकोत्पलप्रभासमाभ्यां मणिपीठमाश्रितम्।

भक्तो मुरारिं परिचारकर्मणि स्थितः कृताभ्यङ्गविधिञ्चकार तम्।।

34.स्नानीयभेदेन सुगन्धिमाशनैरपास्ततैलः[4] पुरुषोत्तमो हरिः।

स्नानार्थमन्यां तपनीयपीठिकामगादुदारप्रकृतिः श्रियाभुवा।।

35.भागीरथीसूर्यसुताकवेरजासरस्स्वतीवारिभिरात्तसौरभैः।

नारायणः स्वर्णकटाहसंस्थितैः कृताभिषेकः कृतिनां पुरोगमः।।

[1]निथिर्विहृत्य

[2]स्थितो

[3]मधुद्विषो

[4]शनैःअपास्ततैलः

36.प्राप्तान्यमुक्तामणिभद्रपीठिको हरिर्गृहीतामलकाञ्चनाम्बरः।

कल्हारमालैकमनोज्ञविग्रहः प्रक्षुप्तशुद्धोदकमज्जनोऽभवत्।।

37.दिव्याभिषेकार्द्रदलाग्रनिष्पतत्पयः कणोद्भासितहल्लकस्रजि।

उन्मोचितायां सलिलार्द्रितं शिरोबभूव शौरेर्दृढबद्धकर्पटम्।।

38.मान्याश्चदुग्धोदधिफेनकर्पटप्रबद्धमौलिर्जलशोषहेतवे।

रेजे महेन्द्रोपलकान्तिरच्युतस्स निर्झरावेष्ट इवाञ्जनाचलः।।

39.अन्येन रम्येण शुभेन वाससा शनैः प्रमृज्याङ्गमशेषमच्युतः।

पीतेवसानो वसने महत्तरं सुवर्णपर्यङ्कमगात्सुसंस्कृतम्।।

40.अत्यच्छमुक्तामणिभूषणस्ततः पटीरचर्चारमणीयविग्रहः।

कस्तूरिकपङ्क[1]कृतोर्ध्वपुण्ड्रकश्चकार[2] लक्ष्मीक्षमयोर्मुदं हरिः।।

41.आहारमाह्लादकमात्तड्रसंसुवर्णपात्रे सुरभिन्न[3]वेदितम्।

अङ्गीचकाराम्बुधिराजकन्यया भुवा च पार्श्वस्थितया त्रिविक्रमः।।

42.शुद्धोदकक्षालितपाणिपङ्कजः शुभानिचाचम्यपयांसि सुव्रतः।

कर्पूरवीटीमसुरारिरग्रहीत्प्रसन्नगम्भीरविचित्रविभ्रमः।।

43.ताम्बूलरागद्विगुणीकृतारुणप्रभाधरानन्दितसिन्धुजाशयः।

शुश्राव गीतं ललितं ससुभ्रुवां ददर्श नृत्तञ्च[4] विचित्रभावुकम्।।

44.देव्याः श्रियः काञ्चनतोरणोज्ज्वलात्गृहाद्विनिर्गत्य तथा भुवश्च सः।

आरुढमुक्ताशिबिकः पुरातनः पुनः पुमान्पुष्पविमानमभ्यगात्।।

45.तेन ध्वजस्तम्भसहस्रशालिना सुवर्णकुम्भोज्ज्वलशृङ्गपङ्क्तिना।

[1]कस्तूरिकापङ्क

[2]पुण्ड्रस्कःचकार

[3]सुरभिं

[4]नृत्तंच

वीथीषु दीप्यद्गृहदीपमालिकास्वधोक्षजोसौव्यहरन्निशि प्रभुः।।

46.कोणेषु कोणेषु कुतूहलश्रियः पुरस्यनृत्तैः ललितै[1]र्मृगेक्षणाः।

अप्रीणयन्नञ्चिततूर्यनिस्स्वनैः[2] मधुद्विषं पुष्पविमानमण्डनम्।।

47.मन्दं समाप्ताखिलराजवीथिकाविहारलीलो विनतात्मजध्वजः।

तस्माद्विनिर्गत्य विवेशगोपुरं चतुर्मुखं चन्द्रमरीचिपाण्डुरम्।।

48.पर्यन्तभोगीन्द्रफणामणिप्रभानिकायकौसुम्भवितानपाटलम्।

धामोत्तमं प्राप्य स तत्र पद्मया क्षपां निनाय क्षपितारिमण्डलः।।

49.पुण्येऽथ[3]तारेयमदैवतेशुभे प्रभातयोग्यं विधिमाकलय्य सः।

श्रीरङ्गसीमास्थलदर्शनादृतो विनिर्जगाम त्रिजगच्छुभप्रदः।।

50.दिव्यं विमानं परितोजनार्दनः शनैस्सगच्छंश्चतुरन्तयानतः।

तद्वामतो धाम्नि विनीतमास्थितं सधीरमालोकतदण्डनायकम्।।

51.तं संप्रसाद्यात्मभुजाग्रमालिका प्रदानतस्स्वीकृततत्प्रणामकः।

तं स्थापयित्वा प्रययौ हरिश्चमूस्तमन्वगाच्चद्विरदास्यपालिता।।

52.श्वेतातपत्रामलफेनसञ्चयः सशङ्खचक्रायुधबाहुवीचिकः।

शार्ङ्गी समुद्रोमणिजालमन्थरो द्वारं ययौ भद्रसुभद्ररक्षितम्।।

53.लक्ष्मीसखो लङ्घितपञ्चगोपुरः क्रमेण वाचालसुवर्णकाहलम्।

आसेवितं योगिभिरात्मवेदिभिः ददर्श पुण्यं भुविवामनाश्रमम्।।

54.पुन्नागपूगीपनसाम्रशिंशुपाशिरीषकङ्केलितमालशाखिनम्।

देवो ययौ दक्षिणसत्यकन्यकातटाध्वनं पङ्कजगन्धिनं ततः।।

[1]कलितै

[2]निस्वनैः

[3]पुण्येथ

55.श्रीरङ्गमातङ्गवनान्तरस्थितां ददर्श सौदर्शनलाञ्छनाञ्चिताम्।

सीमोपलश्रेणिमुदञ्चरु[1]द्वृधातटावधिश्रीरमणस्त्रिविक्रमः।।

56.हेरम्बशुण्डारचितोरुविभ्रमां गृहोपवाह्यस्फुटबर्हमूर्धजाम्।

सेनां स्थितां पाशुपतीं महत्तरो ददर्श योधप्रवरो मुरद्रुहः।।

57.श्रीरङ्गसीमास्थलमेयुषि प्रभौ पिनाकिवप्रावधिशार्ङ्गधन्वनि।

शुद्धौ समीरात्मजनन्दिकेश्वरौ मुहूर्तमेकत्र बभूवतुस्स्थितौ।।

58.चक्रायुधानीकवतीसमुत्थितैः परागजालैरभितः प्रसर्पिभिः।

शूलायुधस्योन्नतसालमण्डलीशिलामयीमृण्मयतामगात्क्षणम्।।

59.आयातपीताम्बरवाहिनीरजः परम्परावारकमासयत्तदा।

नागाजिनं तद्बहुमानभाजनं पिनाकिनो दन्तिवनान्तवासिनः।।

60.क्षिप्रं गजारण्यगजाननोल्लसत्कटस्रवद्दानतरङ्गिणीजलम्।

तद्वाहिनीचङ्क्र[2]मनिर्गतारजः परम्परापङ्किलतां तदानयत्।।

61.कंसारिसेनाध्वजश्चञ्चपक्षिराद्वुरारिसालाग्रविषश्च संगतौ।

अन्योन्यमाबद्धदृढोपगूहनक्रियाविवैकत्र विरेजतुः क्षणम्।।

62.आलोपविष्टाचलराजकन्यका सखस्य जम्बूवसुधारुहस्तदा।

स्पष्टालवालत्वमुपेतमुन्नतं ससालचक्रं भगवान्व्यलोकयत्।।

63.वाराङ्गनावक्त्रसरोजसौरभाशयापतन्तीभ्रमरावली बभौ।

जम्बूतरोर्मूलबिविष्टशूलिनः ततिः फलानामिव वायुचोदिता।।

64.नागाटवीनाग[3]किरीटचन्द्रमः प्रभानुवेधात्परिपाण्डुविभ्रमाः[4]।

[1]श्रेणिरुदञ्चरु

[2]चक्र

[3]विनाग

[4]विग्रहाः

रङ्गेशसेनामदवारणोत्तमा वितेनुरैरावतरामणीयकम्। ।

65.श्रीरङ्गसीमातटमध्यमेयुषः त्रिविक्रमस्याङ्गभवैर्मरीचिभिः।

प्राकारचक्रं विरराज शाम्भवं महेन्द्रनीलैरिवनिर्मितां तदा। ।

66.रङ्गेशसेनागजबृन्दबृंहितैः चचाल द्दृ ताकरिकाननाश्रिता।

अद्यापि जम्बूपतिमार्जनक्रिया समागतेभेन्द्र[1]भियेव सा ध्रुवम्। ।

67.भूतेशवप्रान्तिकसीमवर्त्मना प्रयातमालोक्यमुदाबलं हरेः।

स्वं हासयामास सलीलयागिरा विषादयन्भृङ्गिरिटिर्महद्बलम्। ।

68.निर्गत्य जम्बूतरुमूलमन्दिराच्चमूं हरेर्द्रष्टुमिवेर्ष्यया क्षणम्।

जालान्तरज्योतिरपश्यदक्षिभिः ध्रुवंपुरोजालपथप्रसारिभिः। ।

69.तरन्जजृम्भे[2] तपनीयकाहलीपरम्परां नाम सहस्त्रवादिनीम्।

निस्साणघोषस्समभूत्पुनः पुनः समस्तवाद्यैस्समराणि तत्क्षणात्। ।

70.बाणाहवान्तं खलु नाटकीकृतं समागमं चित्रमुषानिरुद्धयोः।

मार्गेभिनिन्युर्भरतास्थिते[3] स्थिते हरौ तदग्रे मुहुरन्तरान्तरा। ।

71.श्रीरङ्गसीमातटपातिनापथा क्रमेणगच्छन्भगवांस्त्रिविक्रमः।

श्वेताङ्कणन्नामसबिल्वतीर्थकं महद्ददर्शायतनं पुरातनम्। ।

72.विश्रान्तविद्याधरसिद्धकिन्नरं विशिष्टदामोदरनामविश्रुतम्।

आलोकयन्गोपुरमायतेक्षणो ययौ वरामुत्तरसत्यजां हरिः। ।

73.कल्लोलिनीकाञ्चनपद्मरेणुभिः पिशङ्गितापां विहरन्मरालिकम्।

सेवागतानेकजनौघसंकुलां ततार तामुत्तरसह्यजां हरिः। ।

74.कदम्बतीर्थोत्तमशालिनाध्वना चतुष्कवीन्द्रस्य निवेशनं महत्।

[1]समागतेन्द्र

[2]तरङ्गजृम्भे

[3]भरताःस्थिते

वाचालल्लोलम्बकदम्बनादिभिः प्रसूनवृक्षैः प्रचुरं विवेश सः।।

75.वीरो विशशामस तत्र मण्डपे विभावितारविधिर्जनार्दनः।

गीतैश्चनृत्तैस्सुचिरं मनोहरैः समार्जनोद्भासितमद्दलस्वनैः।।

76.आयान्तमद्भुततमाकृतिमौपवाह्यमाराविपादमणिभूषणमश्वमुख्यम्।

आनन्दहेतुमधिकोन्नतकर्णयुग्ममाबद्धचामरमपश्यदथाम्बुजाक्षः।।

77.तं वाजिनं चतुरवल्लभपालनीतं चञ्चत्खुराग्रलिखितावनिमुच्चहेषम्।

हेलानतोन्नतमुखं स्वमिवाधिरोढुमाकारयन्तमभिवीक्ष्य हरिर्ननन्द।।

78.रंहस्समूहमिव विग्रहवन्तमुच्चैः हेषामिषादिव जयोक्तिमुदाहरन्तम्।

पर्याणशृङ्गमवलम्ब्यततस्स रङ्गी तं वाजिनं पतगराजमिवारुरोह।।

79.कौशेयकञ्चुकमुदञ्चितहस्तबन्धशास्तासिधेनुसविशेषरुचिन्दधानः[1]।

आपाण्डरेविलसतिस्महरिस्तुरङ्गे कैलासशृङ्ग इव शारदवारिवाहः।।

80. पार्श्वावलम्बिमणिपादपुटीनिविष्टपादद्वयी नखमयूखपरम्पराभिः।

आत्मौपवाह्यतुरगस्य चकार रङ्गी प्रासतमालशयःप रिवेषशङ्काम्।।

81.आरूढवेगितुरगप्रवरेण तेन भ्रूचोदितः पतगराड्ध्वजकर्मयुक्तः।

प्रालम्बितं तदनु गूढपदां वरेण पर्यग्रहीत्सपदि पाण्डुरमातपत्रम्।।

82.हेतीश्वरोऽस्य परमानसतत्वमूर्तिः शङ्खश्चदैत्यपतिचित्तविभेदिशब्दः।

मुक्तापरिष्करणमुग्धसुवर्णदण्डे द्वे चामरे परिसरेस्वयमग्रहीष्टाम्।।

83.तार्क्ष्यच्छदव्यजनहेमकलाचिमुक्तातास्बूलभाजनधरैरपरैरथास्त्रैः।

आत्मोत्तमाङ्गधृतचापगदासिचिह्नैरास्थानरक्षिभिरसेव्यतरङ्गधामा।।

84.वक्षोनिवासकमलाकरपुण्डरीकशङ्काकरेणशशिमण्डलपाण्डरेण।

छत्रेण तार्क्ष्यविधृतेन निवार्यमाणवृद्धातपस्स विललास बलेर्विजेता।।

[1]रुचिंदधानः

85.पार्श्वद्वयस्थितसुदर्शनपाञ्चजन्यदोधूयमानसितचामरमारुतेन।

व्याकीर्यमाण नवहल्लकदामरेणुः प्रीतिं चकार मुरजिज्जनलोचनानाम्।।

86.रक्ताङ्गरागवसनाभरणाभिरामैरासक्त[1]हेतिभिरनेकसहस्रसंख्यैः।

वीरैः कृतप्रणतिभिः पुरुषप्रकाण्डैरासेव्यते स्म परितो हरिरम्बुजाक्षः।।

87.यातस्तुरङ्गमवरेणतुषारशैलप्रत्यर्थिनोग्रभुविदैत्यनिषूदनस्य।

नक्रावकृष्टचरणद्विपराजरक्षाकर्मापदानमपठत्पटुवन्दिबृन्दम्।।

88.श्रीरङ्गराजसमधिष्ठितवाजिराजसञ्चारसौष्ठवविशेषदिदृक्षयेव।

आरूढवांश्चरमभूमिधरस्य शृङ्गस्वम्भोजबन्धुरधिकस्फुरितानुरागः।।

89.नानाविधाभरणचेलवरातपत्रवकेतनपदातिविशेषदृश्याः।

आरूढतुङ्गतुरगनिखिलामहीपाः रङ्गेशमात्ततुरगाः परिवव्रुरारात्।।

90.राकासुधाकिरणमण्डलपाण्डराभंपुण्यंकवेरदुहितुः पुलिनं स रङ्गी।

आसाद्यमन्दमधिरूढतुरङ्गराजो बाह्याक्तिकाविहृतयेत्र बबन्धचेतः।।

91.उत्पश्यतामुपगतोच्चतुरङ्गमाणामुर्वीभुजापरिहृतातपवारणानाम्।

रङ्गेश्वरस्सकृदचोदयदौपवाह्यं पाद्द्वयेन परिभूतसरोरुहेण।।

92.रङ्गाधिराजपदपङ्कजचोदितस्य सन्धावतस्सपदि वाजिधुरन्धरस्य।

पश्चात्स्थितो जनिपदानि सपञ्चषाणि ताक्ष्योंजवीधृतसितातपवारणस्सन्।।

93.वेगेन धावति हये पुरुषोत्तमेन संप्रेरिते कनकचामरमादधानः।

हेतीश्वरस्तुपरमानसतत्वमूर्तिः द्वित्राणिहन्तसपदानि विलम्बतेस्म।।

94.चित्रे चिरायति शिरस्सुमगन्धलुब्धमूर्ध्वं भ्रमद्भ्रमरमण्डलमेव साक्षात्।

आरूढवेगितुरगस्य रथाङ्गपाणेः नीलातपत्रसुषमामवहन्मुहूर्तम्।।

95.प्राप्तेविलम्बममृतां शुमरीचिगौरे शौरेः प्रकीर्णयुगे हयमास्थितस्य।

[1]रामैःआसक्त

मुक्तोल्लसन्मकरकुण्डलयुग्मरश्मिसंघातएव सितचामरतामयासीत्।।

96.यावत्पदात्पदमयं न चलेद्गुरुत्मांस्तावन्निवर्तितजवोज्ज्वलवाजिराजः।

तत्पाणिपङ्कजधृतातपवारणस्य छायां गतः श्रममपानुददम्बुजाक्षः।।

97.आरूढवाजिभिरमेयगुणैरुदारैरस्तोकभक्तिविनतैरवनीशबृन्दैः।

आसेवितो हरिरवाप हयोत्तमेन सौवर्णरङ्गनगरोत्तमगोपुरं सः।।

98.आरूढाश्वस्तदनुनगरस्योत्तमद्वारदेशं गच्छत्रङ्गीविपुलैर्वाद्यघोषैरुपेतः।

दीप्तज्योतिः कबलितदिशादीपिकानां सहस्रैर्गन्धस्नेहद्रवपरिचितैरावृतोऽभूदतनन्तः।।

99.मुक्तामाणिक्यचीनांशुकमुकुरगणस्वर्णकुम्भाभिरामं

पश्यन्नुत्तुङ्गशृङ्गरथवरमिवसौवर्णशैलं विशालम्।

वीथिष्वारूढवाजीनिजविविधलसद्दीपिकाचक्रवाल

ज्योतिर्वीतान्धकारो निरुपमविभवोरङ्गराजश्चचार।।

100.रङ्गीरङ्गपुरस्य पूर्णमहसः कोटीषु कोटीषु च

त्रैलोक्याधिपतिस्त्रिलोकतिलको नृत्तं ददर्शाद्भुतम्।

शुद्धान्तं प्रणवात्मकं निजमगादाहारकृत्यं मुदा

चक्रे हल्लकचन्दनाम्बरधरो निन्ये श्रिया यामिनीम्।।

101.देवो यस्य भुजङ्गभोगशयनश्श्रीरङ्गराजो हरिः

तातःकाश्यपचक्रायविबुधो लक्ष्मीर्जनन्युत्तमा।

तस्यैवोत्तमनम्बिसत्तिरुमलाधीशप्रबन्धुः कृतौ

लक्ष्मीकाव्य उदारवैभवनिधौ सर्गो गतष्षोडशः।।

अथ सप्तदशस्सर्गः

1.अथ बहिपुटभेदनाद्बहिः स्थितवति दीप्तसुधांशुमण्डले।

नरपतिशिबिरे नतभ्रुवामधिकमजायत वारुणीमदः।।

2.कुवलयनयनाकपोलयोः प्रतिफलनच्छलतः सुधाकरः।

मधुचषकगतं पिबेति तछ्ववसि तदोपदिशन्निवाबभौ।।

3.धृतमृगपदपुष्पमालिकापरिमलशालिनि कामिनीजने।

करकलितसुगन्धिसायको रतिपतिरैक्षवमादधे धनुः

4.मधुहिमकरचित्तजन्मनामधिकतरं कलयन्सहायताम्।

मलयशिखरिमारुतश्शनैः परिचितकैरवसौरभो ववौ[1]।।

5.वपुषि वपुषि मन्मथोदयो दृशि दृशि कामिजनो मनोहरः।

मनसि मनसि सुभ्रुवां रतिः पदि पदि काञ्चननूपुरध्वनिः।।

6.प्रतिशिबिरमथासवाकुलाः प्रियमपहायचकोरलोचनाः।

निजनिजरमणान्तिकं ययुः स्वय[2]मशरीरि शरातुराशयाः।।

7.प्रसृमरनवचन्द्रिकोल्लसत्पटदवनाङ्कणकल्पितासिकाः।

प्रतिफलितदृगुप्त[3]फलाञ्चितां पपुरबलास्सरसां मधुलिकाम्।।

8.विकचवकुलमालिकावली सुरभिणि वामदृशःकुचद्वये।

अपि भृतमधुसौरभे मुखे निहित[4]मुखस्तरुणो मुदं ययौ।।

9.मधुमदविवशारुणेक्षणा विशदतराधरपल्लवाङ्गना।

अजनिशिथिलनीलकुन्तलप्रकरहृदन्तरमानबन्धना।।

10.अभिमतमदिरामदातुराः परिशिथिलाच्छतरांशुकास्त्रियः।

अतिमृदुलदुकूलशङ्कयाशशिकिरणावलिमाललम्बिरे।।

11.चषकमधुनिपीतशेषिते प्रतिफलितं शिशिरांशुमण्डलम्।

[1]ववै

[2]ययुस्वय

[3]तदृशः

[4]निखित

प्रियतमवदनारविन्दमित्यसितदृशो बहुमेनिरे क्षणम्। ।

12.सकिसलयपुराणवारुणीपरिमलभाजनमाननं स्त्रियाः।

मनसिजशरविह्वलो युवा मधुपङ्काम्बुजमञ्चितं पपौ। ।

13.प्रथममुपगतेन चक्षुषा तदनुमुखेन निजेन कामुकः।

प्रथमरसविशेषभूषितं समधुचुचुम्बनितम्बिनीमुखम्। ।

14.युवतिरचितमार्जितोल्लसद्दशनततिर्मदरागरुषिता।

कबलितघनसारवीटिकाकमितृदृशोरकरोन्महोत्सवम्। ।

15.प्रियहृदयवशीकृता पराह्हदि समधत्तसखीजनोदितम्।

अथ तदुपगमे पतेस्स्वयं पुनरभजज्जडतां ह्रिया वधूः। ।

16.शयनतलमुपेयुषी वधूः प्रणयिनि पश्यति रागभावितेे।

अनिभृतविषमास्त्रलीलया मुहुरवलोकयति स्म तं दृशा। ।

17.अभिमतजनसान्त्वनागताप्रियमतिमन्मथमीक्षितुं वधूः।

कथमपि न शशाक लज्जया समजननी[1] विनिवेशितेक्षणा। ।

18.भुजलसदगरुद्र[2]वैर्वधूःकुचतटकुङ्कुमपत्रलेखया।

मृगमदतिलकेन चारुणा कमितुरुरोमुखमप्यभूषयत्। ।

19.वरतनुपरिपाटलाधरात्रतरस्थानवशेन कामुकः।

पुलकमुकुलभूषणोल्लसद्वपुरभवत्सुखमीलितेक्षणः। ।

20.सरसलघुसान्द्रकर्दमद्रुतनवहाटककण्टकावृतम्।

अभवदुरुपयोधरद्वयं प्रियनखपातभियेव सुभ्रुवः। ।

21.मृदुशयनजुषोमृगीदृशः परमपनीतविभूषणस्त्रजः।

समजनि सरसातिकूलितप्रियतमसङ्ग एव भूषणम्। ।

[1]समजनिनी

[2]गरूद्र

22.नखपदमपरानवं नवं कमितुरवेक्ष्य कपोलसीमनि।

कलितकपटनिद्रया कयाप्यधिकरुषा क्षणदातिवाहिता।।

23.प्रणमनघनसारवीटिकामृदुवचनप्रमुखैरुपक्रमैः।

कतिपयघटिकाः कृशोदरी मृदुमपराद्धवधनाकरोत्।।

24.पतिरुपचितघर्मशीकरप्रविलसदूरुयुगीं मृगीदृशम्।

अधिकनिबिडमालिलिङ्गसाप्यकुरुत तेन मनोभवोत्सवम्।।

25.अरमतसुरतोचितक्रियापटिमपरिष्कृतकाकुमुद्रया।

सरसिरुहदृशासमुल्लसपरिमल[1]शालिशरीरया प्रियः।।

26.दृशिदृशमधिकं मुखे मुखं भुजलतयोश्चभुजद्वयन्निजम्[2]।

उरसिजयुगले भुजान्तरं हरिणदृशो निदधे मुदा प्रियः।।

27.पदकमलनखाग्रयावकोल्लसदलिकस्सुदृशोभवत्प्रियः।

कुचयुगघुसृणारुणाननः पृथुनयनाञ्जनमेचकाधरः।।

28.अलमिति वचनेप्ययन्त्रणं करुणपदप्रसरेपि निर्दयम्।

असदृशलपितेपिपेशलं रतमभवन्मिथुनस्य रागिणः।।

29.करसरसिजकङ्कणारवं चरणसरोरुहनूपुरारवम्।

अभिनवमणिमेखलारवं हरिणदृशो मणितं तदाजयत्।।

30.श्रमजलकलिताभिषेचनः चलनवहारमयूखचामरः।

वरतनुहृदयाद्विनिर्गतः पुनरपि पुञ्जितवैभवः स्मरः।।

31.शिथिलचिकुरबन्धनिष्पतत्प्रसवततिः कुसुमायुधोत्सवः।

मणितविजयशङ्खनिस्स्वनो[3] मुहुरुद[1]जृम्भत सन्नतभ्रुवः।।

[1]समुल्लसत्परिमल

[2]द्वयंनिजम्

[3]निःस्वनो

32.युवतिविततिरन्तरान्तरामदनहितैर्मधुवारविभ्रमैः।

अपि सुरतमहोत्सवैः प्रियानर[2]मयदाचरणायुधस्वनम्।।

33.अथ वलरिपुदिङ्मुखेनिजद्युतिपरिभूतसमस्ततारकः।

उरुरुचिरुशनाश्शनैश्शनैरुदगमदुज्ज्वलमौक्तिकोपमः।।

34.शतमखहरिदन्तरस्थितं दितिसुतदेशिकमन्तरेण तम्।

विगतरुचिजगामतारकाकुलमखिलं चरमाद्रिमेखलाम्।।

35.उदयशिखरवासिभास्करद्युतिचरणायुधभक्षिता इव।

अनुकलजनदृष्टिगोचरागगनतलाङ्कणतारतण्डुलाः।।

36.अमृतकिरणमण्डलाश्रयं मृगमिव हन्तुमभङ्गुरोदयः।

निरगमदुदयाद्रिकाननात्किरणसटावलिरर्ककेसरी।।

37.उषसि विकचहल्लकावलीपरिमलशालिनि चन्द्रमः प्रभा।

चटुलतरचकोरचर्वणात्किल तनिमानमवाप तादृशम्।।

38.वरुणनगरसौधमल्लिकाकुसुमरुचिं व्यधितोडु[3]मण्डलम्।

अपि रविकरधूलिधूसरः समजनि शीतमयूखदर्पणः।।

39.कमलनयनखण्डितासुरप्रवरमुखाम्बुजवर्णसन्निभः।

चरमशिखरिश्रृङ्गमेयिवान्शिशिरकरोदृदृशे गतप्रभः।।

40.सवितुरभिमतामितिस्फुटं तिमिरततिर्मधुपावलिच्छलात्।

विकसितशतपत्रमण्डलीशरणमवाप भिया तदीयया।।

41.अरुणकिरणजालसं भ्रमा[4]द्वियति विवर्णतनौ निशाकरे।

---

[1]मुहुरद

[2]प्रियान्अर

[3]व्यथितोरु

[4]संभ्रमा

सकलकुमुम[1]सञ्चयश्शनैरविकचभावमगादहर्मुखे।।

42.पुनरुपचितरागशालिना सपदि रथाङ्गयुगेनसस्तना।

रविविकचदलेनदीर्घिकासमभवदम्बुरुहेणसानना।।

43.विकचनलिनहल्लकावलीपरिमलतुन्दिलमन्दमारुतम्।

अभृत धवलिमानमन्तरं हरिहरितस्सविहङ्गनिस्वनम्।।

44.मुररिपुरुषसिप्रतिक्षणव्यपगतदीधितितारकाचिते।

अकुरुत समयोचिताः क्रियाः विधिवदभङ्गरवैभवोदधिः।।

45.दनुजदमननिर्गमात्पुरः कुमुदमुखागणनायकादश।

बलिमुदुरखिलाय निर्गता दिशिदिशिदेवगणाय भूयसे।।

46.गजमुखमुखसैनिकेशितुः बहुविधविघ्नतुषारभास्वतः[2]।

अनुमतिमुपलभ्यमन्त्रिणो निजभवनान्निरगाज्जनार्दनः।।

47.धृतकतिपयदीपिकाप्रभा जिततिमिरैककलः कलानिधिः।

निरगमदथ भाग्यतारके कनकचतुर्मुखगोपुरात्प्रभुः।।

48.जनकलकलवाजिहेषितद्विपकुलबृंहितमिश्रितस्वनः।

बहुविधपटुवाद्यसंभवः सपदि विदिक्षु च दिक्षु जृम्भितः।।

49.प्रतिदिशमतुलापणावलीप्रतितरुमूलमनेकपोत्तमः।

प्रतिगृहबहिरङ्कणंप्रपाप्रतितरुणान्तिकमङ्गनाजनः[3]।।

50.अधिगतमदवारणानृपाः क्वचिदपरत्रतुरङ्गवाहनाः।

नरपतिततयश्च काशिरे दिशि दिशि दीप्तपदातिसेविताः।।

51.मृगमदघनसारचन्दना गरुरसकुङ्कुमसञ्चयोदिताः।

[1]कुसुम

[2]भास्वरः

[3]मङ्गनाजः

परिमललहरीनिराकरोद्विपणिचरज्जनतापरिश्रमम्।।

52.प्रतिमदगजपुङ्गवं नृपाः प्रतितुरगप्रवरं च सादिनः।

प्रतिगृहसितसौधमङ्गनाः प्रतिमणिवीथिविलासिनो बभुः।।

53.क्षितिरुहगृहसौधमण्डपाङ्कणमणिगोपुरसालमण्डली।

मधुमथनमहारथोत्सवे[1] मनुजमयीवरराज तत्क्षणम्।।

54.सममुषसि महारथोरथं सपदि नृणाञ्च[2] मनोरथं हरिः।

कनककलशसालमण्डितं मणिमयकेतनमारुरोह सः।।

55.स्फटिकशिखरदर्पणोदरप्रतिफलितेन्दुकुरङ्गलाञ्छनम्।

मुररिपुरथिरूढवान्रथं[3] मृगपतिरद्रिमिवाधिकोन्नतम्।।

56.तरुणिकुलतपः फलोदयं तरुणिमशालिमहत्तरं महः।

विजयरथविभूषणं निजद्युतिभिरलंकुरुते स्म तं रथम्।।

57.अवगतभुवनप्रवृत्तिरप्यधिगतपुष्यरथः पुरातनः।

करबदरवदात्तसंभ्रमोभुवनमवेक्षतपुष्करे क्षणः।।

58.प्रणतनृपतिचातकाम्बुदो मुनिजनचक्रदिवाकरो हरिः।

समधिगतरथःपुराङ्गनानयनचकोरसुधाकरोऽभवत्[4]।।

59.कुवलयतिलकः कुशेशयद्युतिनयनो द्विपराजविक्रमः।

हरिहयमणिभङ्गमेचको हरिरखिलाय जनाय सस्वदे।।

60. मृदुतरनवहल्लकस्त्रजामृगमदगन्धमुखेन्दुचारुणा।

चुलकितमिहचोलसंयुजा शुभनिधिना पुरुषेण मानसम्।।

[1]रतोत्सवे

[2]नृणांच

[3]मुररिपुरधिरूढवान्रथं

[4]करोऽभवत्

61.ध्वजपटपवमानकम्पितत्रिदशनदीशतपत्रषट्पदः।

परमपुरुषभूषितो रथो व्यतनुत मानवलोचनोत्सवम्।।

62.अनिमिषतटिनीपयःकणप्रकरनिवारणकारणादिव।

अमृतकिरणपाण्डरप्रभंसमवहदातपवारणंरथः।।

63.मणिशिखरिगतांसुरापगांभृशमवलोक्यकलिन्दकन्यका।

बलरिपुमणिमालिकाछलात्स्वयमपितद्रथरत्नमारुहत्।।

64.शतमखनगरीकृशोदरीचरणसरोरुहनूपुरध्वनिः।

अपिविधिवरवाहनस्वनस्समपहृतोरथचक्रचीत्कृतैः।।

65.रथपृथुवलभिप्रकीर्णकप्रकरभवैश्चलितैस्समीरणैः।

रविरथतुरगावलीशनैर्निरग[1]मदम्बरमार्गजंसमम्।।

66.उरगवरविभूषणावलींविहगगतिप्रतिमांरथध्वजे।

दिनपतिरभिवीक्ष्यसाध्वसंप्रथममगात्प्रमदंततःपरम्।।

67.विरहविधुरचक्रनिस्स्वनेविरतिमुपेयुषिभानुनिर्गमात्।

मधुरिपुरथचक्रचङ्क्रमप्रभवगभीररवस्समुत्थितः।।

68.लघुगमनरयेणमेदिनींकचिदपिनस्पृशतिस्मकेवलम्।

मधुमथनरथोनचाध्वनत्स्थितइवनिश्चलकेतुरैक्ष्यत।।

69.उभयसविधसौधयोषितःप्रतिफलितानयथाकथञ्चन।

निजकनकविटङ्कदर्पणेष्वरमगमत्सतथैववीथिषु।।

70.द्रुततरगमनाभियोगतःसमुदितघर्मपयःकणानिव।

अधिशिखरमधत्तसन्ततान्विशदतरंमुकुरात्रथोत्तमः।।

71.अधिकगुरुतरःप्रदक्षिणीकृतपृथुदुग्धसमुद्रसालकः।

[1]शनैःनिरग

मुररिपुसमधिष्ठितोनिजंनिलयमवापनिरङ्कुशोरथः।।

72.मणिमकुटमरीचिपाटलीकृतवरणान्नृपतीन्प्रसादयन्।

निलयभुवमुपेयुषोरथादवतरतिस्मसविस्मयाशयः।।

73.अधिगतशिबिकःश्रियःपरंमणिमयमायतनंसमेत्यसः।

तदनुसहतयाशनैरगात्तदुपवनंसुमनोमनोहरम्।।

74.उपवनमुपपन्नसम्भ्रमभ्रमरपरिष्कृतपुष्पसञ्चयम्[1]।

अभिनवकलकण्ठपञ्चमस्वनमवलोकयतिस्ममाधवः।।

75.उपवननवपुष्पमञ्जरीविनिहितलोचनसिन्धुजामुखे।

कमलइवमधुव्रतोमुदापरिपततिस्महरेर्दृगञ्चलम्।।

76.द्रुततरतपनीयशृङ्खलानियमितदण्डचतुष्टयात्ततः।

हरिरसितवितानकादधोमणिमयमञ्चगतस्तयाबभौ।।

77.अधिगतकुरुविन्दमञ्चयोःकलशपयोधिसुतामुकुन्दयोः।

उपवनकलिकास्तदंशुभिःदधुरिहकोकनदोत्पलश्रियम्।।

78.मदविवशमधुव्रतावलीपरिचितचम्पकवल्लरीश्रियम्।

मृगमदकमनीयकन्धराकमलरुचिःकमलाव्यडम्बयत्।।

79.शिखरगततमालमालिकापरिलसदञ्जनशैलविभ्रमम्।

मृगमदरचितोर्ध्वपुण्ड्रकोजलदरुचिर्विदधेजनार्दनः।।

80.अनवरतपरस्परेक्षणप्रभवमनोभवविभ्रमास्पदौ।

जलनिधितनयाजनार्दनौसदसिजगत्पितरौविरेजतुः।।

81.श्रवणयुगलमहेमपत्रिका[2]मकरमनोहरकुण्डलाङ्कितम्।

अकुरुतमुदमादिमांदृशोरघमथनं**मिधुनं**दयाधनम्।। ???? mithunam?

[1]:संचयम्

[2]युगलहेमपत्रिका

82.कलशजलधिराजकन्यकानयनसरोजरसायनोदयः।

हरिरुपवनदेवतामनःप्रमुदभिवर्धनविभ्रमोऽभवत्[1]।।

83.सदसिविहरतोमुरारेराद्वेषः[2]स्सविधगयारमयाङ्गवर्चसाम्।

विततिरलिततिश्शनैरभूदुपवननूतनपुष्पसन्ततेः।।

84.सविधगतरमाङ्गसङ्गमस्फुटपुलकाङ्कुरभूषणाञ्चितम्।

पुरुषमुदितसौरभंययुःतरुणतमालधियैवषद्वदाः।।

85.अतिचलरुचिर[3]प्रभाम्बुदाविवकमलाकमलेक्षणौस्थितौ।

उपवनभुविवीक्ष्यताण्डवंव्यतनुतमत्तमयूरमण्डलम्।।

86.कूजत्कोकिलकोटिपञ्चमखप्रायेप्रसूनावलीनिर्यत्सान्द्रमरन्दवत्युपवनेमन्दानिलालङ्कृते।

विस्तीर्णंमणिमण्डपंकमलयाकारुण्यसंकेतभूरध्यास्ताखिललोकलोचनसुधावृष्टिस्सहृष्टाशयः।।

87.देवोयस्यभुजङ्गभोगशयनःश्रीरङ्गराजोहरिःतातःकाश्यपचक्रकायविबुधोलक्ष्मीर्जनन्युत्तमा।

तस्यैवोत्तमनम्बिसत्तिरुमलाधीशप्रबन्धुःकृतौलक्ष्मीकाव्यवरेजगामदशमात्सर्गःपरंसप्तमः।।

अथ अष्टादशस्सर्गः

1.अथ विकसितपुष्पोद्यानभूमण्डपस्सन्मणिमयमधितिष्टत्यच्युते भद्रपीठम्।

ऋतुगणरमणीयारामवीक्षारताभिः निरगमदबलाभिर्देवसेवी जनौघः।।

2.चरणकटक[4]नादाकृष्टहंसावलीनां चलकरखचक्रान्निर्गताभिः प्रभाभिः।

अभिनवबिसशङ्कां काचिदङ्कूरयन्ती कुसुमितवकुलायां वाटिकायां चचार।।

3.कुवलयनयनान्या कुञ्चितभ्रूविलासा कुरवकतरुवीथ्यां कुन्दमन्दस्मितश्रीः।

[1]विभ्रमोऽभवत्

[2]मुरारेःसविध

[3]अतिचचिर

[4]कटह

कुसुमविशिखवीर्यक्षेमकृद्भिः कटाक्षैः कुटिलतरमपश्यद्वल्लभं सापराधम्।।

4.वरतनुरपरा श्रीनिर्विशेषाङ्गकान्तिर्निबिडतरुतमालानोकहश्रेणिमध्ये।

प्रचलदल[1]कभारं सञ्चरन्ती चकाशे नवजलधरमध्ये कापि सौदामिनीव।।

5.ततिरतिरमणीया वारसीमन्तिनीनामहमहमिकयेवा दातुमग्र्यं प्रसूनम्।

प्रतिकुरवकवृक्षं प्रत्यशोकद्रुमञ्चप्रतिवकुलमहीजं मन्दमन्दञ्चचार।।

6.कुवलयितमुदारैर्वीक्षणैरन्तरिक्षं किसलयितमशेषं भूतलं पादरागैः।

कुसुमितमपिरेजे दिङ्मुखं मन्दहासैः कुवलयनयनानां कुञ्चितभ्रूलतानाम्।।

7.उषसि न परमन्या पुष्पमेव द्रुमस्य स्फुरितमपचिकायाम्भोजभासाकरेण।

स्फुटकुवलयमालारोचिषालोचनेन स्मरपरवशमूर्तेः कामिनो मानसञ्च।।

8.कुरवकतरुशाखां पाणिनालम्ब्य चम्पास्फुरणसदृशकान्तिः काचिदम्भोरुहाक्षी।

कुसुममपचिकायप्रस्फुरद्बाहुमूला गुरुतरकुचभारानम्रमध्यास कान्ता।।

9.अधिवन[2]मपरस्याः कान्तपार्श्व स्थितायाः विविधकुसुमवारान्वेषणे तत्परायाः।

नवपरिमललोलस्सान्द्रझङ्कारभङ्गी मधुकरसमवायो मार्गदर्शी बभूव।।

10.अपचितनवपुष्पस्तोममारामभूमौ कुरवकतरुमन्या कोमला लिङ्गनेन।

पुनरपि हरिणाक्षी तत्क्षणादन्तरुद्यत्कुसुमनिकरगन्धाकृष्टभृङ्गञ्चकार।।

11.मुखसरसिजगन्धायागतं भृङ्गयूथं मुखरवलयमन्यापाणिना वारयन्ती।

हृदयमिव विलासैः कामुकानां नखाग्रैः कुसुममनतिफुल्लं मालतीनां जहार।।

12.अपचितनवपुष्पामन्यया बालतुङ्गंकुसुमितमिव काचिन्मन्दहासैश्चकार।

कुसुमित इति बुध्द्या तं समेत्याथ चान्या विघटीतनिजवाञ्छाचम्पकं फुल्लमाप।।

13.वनभुवितरुमूले मन्दमन्दं चरन्त्याः प्रसृमरमधुधारा पङ्किले पङ्कजाक्ष्याः।

मुखकमलमलीनां पङ्किरभ्येत्यतूर्णं विकचकुसुमगन्धं शासते नस्मकामम्।।

[1]प्रलसदल

[2]अधिनव

14.मुखरवलयमुक्ता पद्मरागेन्द्रनीलप्रभवकिरणजालैः कापि कङ्केलिशाखाम्।
कुसुमभरविनम्रा कोमलाङ्गी तदानीं सुरधनुरनुकल्पस्वच्छकान्तिं वितेने।।

15.नवपरिमलराजन्मञ्जरीलीनभृङ्गीकलविरुतमनोज्ञाः कम्पमानप्रवालाः।
प्रसवभरनताग्राबालवृक्षाविरेजुः द्रुतमिवरमणीनामाह्वयन्तस्समाजम्।।

16.वकुलविटपिमूले वर्तमाना सलीलं तदुपरि तनुशाखामीषदालम्ब्य काचित्।
सरसिजदृगराजल्लोलपाणिप्रवालानखरकिरणपुष्पानूतना वल्लरीव।।

17. वनविहरणखेदाद्गन्तुमन्या नशक्ता परिसरतरुमूले पक्ष्मलाक्षी निषण्णा।
कनकनिकषगौरैः कर्णिकारप्रसूनैरभिमतकरदत्तैराससाद प्रमोदम्।।

18.पृथुकुचकलितानां तत्र निर्व्याजमन्दस्मितनवकुसुमानां कामिनीनां लतानाम्।
प्रचलदलकभृङ्गश्रेणिसंशोभितानां विविदुरथ कथञ्चिन्नैवभेदं युवानः।।

19.पृथुतरकुचभारस्त्रंसिचीनोत्तरीयं करवलयनिनादत्रासितोद्भ्रान्तभृङ्गम्।
तरुणहृदयमोहं तन्वती कापि कान्ता तरुकुसुमनिकायानुच्चकैरुच्चिकाय।।

20.प्रशिथिलभुजबन्धाः स्वेदबिन्दुप्रमृष्टस्फुरदलिकललामा लोलवामालकाग्राः।
गुरुतरकुचभारस्त्रस्तपट्टोत्तरीया वनविहरणखेदात्क्षिप्रमासन्नताङ्घ्रः।।

21.मुखपरिमलहेतोरागतेभ्यः प्रदीप्तं मधुकरनिकरेभ्यः कापि कान्ता तदानीम्।
मुहुरवनमयन्ती मुग्धवक्त्रारविन्दं हृदयमकृत यूनां कामबाणैकलक्ष्यम्।।

22.वनविहरणखेदक्लान्तवक्त्रारविन्दास्तनजघनगुरुत्वान्मन्दमन्दश्चरन्ती।
मनसिजभुजवीर्यं वर्धयन्ती विलासैरहरदसितकेशी कापि यूनां मनांसि।।

23.वकुलकुसुमकाञ्ची दामभास्वन्नितम्बा श्रवणशिखरचञ्चज्जाति[1]पुष्पावतंसा।
अलकभरविलोलत्फुल्लपुन्नागपुष्पा व्यतनुत वनलक्ष्मी विभ्रमं तत्र काचित्।।

24.वनविहरणजातक्लान्तिरेणेक्षणानामथ गतिषु च मान्द्यं भङ्गुरत्वं वलग्ने।

[1]जात

अधिकमरुणिमानं चक्षुषोर्गण्डसीम्नि समजलकणिकालीं शश्वदाविश्चकार।।

25.श्रमजलकणमृष्टामृष्टवक्षोजशृङ्गार्पितमलयजचर्चालोलधाम्मिल्लहारा।

ललितचरणलाक्षारामवीथीप्रवारां मृदुलतरपलाशप्रस्तरे काचिदास्थत्।।

26.समय इह समिद्धोरङ्गधामागभीरप्रकृतिरवभृथार्थं प्रस्थिता रामभूमिः।

इति सपदि समष्टिर्मन्दनादाभिरामा कनकविरचितानां काहलीनां जजृम्भे।।

27.अघनिरसनदक्षं विष्णुनाम्नां सहस्रं द्रुतमवगमयन्तं काहलश्रेणिनादम्।

कुवलयनयनास्ताः प्रापुराकर्ण्यतस्यद्रुहिणमुखसुराणां स्वामिनः पादमूलम्।।

28.तटयुगवनपूगीनालिकेराम्रजम्बूपनसलिकुचचूतश्यामिकालीढतोयाम्।

हरिरवभृथहेतो रौत्तरीं सह्यकन्यां अनिभृतकलहंसप्रेक्षणीयामयासीत्।।

29.महितवरुणसूक्तभ्राजमाननाननानां ज्वलनसधृशभासामृत्विजाम्मण्डलेन।

स खलु निखिलरक्षादीक्षितस्सह्ययोनिं सरितमवजगाहे सार्वभौमस्सुराणाम्।।

30.अवभृथमनघायां कुर्वतस्सह्यजायां विकसितकमलायां पद्मनाभस्यशौरेः।

भुजघुसृणविशेषैः पुण्ड्रकस्तूरिकाभिः सकलजल _____ वेणीकर्बूराभूत्क्षणेन।।

31.पिहितनिजशरीरानिर्जरानिर्विकल्पा निगमनियतचित्ता भूसुरा भूरिवा _____।

झटिति धरणिपालास्सह्यजायां समस्ताः सहनिजवनिताभिस्सादरं सस्नुरारात्।।

32.दृढतरकृतनीवीबन्धनोदारचेला प्रकटविविधलीलं पाणिमालम्ब्यसख्याः।

प्रथममपतदेका तत्र वक्षोजकुम्भव्यतिकरकलुषाम्भः पूरलोलोर्मिमालम्।।

33.अथ सपदि विमुक्ताः ____ मुक्ताविभूषाः सविधगतसखीषुन्यस्तकैवक्ष्यभूषा।

रविकरपरितप्तारत्नसोपानपङ्क्त्या सरितमवजगाहे शैवलोद्वृत्तमीनाम्।।

34.तरलतरतरङ्गाज्जातभीतिर्मृगाक्षी प्रियतमकरपद्मं गाढमालम्ब्यचान्या।

सरितमवजगाहे सान्द्रलोलैरपाङ्गैः कुवलयवनभासां कुर्वती वीप्सितानि।।

35.सकुतुकहरिणाक्षी संघविन्यस्तभूषा वरवसनसहस्रैर्मण्डितासन्नशाखा।

तटतलसहकारा शोकपुन्नागपङ्क्तिः समवहदतिरम्यां पारिजातस्य लक्ष्मीम्।।

36.प्रणयिनिकृतकोपानाद्दताम्भोविहाराक्षणमुपतटवल्लीं काचिदालम्ब्य तस्थौ।
तदनुसलिलवेगोन्मूलितायां च तस्यां पयसिविनिपतन्ती तद्भुजामाललम्बे।।

37.जलविहरणभाजः कातराक्ष्याविलासी निजकरकमलाभ्यामुन्नमय्याननेन्दुम्।
चटुलतरतरङ्गैर्मुक्तताम्बूलरागं मधुरमधरबिम्बं मन्दमन्दं चुचुम्ब।।

38.कुवलयनयनानां कुर्वतीनां विहारं चरणकमलरागैः कण्ठकस्तूरिकाभिः।
कुचकलशविशीर्णैः कुङ्कुमैः किञ्चधौतैः शबलमभवदम्भश्शैवलिन्यास्तदानीम्।।

39.सलिलविहृतिभाजां तत्र शातोदरीणां कुचगिरिशिखरेभ्यो वीचिसन्ता[1]डितेभ्यः।
व्यतनुतपरिशीर्णौस्सह्यशैलेन्द्रकन्या तरलविविधहारैस्ताम्रपर्ण्याविलासम्।।

40.विशददशनपङ्क्तिस्वच्छरश्मिप्रवाहप्रविलसदधरोष्ठ्योवारिलीलावधाने।
निपतदुदयशैलोद्भासिनीलालकाग्रा युवजननयनानामुत्सवं चक्रुरेताः[2]।।

41.हरिरनघगुणौघः क्लृप्तशुद्धाभिषेकोद्भुतकनकसमाने वाससीद्वेवसानः।
तटभुविमणिपीठं शुभ्रतुङ्गोपधानास्तरणमभजदुच्चैस्तत्रसह्योद्भवायाः।।

42.तटगतमणिपीठे सन्निविष्टं मुकुन्दं सविधविधृतमुक्ताछत्रवीतातपत्रम्।
मलयजरसमालारत्नकोटीरहाराङ्गदकटकसमेतं भूमिपालाः प्रणेमुः।।

43.मणिमयशिबिकायागतायां पुरस्ताद्विभवनिधिरुदस्थादुन्नताद्भद्रपीठात्।
तदनु समधिरूढे तां प्रमोदेन तस्मिन्तदमलपदरेणुं दण्डनाथो ममार्ज।।

44.अधिगतशिबिकस्सन्सह्यजास्नानशीतप्रविलसदलकाभिर्वारवमेक्षणाभिः।
परिवृतनिजपार्श्वः प्रापधामस्वकीयं प्रणवमयमुदञ्चत्सर्ववादित्रनादः[3]।।

45.अथ हरिरपराह्णेहस्ततारे पवित्रे प्रणवमयनिशान्तात्तत्र निर्गत्यरङ्गी।
मणिमयमभिरामं मण्डपं चित्रभेदैरगमदतिविशालं पुष्पयागं[1] विधातुम्।।

[1]संता

[2]चक्रिरेताः

[3]त्रघोषः

46.कनकरचितमुक्तारत्नकुम्भोपनीतैः लघुभिरतिवलक्षैर्वारिभिर्जाह्नवीयैः।

अहितकनक ____ण्ठे सन्निविष्टोमुरारिर्वि[2]रचितरमणीयस्नानकृत्यो बभूव।।

47.विधृतकनकवासश्चन्दनालेपमाला कटकमकुटहारोदारसर्वाङ्गकान्तिः।

अपरममलमुक्तापीठमध्यास चक्रे सदसि कमलनाभः पाञ्चरात्रप्रयोगम्।।

48.तदनुसदसितस्मिन्नम्रतश्चक्रपाणेः निखिलभुवनरक्षानिर्निमेषस्यनित्यम्।

स्फुरदलिकुलधूमे पुष्पयागे प्रवृत्ते समजनि बहुवाद्यध्वानपूर्णाखिलाशा।।

49.बहुविधम___त्रोच्चारणध्वस्तलोकप्रबलदुरितराशो पुष्पयागे[3]समाप्ते।

मधुरिपुमहयात्रा सेवनायासखिन्नः किल रविपराब्धौ क्षीणपादो ममज्ज।।

50.रजनिमुखविधेयं कर्मकृत्वाकृतज्ञः सहजगुणपवित्रः कल्पिताहारकृत्यः।

कबलितघनसारोपेतताम्बूलरागप्रविलसदधरश्रीराबभासे सभायाम्।।

51.मुखरसकलवाद्यैस्सेवितस्तुङ्गसप्तावरणविपुलवीथीचङ्क्रमोऽयं त्रिधामा।

अधिगतशिबिकस्सन्दीपिकाचक्रवालप्रतिहततिमिरालिर्मण्डपान्निर्जगाम।।

52.दलितघनतमोभिर्गन्धतैलावसेकज्वलदलघुशिरवाग्रैर्दीपिकाचक्रवालैः।

करटिभिरभिमत्तैस्सस्वनैर्वाद्यभेदैरगमदधिकतुङ्गं दक्षिणं गोपुरं सः।।

53.व्रजति तदनुपश्चादग्रतो नातिदूरे महति जनसमूहे मध्यतो रङ्गधामा।

व्यजनमणिकलाची चामरच्छत्रराजत्परिमितपरिवारो राजवीथ्याञ्चचार।।

54.अथ शुभनिधिरेवं पञ्चसुस्वासुवीथीष्वनुपमगृहसौधस्वर्णकुम्भोज्ज्वलासु।

कृतविहृतिविलासस्तार्क्ष्यहेतीशलक्ष्मज्वलदुरुतरदीपं गोपुरं स प्रपेदे।।

55.भूपालैः पूर्व पूर्वैरपि महितगुणैर्वर्तमानैश्चदत्तान्य

त्युच्चैर्यानि क्लृप्तान्यपि निजचरणाम्भोरुहे रङ्गभूमौ।

---

[1]पुष्ययागं

[2]मुरारिः

[3]पुष्पयागे

तान्यूरीकृत्य वर्धा[1]सदसि सुपठितां सूक्तिमालाम्मु[2]कुन्द

श्शुश्रावोदञ्मुखस्सन्मणिमयशिबिकामध्यवर्त्येव हृष्टः।।

56.पादक्षालनवारिवाहुतुलसीस्रक्चन्दनस्पर्शना

त्कुर्वन्कोरकितश्रियस्सुरगणानुद्वास्य चान्याञ्जनान्[3]।

भद्रं भद्रसुभद्ररक्षितमहाद्वारान्वितं गोपुरं

रङ्गेशः प्रविवेश भोगिमथनो वादित्रनादोज्ज्वलः।।

57.विष्वक्सेनगरुत्मंदञ्जसुभगं प्राकारमत्यायतं

दुर्गादन्तिमुखोज्ज्वलं श्रुतिमयं सालं च सर्वोन्नतम्।

रङ्गेशो रचितप्रदक्षिणविधिर्देवः प्रपेदे शनैः

धामस्वं प्रणवात्मकं फणिफणामाणिक्यदीपोज्ज्वलम्।।

58.एवं सप्तसु[4] विहृतिं कृत्वा भुजङ्गोत्तमे

पर्यङ्के कमलामहीकुचतटीकाश्मीरपङ्काङ्कितः।

आसीनोरसिकाग्रणीस्स भगवान्सर्वान्सदानन्दयन्

आनन्दस्य महोत्तरस्य नितरां कोटिं परामश्नुते।।

59.देवो यस्य भुजङ्गभोगशयनश्श्रीरङ्गराजोहरिः

तातःकाश्यपचक्रायविबुधो लक्ष्मीजनन्युत्तमा।

तस्यैवोत्तमनम्बिसत्तिरुमलाधीशप्रबन्धुः कृतौ

लक्ष्मीकाव्य उदारवैभवनिधौ सर्गो गतोऽष्टादशः

[1]बद्धां

[2]मालां

[3]चान्यान्जनान्

[4]सप्तसुवासरेषु

முதல் அத்யாயம்

காவ்யம் – அறிமுகம்

வடமொழியில் "காவ்யம்" என்றால் பாட்டு என்பது பொருள். கவியால் படைக்கப்படுவன அனைத்தும் காவ்யமே. இது இலக்கிய உலகில் ஒரு தனி இடத்தைப் பெற்றுள்ளது. ஒரு காவ்யத்தை மஹாகாவ்யம் என்று கூறுவதற்குரிய இலக்கண வரைமுறைகளை "அலங்கார ஶாஸ்த்ரம்" எடுத்தியம்புகின்றது. ஸம்ஸ்க்ருதத்தில் காவ்யங்கள், ஶ்ரவ்ய காவ்யம் – கேட்டு ஆனந்தப்படக்கூடியவை, மற்றும் த்ருஶ்ய காவ்யம் – பார்த்து ரசிக்கத்தக்கவை எனும் இருபெரும் பிரிவுகளாக வகைப்படுத்தப்பட்டுள்ளது.

ஶ்ரவ்ய காவ்யம் மூன்று பிரிவுகளாக உள்ளன. அவை கத்யம் (உரைநடை), சம்பு (உரைநடை மற்றும் செய்யுள்), மற்றும் பத்யம் (செய்யுள்) . பத்யகாவ்யம் மஹாகாவ்யம், கண்டகாவ்யம், மற்றும் லகுகாவ்யங்களாக

பிரிக்கப்படுகிறது. மஹாகாவ்யங்களை "सर्गबन्धो महाकाव्यम्"[1] என்று தண்டி அவர்கள் குறிப்பிட்டுள்ளார்.

மஹாகாவ்யத்தின் லக்ஷணங்கள்:

மஹாகாவ்யங்கள் என்று சொல்லப்படுபவை கவிதை வடிவில் பத்ய காவ்யங்களாகவும், பல ஸர்கங்களை கொண்டதாகவும் இருக்கும். காவ்யத்தின் தலைவன் சிறந்த வீரனாகவோ, தெய்வமாகவோ அல்லது வீரம் செறிந்த க்ஷத்ரியனாகவோ இருக்கவேண்டும். சந்தஸ் ஒவ்வொரு ஸர்கத்திலும் வெவ்வேறு விதமாக மாறுவதே காவ்யத்தின் சிறப்பு. நவரஸங்களுள் ஶ்ருங்காரம், வீரம் ஆகியவையே பெரும்பாலும் காவ்யங்களில் காணப்படுகின்றன.

சூரியோதயம், சந்த்ரோதயம், போர் படையெடுப்பு போன்று பதினெட்டு வர்ணனைகள், மற்றும் ராமாயணம், மஹாபாரதம் வீரம் செறிந்த மாமனிதனின் கதை போன்றவை இடம்பெற்றிருக்கவேண்டும்.

[1]A short history of sanskrit literature - pg.no.64

பஞ்சமஹாகாவ்யங்கள்:

ஸம்ஸ்க்ருதத்தில் காளிதாஸனின் படைப்புகளான குமாரஸம்பவம் மற்றும் ரகுவம்ஶம், பாரவியின் கிராதார்ஜுனீயம், மாகனின் ஶிஶுபாலவதம், ஸ்ரீ ஹர்ஷரின் நைஷதசரிதம் என்பவை பஞ்சமஹாகாவ்யங்கள் என்று அழைக்கப்படுகின்றன.

द्वे कृते प्रकृतेः पुंसो द्वे चैकमुभयरोपि। पञ्चस्वेतेषु पाण्डित्यं पुरुषार्थो हि पञ्चमः॥[1]

'(ரகுவம்ஶம்,குமாரஸம்பவம் ஆகிய) இருபெரும் காவ்யங்கள் (ப்ரக்ருதி) இயற்கையைப் பின்பற்றி காணப்படுகின்றன. இரு (கிராதார்ஜுனீயம், ஶிஶுபாலவதம்) காவ்யங்கள் (புருஷ) மனிதன் அனுபவிக்கும் தத்துவத்தைக் குறிப்பிடுகின்றன. ஒரு (நைஷதம்) மஹாகாவ்யம் இரண்டு தத்துவங்ககளையும் சார்ந்துள்ளது. இந்த ஐந்து காவ்யங்களிலும் பாண்டித்யம் என்பது ஐந்தாவது புருஷார்த்தமாகக் கருதப்படுகிறது.'

[1]

குமாரஸம்பவம் – காளிதாஸர்

இதில், காளிதாஸர் சிவசக்தியின் அருளால் உருவான குமரனது பிறப்பின் வரலாற்றை ஸம்ஸ்க்ருத மொழியில் கவிதை மூலமாக விளக்கியுள்ளார். இதில் வஸந்த காலத்தில் நிகழும் இயற்கையின் அழகை தம் கவிதைகளால் விளக்கும் பாணி வியப்புக்குறியது. வால்மீகி ராமாயணத்தில் பாலகாண்டத்தில் குமாரஸம்பவம் இடம்பெற்றுள்ளது. விஶ்வாமித்ரர் ராமரையும், லக்ஷ்மணரையும் தனது யாக-வேள்வியின் காவலுக்காக அழைத்துச்செல்லும்போது சிவசக்திக்கு பிறந்த குமரனின் வரலாற்றை இருவருக்கும் கூறுகிறார்.

अपि क्रियार्थं सुलभं समित्कुशं जलान्यपि स्नानविधिक्षमाणि ते।
